और्ध्वदैहिकपद्धतिः

४५६८

4568

F. = 85

इति विश्वनाथीयान्त्यकर्मणि [illegible] समाप्ता॥ श्रीः॥

भं वि

श्रीगणेशाय नमः॥ गणेशं गिरिशं पद्मनाभं सुरेशं विभुं विश्वनाथं शिवां लक्ष्मीमाद्यां विरिंचिं विवस्वंतमन्यां
श्च नत्वा क्रियापद्धतिं विश्वनाथः करोति॥१॥ ततो यजुर्वेदांतर्गतमाध्यंदिनीशाखोक्तं मरणसमयाद
र्वाक्सपिंडीकरणांतं कर्म लिख्यते॥ आसन्नमरणं पित्रादिकं पुत्रादिना तीर्थे नीत्वा प्रायश्चित्तं कारयेत्
तदा यत्सत्यं वाङ्क्ष्यते। तद्यथा। चतुरस्रीनेकं वा ध्यात्मविदं पर्षत्वेनोपवेश्य गोमयोपलिप्तायां भूमौ आच
म्य भूमिस्थापनं। तथा आतुरस्य गोमयेन गोमूत्रेण च तीर्थोदकेन आक्रोसत्यां कृतस्नानः शुद्धे वाससी
परिधाय बद्धशिखः कृततिलकः कुशोपग्रहः पूर्वाभिमुखोपविष्टः आचम्य प्राणानायम्य कृत्वा। अद्येत्या
दि देशकालाद्युच्चार्य मम सकलपातकनिवृत्तिकामो विष्णुपूजनपूर्वकं देहशुद्ध्यर्थं प्रायश्चित्तमहं करि
ष्ये॥ प्रायश्चित्ताङ्गं निमित्तं विष्णोः पंचोपचारैः पूजनमहं करिष्ये॥ इदमत्र चंदनं समर्पयामि। पुष्पं॥ १
धूपं। दीपं। नैवेद्यं। फलतांबूलदक्षिणां समर्पयामि। विष्णोः पूजनविधेः परिपूर्णमस्तु। ततः किंन

ता

वासाः पर्षदं प्रदक्षिणीकृत्य हृदये धूयमानो धरण्यां साष्टांगं शरणमेत्य । ततस्तैः किं ते कार्यमिथ्यामावासीः
सत्यमेव ब्रूहि इत्यादिष्टे पर्षदग्रे गोवृषयोः प्रत्येकं प्रत्याम्नायत्वेन यथाशक्ति स्वर्णरूप्ययोर्निष्कं तदर्द्धं त
दर्द्धं वा निधाय अमुकस्य मे जन्मप्रभृति अद्य दिनं यावत् ज्ञाताज्ञात कामाकाम सकृदसकृत्कायिक
वाचिक मानसिक सांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकल पातकोपपातक गुरुलघुपातक सं
कलीकरण मलिनीकरण पात्रीकरण जातिभ्रंशकर प्रकीर्ण पातकानां निरासार्थं युष्मदनुग्रहं कृत्वा प्राय
श्चित्तमुपदिशन्तु भवन्तः ॥ तत्र प्रार्थना ॥ सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः ॥ मम देहस्य संशु
द्धिं कुर्वन्तु द्विजसत्तमाः ॥ मया कृतं महाघोरं ज्ञातमज्ञात किल्बिषं ॥ प्रसादं क्रियतां मह्यं शुभानुज्ञां प्र
यच्छथ ॥ पूज्यैः कृतं पवित्रोऽहं भवेयं द्विजसत्तमैः ॥ एवं प्रार्थयेत् ॥ पुत्रादिश्चेत्प्रायश्चित्तकर्त्ता तदाऽमुकस्य
देहस्थाने तन्नाम निर्दिशेत् ॥ तद्यथा ॥ सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजा द्विजाः । अमुकस्य देहस्य

2

संशुद्धिं कुर्वंतु द्विजसत्तमाः ॥ एतत्कृतं मया घोरं ज्ञातमज्ञातकिल्बिषं ॥ प्रसादं क्रियतां मह्यं शुभानु
ज्ञां प्रयच्छथ ॥ पूज्यैः कृतं पवित्रोऽहं यं भवेयाः द्विजसत्तमैः ॥ प्रार्थनानंतरं मम मानुग्रहं कुर्वंतु भवंतः । इति
श्रणमेतत् ततस्तमनुज्ञाप्य तस्य शारीरद्रव्यादिशक्तिमुत्तममध्यमादिपक्षांश्च विचार्य नूस्मिन्नयसेऽयं
शक्त इति निश्चित्य पुस्तकवाचनपूर्वकं कथयेत्सुरनुवादकस्याग्रे शतानामायाँश्च कल्पे प्युक्तस्मिन्काले
प्रायश्चित्ती चंदनपुष्पादिभिः पुस्तकपूजां सभ्यानुवादकपूजां विधाय निर्बंधपूजां तेन किंचिद्य
थाशक्तिद्रव्यं निधाय कृतांजलिपुटो नमस्तिष्ठेत् । अनुवादकाय च पापानुसारेण निःकृतिरूपां
दक्षिणां दद्यात् । ततोनुवादपूर्वोक्तविशेषेण विशिष्टानां पूर्वोक्तानां पातकानां क्षयोऽतक्षत
वतन्मनैप्रभृति अद्य यावत् ज्ञाताज्ञा॰ नेन पर्षदुपदिष्टेन सर्वप्रायश्चित्तेनामुकप्रत्या
म्नायद्वारा प्रत्यब्दादि अंगसहितेनाचीर्णेन तव न विष्यति । तेन त्वं कृतार्थो न विष्यसीत्य २

कृ॰ = २

पद्दिशेत्त्रिः। तच्च सर्वप्रायश्चित्तं शास्त्रानुसारेण षडब्दं अब्दं सार्द्धाब्दं मन्यौ पर्षदस्तु मतं प्रत्याम्नायाश्च।
गायत्र्ययुतजपे गायत्र्या तिलहोमे सहस्रे द्वादशब्राह्मणभोजने तीर्थयोजनयात्रायां। एकगोदाने।
सुवर्णरूप्यनिष्कतदर्द्धतदर्द्धानां गोमूल्यानां शक्त्यादाने सुष्कके शास्य द्वादशस्नाने ष द्विगुणं द्वाद
शान्नमान्नदानादौ चैकप्राजापत्य इति। तत्र शक्तस्याम्नायं द्विगुणं द्रव्यमित्यादियोज्यं॥ निष्कश्चतोक
शास्त्रयोरेकवाक्यतायां माषा ४० तदर्द्धं २० तदर्द्धं १० मुख्यं सुवर्णं तदशक्तौ रजतं यथाख्यं। ततो निवेदि
तं प्रायश्चित्तं भवद्भिरस्तु गृहीत्वा स्वीकृत्य सन्मानपूर्वं प्रणम्य पर्षदं विसर्जयेत्। अस्मिन्नहनि शक्तेनोपवा
श्रा सः कार्यः। इतरेऽहनि विषाशनं। ततः कस्यांचिद्विकायां तिथौ अथवा तद्दिने कृतमाध्याह्निकः स्नायाद्
गंगादौ देशकालौ संकीर्त्य अमुकशर्मणो मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञातकामाकामसकृ
दसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपात

3

कोपपातकलघुपातकसंकलीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णपातकानां निरासेन
मरणकाले शुद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं च अमुकप्रायश्चित्तं अमुकप्रत्याम्नायेन प्राचोदीचीगोसहितं यथा
शक्ति अहं करिष्ये इति संकल्प्य यानि कानि च पापानि ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठंति तस्मा
केशान्वपाम्यहं। इति मंत्रेण शिखाकक्षोपस्थवर्जं नखरोमाणि वापयित्वा ततः प्राङ्मुखो द्वादशांगु
लं दंतकाष्ठेन। आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते।
इति मंत्रेण दंतान् संशोध्य तत्र स्नात्वा आचम्य भस्मादिदशविधस्नानं कुर्यात्। तत्र भस्मना स्नानमेवं।
यथाग्निर्दहते सर्वं तृणकाष्ठादिसंचयं। तथा मे दह्यतां पापं कुरु भस्म समस्तु चेशुचिं। नमस्ते रुद्र इति भस्मना
स्नानं। अथ मृत्तिकास्नानमंत्रः। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ शिरसा धारयिष्यामि रक्षस्व मां
पदे पदे। उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हर मे पापं यन्मया दुःकृतं कृतं॥ मृत्तिके ब्र ३

ऽरक्षितासि काश्यपेनाभिवंदिता॥ मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं॥ इति मंत्रैः ओं गोद्वर्त्तनं॥ इ
दं विष्णुरिति मृत्तिकास्नानं॥ अथ गोमयं॥ गोमये वसते लक्ष्मीः पवित्रं सर्वमंगलं॥ स्नानार्थे संस्कृतं दे
व पापं मे हर गोमय॥ अग्रमग्रं चरंतीनामोषधीनां वने वने॥ तासां ऋषभपत्नीनां पवित्रं कायशोध
नं॥ यन्मे रोगं च शोकं च तन्मे दहतु गोमयं॥ गंधद्वारेति गोमयं॥ अथ वामानस्तोके इति॥ अथ पंचगव्यं
एकत्र कृत्वा स्नानं॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः समन्वितं॥ सर्वपापविशुद्ध्यर्थं पंचगव्यं पुनातु मां॥
सहस्रशीर्षेति॥ अथ गोरजःस्नानं॥ गवां खुरेण निर्धूतं यदुद्धृतं गगने गतं॥ शिरसा तेन संलेपो महापात
कनाशनः॥ अथ धान्यस्नानं॥ धान्यौषधीमनुष्याणां जीवनं परमं स्मृतं॥ तेन स्नानेन देवेश मम पापं
व्यपोहतु॥ धान्यमसि मंत्रः॥ अथ फलस्नानं॥ वनस्पतिरसो दिव्यः फलपुष्पद्रुमः सदा॥ तेन स्ना
नेन मे देव फलं द्व तमनंतकं॥ याः फलिनीः॥ अथ सर्वौषधी॥ औषधयः सर्वेभ्यस्ताणां तृणगुल्मक

५

तास्तथा:॥ दूर्वासर्षपसंयुक्ताः सर्वौषध्यः पुनातु मां॥ ओषधयः समव॥ अथ कुशोदकं। कुशा मध्ये स्थि-
तो ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे शंकरो देवस्तेन नश्यतु पातकं। देवस्य त्वेति कुशोदकं। अथ हिर-
ण्यस्नानं॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे। आ कृष्णे-
नेति हिरण्यस्नानं॥ अथ गंगास्नानं॥ विष्णुपादाग्रसंभूते गंगे त्रिपथगामिनि। धर्मद्रवेति विख्याता पापं
मे हर जाह्नवी॥ गायत्री मंत्रेण। स्त्रीशूद्राणाममंत्रकाणि स्नानानि॥ पुराणमंत्राः पठनीयाः॥ एवं दशवि-
धिस्नानानि विधाय पुनः स्नानविधिना स्नानं। स्नानांगतर्पणं। धौते वाससी परिधाय तिलकं विधाय
कुशोपग्रहो। आचमनं प्राणायामः॥ कृतमाध्याह्निकः प्रायश्चित्तांगं विष्णोः षोडशोपचारैः पूजनं।
प्रायश्चित्तांगं वैष्णवश्राद्धं। विष्णोरेतत्ते पाद्यं। चंदनं। पुष्पं। धूपं। आचमनं। इदं विष्णुरिति दिग्बं-
धः। वैष्णवश्राद्धोपहाराणां पवित्रतास्त्वादेशकालस्य देशपादि० एवं गुणविशिष्टायां पुण्यतिथौ प्रा ४

३

ता

यश्चित्तांगं वैष्णवश्राद्धमहं करिष्ये। विष्णवे इदमासनं॥ इदमत्र चंदनं पुष्पं। धूपं। दीपं। यथादत्तं गं
धाद्यर्चितं विष्णवे स्वाहा। इदं वो ज्योतिः। वैष्णवश्राद्धस्यार्चनविधेः परिपूर्णमस्तु। आचमनं। विष्णु
प्रीतयेत्रिंशोधिकान् शुभान् ब्राह्मणान् पूजापूर्वकं भोजयेत्। आमान्नं वा दद्यात्। सुप्रोक्षितादि
करणं विष्णुश्राद्धप्रतिष्ठासिध्यर्थं दक्षिणां विष्णवे स्वाहा। अद्य पूर्वोच्चरितविष्णुश्राद्धं परिपूर्णमस्तु
ततः प्रायश्चित्तधेनुदानं। प्रायश्चित्तधेनुदानमंत्रः। प्रायश्चित्तहरो ब्रह्मा प्रायश्चित्तहरो हरिः प्रायश्चित्तह
रो रुद्रो गामेकं च ददाम्यहं। पूर्वजन्मसहस्राणि पूर्वजन्मशतानि च। तत्सर्वं नाशमायांतु गामेकं ददतो मम॥
धेनुके सर्वभूतानामसि त्वं पापनाशनी। पापार्णवे निमग्नं मां समुद्धर नमोस्तु ते॥ या लक्ष्मीः। अथ वा द्व्याहा
राक्रयीत। अथ स्थंडिले पंचभूसंस्कारान् कृत्वाग्निस्थापनं। संकल्पः। आरब्धप्रायश्चित्तस्य प्राच्यांगं
आहूतिहोममहं करिष्ये। घृतेन व्याहृतिभिः। आज्यसंस्कारः। पर्युक्षणं कुर्यात्। ॐ भूः स्वाहा। इदमग्न

ति

५

ये। ॐ भुवः स्वाहा। इदं वायवे। ॐ स्वः स्वाहा। इदं सूर्याय। ॐ भूर्भुवः स्वः स्वाहा। इदं प्रजापतये न मम। एवं
सप्त वारं ३५ आहुतिः २८। पुनः प्रकीर्णपापक्षयार्थं यथाशक्त्या तिलहोमः। अथवा होमद्रव्यं ब्राह्मणाय
वा दद्यात्। व्याहृतिहोमसिद्ध्यर्थं मनःसंकल्पितं घृतं अग्निवायुसूर्यप्रीत्यर्थं ब्राह्मणायाहं ददास्ये। तेन व्या
हृतिहोमसिद्धिरस्तु। ततउदीच्यांगांवैष्णवश्राद्धं। ततः तुलसीदर्भाक्षतान्गृहीत्वा अद्येत्या० मम जन्म
प्रभृति अद्यदिनं यावत् इत्यादि पूर्वोक्तप्रयोगोच्चारणं। प्रधानसंकल्पः। अनेकपापक्षयार्थं एतावत्संख्या
कान् प्राजापत्यान् अमुकद्वाराहमाचरिष्ये। तेन पापाहा महाविष्णुः प्रीयतां॥ अनेन प्रायश्चित्तेन कृतेन अमु नो
कगोत्रोहं अमुकनामाहं निःपापो भूयासं इति त्रिर्वोच्यं। एवं वारद्वयं द्विजमुखात् श्रुत्वा समनोपविष्टब्राह्म
णानां पादाभिवंदनं। मम पापक्षयपरस्वं एतावत्संख्याकं प्रायश्चित्तं परिपूर्णमस्तु। अस्त्विति ब्राह्मणैर्ब्रूया
त्। प्रायश्चित्तस्य उदीच्यां गां व्याहृतिहोमं अहं करिष्ये॥ पूर्ववत् आहुतिः २८ प्रायश्चित्तांगं पंच ब्राह्मणभो ५

जनसंकल्पः। द्वितीयगोमिथुनदानं। ततो नक्षत्रार्थे पंचगव्यः कार्यः। पुत्रपुष्येण गायत्र्या गोमूत्रं पलार्द्धं। गं
धद्वारेति अंगुष्ठपर्वार्द्धपरिमितं गोमयं। आप्यायस्वेति पलद्वयं दुग्धं दधिक्राव्णेति पलत्रयं दधि। घृतं
मिमिक्ष इति पलमेकं घृतं। आपोहिष्ठेति पलमेकं कुशोदकं। ताम्रायाः गोमूत्रं। श्वेतायाः गोमयं। कपिलायाः
क्षीरं। नीलायाः दधि। कृष्णायाः घृतं। प्रणवेनालोड्य। यज्ञियकाष्ठेन निर्मथ्य। प्रणवेनाभिमंत्र्य। सप्तपत्रैर्हरितकु
शैर्दशाकृतीर्जुहुयात्। पृथिव्यै स्वाहा। इदं विष्णवे स्वाहा। इदं रुद्राय स्वाहा। इदं रुद्राय। ब्रह्मणे स्वाहा। अग्नये स्वा
हा। सोमाय स्वाहा। सूर्याय स्वाहा। प्रजापतये स्वाहा। अंतरिक्षाय स्वाहा। स्विष्टकृते स्वाहा। इति हुत्वा हुतशेषग्रह
णं करिष्ये इति द्विजाननुपृच्छेत्। कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत्। अशक्तो गोमूत्रादि स्वल्पं ग्राह्यं। आस
र्वस्य पेयत्वात्। अस्मिन् दिने उपवासः। अशक्तस्य हविष्यान्नं। मुखावलोकनं। सूर्पावेक्षणं वा। एवं प्राय
श्चित्तं कृत्वा अशक्तो सत्तां दद्याद्दानानि कुर्यात्। गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि चारूप्यं लव

णमित्याकर्ण्य देवेशाद्दानान्निपंडिता ॥ इत्युक्तानि ॥ तत्र प्रथमं गोदानं ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्त
स्माच्छिवं मे स्यादिह लोके परत्र च ॥ इति मंत्रेण गौर्देया ॥ १ ॥ अथ भूमिदानं ॥ ॥ सर्वभूताश्रया भूमिर्वराहेण समु
द्धृता ॥ अनंतपुण्यफलदा अतः शांतिं प्रयच्छ मे ॥ २ ॥ अथ तिलाः ॥ ॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिला स्मृताः ॥
तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥ ३ ॥ ॥ अथ हिरण्यं ॥ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अन
न्तपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ ४ ॥ ॥ अथाज्यं ॥ ॥ कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितं ॥ देवानामाज्य
माहारमतः शांतिं प्रयच्छ मे ॥ ५ ॥ अथ वस्त्रं ॥ ॥ शरण्यं सर्वलोकानां लज्जाया रक्षणं परं ॥ सुवेषधारि वस्त्रं त्वम
तः शांतिं प्रयच्छ मे ॥ ६ ॥ अथ धान्यं ॥ ॥ सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥ प्राणिनां जीवनोपायमतः शांतिं
प्रयच्छ मे ॥ ७ ॥ अथ गुडदानं ॥ ॥ सर्वेरसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं ददस्व गुड
सर्वदा ॥ ८ ॥ अथ रूप्यं ॥ ॥ प्रीतिर्यतः पितृणां च विष्णुशंकरयोस्तथा ॥ शिवनेत्रोद्भवं रूप्यमतः शांतिं प्रयच्छ ६६
एतदेव

मे॥ण॥ अथलवणदानमंत्रः॥ ॥यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना॥ पितॄणां च प्रियं नित्यं तस्मात्स्व
र्गप्रदं भवेत्॥१०॥ एवं दशदानानि दत्वा मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर॥ यन्मयाचरितं देव परिपू
र्णं तदस्तु मे॥ इति वदन् विष्णुं स्मरेत्॥ ॥एतानि दशदानानि सन्न्येष्वेव वा॥ तदसंभवे ऽन्येष्वपि
वा। ततः यन्मया कृतमस्तुकप्रायश्चित्तं तदच्छिद्रमस्तु॥ इति कर्त्रोक्ते ऽच्छिद्रमस्त्विति ब्राह्मणाः
प्रतिब्रूयुः॥ यद्वा। व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि॥ सर्वं भवतु मेऽच्छिद्रं यस्य चेच्छन्ति वेदवि
दाः इति प्रतिवचनं। निर्द्धनश्चेत्तीर्थयात्रादिकं कुर्यात्॥ अथ पू॰ प्रायश्चित्तविधेः परिपूर्णता ऽस्तु॥
यस्य स्मृत्या॰ विष्णुं संपूज्य। एतत्प्रायश्चित्तमकृत्वैव यदि पित्रादिर्मृतस्तदा पातकसत्त्वान्निश्चये पुत्रा
दिनेदमवश्यं कार्यं। अनिश्चयेनावश्यकं पुत्रादिना करणे पंचगव्यप्राशनाभावः॥ ॥इति श्रु
त्यर्थप्रायश्चित्तं॥ ॥अथ वैतरणीदानविधिः॥ ॥आचमनं॥ प्राणायामः॥ यथासंभवोपचारे

=पुत्रकर्तृके मम त्वत्र पितुरिति यत्कृत्ये=

विष्णोः पूजनं विधाय गवाद्युपहाराणां प्रोक्षणं कृत्वा अद्येत्यादि· देशकालस्मरणादि कृत्वा पूर्वे
वन्मम एतत्कुलस्य यमद्वारस्थितवैतरण्याख्यानद्युत्तरणार्थं गोदानमहं करिष्ये॥ ब्राह्मणस्य पादप्र
क्षालनं।गां धमाल्या वस्त्रादिभिर्यथाशक्त्यभ्यर्च्य तद्धस्ते शिवा आपः संतु॥ सौमनस्यमस्त्व
क्षतं चारिष्टं चास्त्वायुष्यद्वेषोपेमस्त्वायत्पापं तत्प्रतिहतम·यजमानस्याभिषेकः॥ दीर्घमायुः शांति
पुष्टिस्तुष्टिश्चास्तु॥ सवत्साया अस्या धेनोः पूजनं।कृत्वा वस्त्रस्रक्माल्यसुवर्णशृंगाद्यलंकरणं॥ यथा धे
नुप्रार्थनामंत्रः॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महापथे। उत्तितीर्षुरहं भद्रे वैतरण्यै नमोस्तु ते॥ अ
थ ब्राह्मणप्रार्थनामंत्रः॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन॥ तर्तुं वैतरणीमेनां कृष्णां गां प्रददाम्य
हं॥ इति ब्राह्मणं प्रार्थ्य सहिरण्यं गोपुच्छमादाय॥ अद्येत्यादि· वैतरणीसंतरणार्थमिमां गां सवत्सां कृ
ष्णवस्त्रस्रक्माल्यादिसुवर्णशृंगाद्यलंकृतां गां धपुष्पाद्यर्चितां कांस्यदोहनीताम्रखुरोत्कृष्टपफला ७

वाक्ष र्थं अमुकगोत्रायामुकवेदशाखाध्यायिने अमुकशर्मणे ब्राह्मणाय विष्णुरूपाय तुभ्यमहं संप्रद
दे। प्रतिगृह्णामि स्वस्तीति ब्राह्मणो वदति। दानप्रतिष्ठासिध्यर्थं सुवर्णं दक्षिणां त्वेन दत्वा न मम इत्युक्त्वा वि
प्रहस्ते जलं क्षिपेत्। गोदानमंत्रः। यमद्वारे दक्षिणद्वारे घोरा वैतरणी नदी। सुखेनोत्तारणार्थाय गृहाण
धेनो नमोस्तु ते॥ नमो वैतरणि देवि कृपां कुरु ममोपरि। दुर्गमं चैव यन्मार्गं तरिष्ये त्वत्प्रसादतः। यमद्वारे
महाघोरे कृष्णा वैतरणी नदी॥ तां तर्तुकामो यच्छामि कृष्णां वैतरणीं तु गां॥ उष्णतोय महावेगतप्तां वैत
रणीं नदीं। तर्तुकामस्य यच्छेति कृष्णां वैतरणीं च गां॥ या सा वैतरणी प्रोक्ता पूयशोणितसंयुता॥ तां त
र्तुकामः प्रददे कृष्णां वैतरणीं च गां॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादि
ह लोके परत्र च॥ प्रदक्षिणनमस्कारमंत्र॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये सं
तु गवां मध्ये वसाम्यहं॥ पंच गावः समुत्पन्ना मथ्यमाने महोदधौ॥ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो

नमः

नमः ॥ अनुव्रज्य च तां धेनुं ब्राह्मणेन समन्विता । यथाशक्ति भूयसी दक्षिणा ॥ अद्य पूर्वोच्चरित॰ वैतरणीदा
नं परिपूर्णमस्तु ॥ कृष्णगोरभावे अन्यवर्णापि देया ॥ गोरभावे द्रव्यं देयं ॥ तस्याशक्तौ पुत्रादिर्दद्यात् ॥ त
त्र आद्येमंत्रे । उत्तीर्षुरयमिति पठेत् ॥ द्वितीये तत्तु वैतरणीमस्येति तृतीये तां तर्तुमस्येति ॥ ॥ इति वैत
8 तरणी धेनुदानविधिः ॥ ॥ अथ ऋणधेनुदानं ॥ ॥ अधर्मोदर्चितं पापं सप्तजन्मार्जितं ऋणं ॥ तत्सर्वं
मुक्तिमायातु गामेकां ददतो मम ॥ देवमनुष्यपितॄणां ऋणत्रयविमोचनं ॥ इहलोकेषु यत्किंचिद्दृष्टदण
स्योपशांतये ॥ ॥ अथ पापधेनुदानमंत्रः ॥ ॥ आजन्मोपार्जितं पापं मनोवाक्कायकर्मजं ॥ तत्सर्वं नाश
मायातु गोप्रदानेन केशव ॥ ॥ अथ मोक्षधेनुदानमंत्रः ॥ ॥ मोक्षं देहि हृषीकेश मोक्षं देहि जगत्पते ॥
मोक्षधेनुप्रदानेन मुकुंदः प्रीयतामिति प्रथमं अर्घ्यः ॥ त्वं धेनु सर्वभूतानां कामदा मोक्षदायिनी ॥ गृह
णार्घ्यं मया दत्तं देहि मोक्षं च सुव्रते ॥ ॥ अथ महिषीदानमंत्रः ॥ इंद्रादिलोकपालानां या राज्ञी महिषी ८

स्थुना महिषीदानमाहात्म्यात्तु सास्तु मे वरदा सदा॥ धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः॥ म
हिषासुरस्य जननी या सास्तु वरदा मम॥ ॥अथाऽश्वदानं॥ ॥गंधर्वकुलजातोयं अश्वो देवेंद्रवाह
नः। तस्मादश्वप्रदानेन हयग्रीवः प्रसीदतु॥ ॥अथाष्टमहादानानि॥ ॥तिलालोहं हिरण्यं च क
र्पासं लवणं तथा॥ सप्तधान्यं क्षितिर्गावो महादानानि चाष्टमे॥ ॥प्रथमं तिलदानं॥ ॥तिलाश्वेतास्ति
लाः कृष्णास्तिला गोमूत्रसंनिभाः॥ ते मे हरंतु पापानि शरीरेण कृतानि च॥ इमांस्तिलान्सोमदेवता
न्गांधारचितान्तिलदानफलावाप्त्यर्थं कस्मैचिद्ब्राह्मणाय विष्णुरूपायाहं ददास्ये। एवं सर्वत्र ज्ञेय
॥ ॥ततो लोहदानं॥ ॥यस्मादायसकर्माणि तवाधीनानि नित्यशः। लांगलाद्यायुधादीनि अतः
शांतिं प्रयच्छ मे॥ इदं लोहमग्निदैवतं॥ ॥ततो हिरण्यदानं॥ ॥हिरण्यगर्भगर्भस्थं हेमबीजं विभा
वसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ इदं सुवर्णं अग्निदैवतं॥ ॥ततः कर्पासदानं॥ ॥

येन रक्षेन सीयंते भूर्भुवं स्वरिति क्रमात्॥ ब्रह्माद्याः देवताः सर्वे कार्पासेन तु तोषिताः॥ इदं कार्पासं बृह
स्पतिदैवतं॥ ॥ततो लवणदानं॥ ॥यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना॥ पितॄणां च प्रियं नित्यं
9 तस्मात्स्वर्गप्रदं भवेत्॥ इदं लवणं विष्णुदैवतं॥ ॥ततः सप्तधान्यदानं॥ अन्नं प्रजापतिः साक्षाद
न्नमेव जनार्दनः॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्धते॥ इदं सप्तधान्यं प्रजापतिदैवतं यमदूतानां
प्रीतये॥ ततो भूमिः॥ समुद्रवसना देवी भूतधात्री च वैष्णवी॥ सा मे दहतु पापानि जन्मांतरकृता
न्यपि॥ इमां भूमिं विष्णुदैवतां॥ ततो गोदानं॥ ॥गावो ममाग्रतः संत्विति॥ तिलादिदानेषु हिरण्यं दक्षि
णां पृथक्पृथक्विस्तारेण पृथक्दानकालासंभवे समुद्दितानां संकल्पः॥ इमानि तिलादीन्यष्टौ म
हादानानि नानादैवतानि गंधाद्यर्चितानि सदक्षिणानि तत्तद्दानफलावाप्तये श्रीविष्णोः प्रीतये
नानागोत्रेभ्यो ब्राह्मणेभ्यो नानानामभ्योऽहं संप्रददे। अथवा संप्रददे॥ समभ्यर्च हृषीकेशं पुष्पधू ए

= कांस्येइतिना॰ भट्टाः =

पाद्यैभिस्ततः॥ प्रणिपातैस्तवैः पुष्पैर्ध्यानयोगेन पूजयेत्॥ प्रायश्चित्तधेनुदानमंत्रः॥ माता त्वं स
र्वभूतानामसि त्वं पापनाशिनी। पापार्णवे निमग्नानां समुद्धरन मोस्तु ते॥ श्रीकृष्णस्मरणं॥ सुतिसं
भवेशात्स्नात्रपानिदानानि। ततस्तिलपात्रदानं। यथाशक्तिताम्रपात्रे तिलान् क्षिप्त्वा सुवर्णं चान्न
धेत्यादि जन्मप्रभृति मरणं तं कृत नानाविधपापप्रशमनार्थे तिलपात्रदानमहं करिष्ये॥ विश्वस्य
पादप्रक्षालनं॥ गंधमाल्यादि पूजा यथाशक्ति कृत्वा मम जन्मप्रभृति मरणांतं नानाविधपापप्रश
मनार्थे तिलपात्रं सहिरण्यं अमुक गोत्राय अमुक शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। दानप्रतिष्ठा
सिध्यर्थे दक्षिणा। अथ तिलपात्रदानमंत्रः॥ तिलाः पुण्याः पवित्राश्च तिलाः सर्वकराः स्मृताः। शुक्ला
वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तिलपात्रप्रदाने
न तानि नश्यंतु सर्वदा॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदानेन मम

पापंव्यपोहतु॥ न ममेति विप्रहस्ते जलं क्षिपेत्। पुत्रादिस्तु अस्य पापं व्यपोहतु इति वदेत्। यद्वा। अयं
मंत्रः। यो देवः पितृरूपेण हव्यकव्यभुगव्ययः। तिलपात्रप्रदानेन स मे विष्णुः प्रसीदतु॥ इति दानानंत
रं सोस्य विष्णुः इति पठेत्। एतन्मंत्रपक्षे विष्णुप्रीतिदैकफलत्वेनोल्लिख्य। ततो गंगादौ पुण्यतीर्थे अश्व
त्थसमीपे अथवा धात्रीतुलसीशालिग्रामसमीपे वा। एतेस्थानेष्वन्यगृहे वा गोमयोपलिप्तायां भूमौ
कुशोपरि उपविष्टः तत्र उदक्शिरसं दक्षिणशिरसं वा शायीत। तुलसीमूलमृद्गंगामृत्तिकागोपिचं
दनादि मुखे शिरे कर्णे कंठे गंगोदकं धारयेत्। श्रीपरमेश्वरं स्मरन् पुत्रो अस्य संगे धारितशिरा तिष्ठेत्। अ
येत्यां ०० अमुकस्य अमृतत्वप्राप्तिकामनया पुण्यसूक्तादिपाठमहं करिष्ये। श्रोष्ये वा॥ ईशावास्य
ध्यायं संपूर्णं स्वयं जपेत्। अन्यो वा श्रावयेत्। ईशावास्यमिदं सर्वं अंतकाले सदा पठेत्। जप्त्वा चै
व परं स्थानं अमृतत्वं स गच्छति पद्मपु विधानात्। ततः उपनिषद्भागान्यानि च पुण्यसूक्तानि गीता

स्तोत्राणि च सहस्रनामानि पठेत् शृणुयाद्वा ॥ ओं तु संकल्प्यात्रात्मनो श्रावयिताऽमुकशर्मणोऽमुकस्या

मुकफलप्राप्तयेऽमुकं श्रावयिष्ये इति संकल्पयेत् ॥ श्रीरामादिस्मरणं कार्यं ॥ प्राणोत्क्रमणसमये उ

त्क्रांतधेनुदानं ॥ उत्क्रांतधेनुं दरिद्राय कुटुंबिने श्रोत्रियाय ब्राह्मणाय दद्यात् ॥ मन्त्रदेवतादि ॥ देशकालौ संस्मृ

त्वाऽमुकगोत्रस्यामुकशर्मणोऽसुखेन प्राणोत्क्रमणप्रतिबंधकोक्तनिष्कृत्यनुक्तनिष्कृतिसकलपा

तकक्षयार्थं सुखप्राणोत्क्रमणार्थं यथाशक्त्यालंकृतामिमामुत्क्रांतिधेनुं रुद्रदेवत्याममुकशर्मणेतु

भ्यमहं संप्रददे ॥ गवामंगे ॥ इति मंत्रमुक्त्वा न ममेति दद्यात् ॥ पित्रादेरशक्तौ पुत्रादिर्दद्यात् ॥ स च न

ममेति पदस्थाने पित्रादेरिति वदेदिति विशेषः ॥ धेन्वाभावे प्रत्याम्नायत्वेन द्रव्यं दद्यात् ॥ अथ प्राणो

त्क्रमणानंतरं कर्त्रान्ये च पुत्राः कक्षोपस्थवर्जं न खलोमानि वापयेयुः ॥ कर्तृव्यतिरिक्तानां दशमेऽह्नि

वापनं ॥ यथाचारं कर्तुश्च दशमेऽह्नि नत्वेरि मृते पश्चात् पित्राद्ये दशमेऽह्नि वापनं यथाचारं कार्यं ॥ ततः

कर्त्तावपनानंतरं स्नात्वाऽहते वाससी परिधाय मृतस्य शरीरप्रक्षालनं। अहतवस्त्रपरिधानं। उत्तरीयश्च
चंदनेन सर्वांगप्रोक्षणं। पुष्पैरलंकरणं। दुर्मरणनिमित्तं प्रायश्चित्तं कर्त्तव्यं। कर्त्तापि पापप्रयुक्तो भवति तदा
सोऽपि स्वपापानुसारेण प्रायश्चित्तप्रकरणोक्तं प्रायश्चित्तं कृत्वा मृतस्यौर्ध्वदेहिकं कुर्यात्॥ यदि प्रेतस्या
त्मनश्च शुद्धिमकृत्वा लोभादिना दाहादिकं करोति तत्सर्वं नोपतिष्ठते॥ उभयोर्निश्चयेन नरकप्राप्तिर्भ
वति। अतः प्रायश्चित्तं कृत्वैव सर्वमौर्ध्वदेहिकं कुर्यात्। अथ दुर्मरणनिमित्तप्रायश्चित्तान्युच्यंते।
शृंगी। दंष्ट्री। नखी। शस्त्रघातः। सर्पा। जलेमग्नाकं। ग्राहा। विषभक्षण। अग्निदग्धा। विप्रमारिता। आत्म
घातः। चांडालहस्तेमरण। चौरमारिता। शत्रुमारिता। म्लेच्छादिहता। अकस्मान्मरण। वृक्षारोहण
दि। बंदिग्रह। पाशमरण। विशूचिका। भूतशाकिन्यादिग्रहैर्ग्रस्ता। शाकादिहता। गजदंता। पर्वतारोह
णादि। विकलचित्तभ्रम। विद्युत्पात। पाषाणहता। कुष्टव्याधिकरण। महारोगैः प्रपीडिता। क्षयव्याधि ११

मरणापापान्नपोषितामूत्रपुरीषस्थलक्षौचमरणाऽपस्माररोगादिनागंदराजलोदरागंडमालापां
डुरोगक्षात्यादिन्ननेककुष्ठमरणेकृच्छ्रचांद्रायणद्वयं धेन्वादिदानरूपप्रत्याम्नायपक्षेणप्रायश्चित्तंकृ
त्वाऽथवापंचदशप्राजापत्यान्कृत्वाशक्तौसत्यांगवादितत्प्रत्याम्नायदानेनतदानीमेवशुद्धिंसं
पाद्यदाहंकुर्यात्। एवमूर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टास्पृष्टस्पास्पृश्यस्पृष्टषड्वास्थांस्तरादि· स्थमर
णेदोषः शास्त्रानुसारेणत्रीन्षड्द्वादशपंचदशवाप्राजापत्यान्विशाधनज्ञानपूर्वकंकृत्वातदा
नीमेवतत्प्रत्याम्नायभूतधेन्वादिकंकृत्वाशुद्धिंसंपाद्यदाहादिकंकुर्यात्। तत्रैवंप्रयोगः। अमु
कसगोत्रस्यअमुकस्यसर्पदंष्ट्रमृतस्यसर्पदंष्ट्रमरणजनितपापनिवृत्त्यर्थंदाहाद्यौर्ध्वदेहिकक
र्मयोग्यताप्राप्त्यर्थंचपंचदशानांप्राजापत्यानांप्रत्याम्नायेप्रतिप्राजापत्यंद्वादशद्वादशब्राह्मण
भोजनानिअथवाऽऽमान्नानिसंप्रदास्येनानानागोत्रेभ्योब्राह्मणेभ्यइतिब्राह्मणान्मनसुद्दिश्य

जलमध्ये जलं क्षिपेत्। एवं वैकं वा गां। अथवा प्रतिप्राजापत्यं अयुतगायत्रीजपं। प्राणायामशतद्वयं वा। ती
र्थयात्रापक्षेण चेति प्रयोगः॥ ॥अथ द्वितीयप्रकारः॥ ततः देशकालौ स्मृत्वा पित्रादेरूर्ध्वोच्छिष्टाऽधरो
12 च्छिष्टउभयोच्छिष्टस्पृष्टास्पृष्टमरणखट्वाजनितमरणपापप्रत्यवायपरिहारार्थं पंचदशद्वादशत्री
ण्येककृच्छ्रान् यथाशक्तिप्रायश्चित्तमस्तकप्रत्याम्नायेन सद्यः सूतकांते वा करिष्ये इति संकल्प्य तदैवइ
व्यादिनाऽशक्तौ सूतकांते वा कुर्यात्। कर्त्रोप्यात्मशुद्धौ देशकालस्मरणं कृत्वाऽत्मशुद्धिद्वारा पित्रा
देरौर्ध्वदैहिकाधिकारसिध्यर्थं शास्त्रपा एतावदेव कृच्छ्रत्रयं वा प्रायश्चित्तं करिष्ये इति तदेव सूत
कांते वा कुर्यात्। किंचिद्दुर्मरणं जातं तदा मरणानंतरं चोर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टस्पृष्टास्पृ
ष्टस्पस्पमरणखट्वामरणबंधनमरणादिषु सत्सु त्रीन् षड् द्वादश पंचदश वा कृच्छ्रान् प्रायश्चित्तं
निमित्तानुसारेण ब्राह्मणवचनात् गृहीत्वाऽशक्तौ तदेव प्रत्याम्नायतया हिरण्यादि दत्त्वा शुद्धिं संपाद्य १२

दहनादि कुर्युः। शास्त्रपामन्त्रा पुत्रादयः पित्रादेः पापिनः सर्वात्मनाशुद्धीच्छवः सर्वप्रायश्चित्तेषूक्त
तमं कृत्वा दहनादि कुर्युः। एवं कर्त्रोप्यधिकाराभावे शास्त्राद्दिकृच्छ्ररूपां शुद्धिमात्मनः संकल्पेन
तदैव वा प्रत्याम्नायेन संपाद्य दहनादि कुर्यात्। अन्यथा व्यर्थं भवति सर्वं॥ ॥अथ षट्पिंडाः॥
यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत्॥ मृतस्थाने शवनाम्ना पिंडदानं। ततः श्राद्धकर्त्ता
आचमनं प्राणायामः। कुशोपग्रहः। बद्धशिखः। मृतकस्य दक्षिणपार्श्वे दक्षिणाभिमुखोपविश्य
संकल्प्य। अद्येत्यादि-मासे पक्षे तिथौ अमुकवासरे एवंगुणविशिष्टायां पुण्यतिथौ अपसव्यं
अमुकगोत्रस्य अमुकमृतस्य दाहार्थं उत्क्रांतादि पिंडप्रदानमहं करिष्ये। अवनेजनं। गोत्र अमु
१५
कमृतशवनिमित्तं पिंडस्थाने अवनेजनं मद्दत्तं तवोपतिष्ठतां। दक्षिणाग्रं कुशास्तरणं। पिं
डदानं। गोत्र अमुकमृत उत्क्रांतौ शवनिमित्तं एष पिंडो मद्दत्तस्तवोपतिष्ठतां। प्रत्यवनेज।

नांगोत्रअमुकपिंडप्रत्यवनेजनं मद्दत्तं तवोपतिष्ठतां ।। दास्यमानं माखमिश्रं आमान्नं सजलं गोत्रप्रेत
तेउपतिष्ठतां । दक्षिणसंकल्पः ।। दास्यमानं लोहप्रत्याम्नायमनसोद्दिष्टं दक्षिणं तेउपति । अनेन पिंड
13 दानेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः ।। पिंडोद्धरणं । अथानंतरं चातुर्जाः सजातीयाः ब्राह्मणादय
न्यतरुणमुक्तकेशाः शवं प्रच्छादितमुखं प्राकृशिरसमूर्ध्वमुखं दाहस्थानं प्रतिनयेयुः । ततः यवपिष्ट
घृतकुशातिलमधुक्षीरोदकजलपात्रहारिद्रवस्त्रपालाशपत्रहिरण्यरजकलादि दाहसामग्रीं गृहीत्वा
शवसहितं गृहान्निष्क्रम्य द्वारदेशे पांथनाम्ना पिंडदानं कुर्यात् । शवं भूमौ निधाय पिंडस्थलेउपक्ले
पनां । तत्रावनेजनं । अमुकगोत्र अमुकप्रेत द्वारदेशे पांथनिमित्तं अवनेजनं मद्दत्तं । पिंडदानं गो
त्रप्रेत द्वारदेशे पांथनिमित्तं एषपिंडो मद्दत्तः प्रत्यवनेजनं माषान्नजलकुंभसंकल्पः । लोहनिष्क्र
यदक्षिणसंकल्पः । अनेन पिंडदानेन प्रेतस्य सद्गतिः । उत्तमलोकप्राप्तिः । पिंडोद्धरणं । ततो मन्म २३

अग्निरस्मात्तोनेयः॥

यीस्थालीस्थलौकिकाग्निं गृहीत्वा यवपिष्टादि सर्वं गृहीत्वा श्मशाने गच्छेयुः॥ शवाग्न्योरंतरालेन गंत
व्यं॥ अथ सर्वे बांधवाः॥ अप्रावरणमुक्तकेशाः वृद्धाः पुरःसराः प्रेतमनुगच्छेयुः॥ यदि गृहे मृतस्तर्हि
ब्राह्मणो नगरपश्चिमद्वारेण नेयः॥ क्षत्रियउत्तरेण। वैश्यः पूर्वेण। शूद्रो दक्षिणे। ततः यमसूक्तं च
जपंत अरण्यं श्मशाने गच्छेयुः॥ अप्रेताध्यायो यमसूक्तं। ततः ग्रामश्मशानयोर्मध्ये अर्द्धपथे वि
श्रांतो मृतनाम्ना पिंडदानं। गोत्र प्रेत विश्रांतो मृतनिमित्तं अवनेजनं मद्दत्तं॰। अवनेजनवत्पिंड
दानं। प्रत्यवने। मा खानन्नजलकुंभसंकल्पः॥ लोहदक्षिणा। पिंडोद्धरणं। दाहादेशं गूस्तकयामादाय
यां नैर्ऋते वामध्यो न ततः सर्वतो निम्नो अनावरणे बहुतो षधिश्च तं देशं प्राप्य श्मशानसन्नि
धौ भूमौ शानिः श्वावस्य दक्षिणा शिरस्थापनं। ततश्चितास्थाने वायुनाम्ना पिंडदानं॥ गोत्र प्रेत चि
तास्थाने वायुनिमित्तं अवनेजनं म॰ अवनेजनवत् पिंडदानादि सर्वं पूर्ववत्। ततः सर्वाणि ती

र्थो निमनसा ध्यात्वा शवस्य स्नपनं । पुत्रादीनामपि स्नानं । शवहस्ते साधकनाम्ना पिंडदानं । गोत्र प्रेत
शवहस्ते साधकनिमित्तं अवनेजन -- अवनेजनवत पिंडदानं । प्रत्यवनेजनं । अन्यत्सर्वं पूर्ववत् । त
तः दाहदेशे कंडकादि निःसमूलान्युपास्येत् । दाहस्थले उदकेन सर्वत्र प्रोक्षणं । ततः दक्षिणशि
रां चितां काष्ठैश्चिनुयात् । चितास्थाने पिंडं चितामध्ये प्रक्षेपः । शवहस्ते पिंडं शवहस्ते निधानं ।
अयः पिंडो जले प्रक्षेपः । तस्मिन् चितायां दक्षिणशिरमुत्तानं । प्रेतं निदध्यात् । घृतेनाभ्यंजनं ।
प्रेताच्छादितं वस्त्रं द्विधा कृत्वा एकेन खंडेन प्रेतशरीरमाच्छादयेत् । खंडांतरं च श्मशानवासिनः ।
मर्थं भूमौ निरस्येत् । मुखे हिरण्यं प्रक्षिप्य । उपरि काष्ठपूर्णं । शिरप्रदेशे भूमौ अग्निस्थापनं । अत्रा
पसव्येन दक्षिणाभिमुखेन च सर्वं कार्यं । ततस्तिलाक्षतैः क्रव्यादाग्नये नमः । इति पूजनम् । तस्मिन्न
ग्नौ घृतेन एकाहुतिः । पत्रपुटेन होमः । अत्र मंत्रः । अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः । असौ

स्वर्गाय लोकाय स्वाहा ॥ इदमग्नये न मम । मंत्रे सावित्र्यात्र प्रथमांतं प्रेतनाम वक्तव्यं ॥ स्त्रियामप्यस्य मंत्र
स्यान्ह्रः ॥ स्रुखेत्रूली घृताहुतिः । शततबहूलस्तण्णान्गृहीत्वान्त्र अग्नेः प्रज्वालस्यत्र प्रदक्षिणं परीत्य मंत्र
द्वयेन मुखेन्न अग्निदानं । कृत्वा सुदुःष्करं कर्म जानता वा प्यजानता । मृत्युकालवशं प्राप्तं नरं पंचत्व
मागतं । धर्माधर्मसमायुक्तं लोभमोहसमावृतं ॥ देहेयं सर्वगात्राणि दिव्यान्लोकान्स गच्छतु ॥
ततउत्तराभिमुखो भूत्वा लौकिकप्रेषः । गाढं रोदनं करोति । ततो भिक्षितेरादीपनं । दाहानंतरं गो
त्र प्रेत दाहजनितपीडोपशमनार्थं चितादाहोपशमनार्थं इदमुदकांजलिस्तेउपतिष्ठतां । तेना
स्युपशमनं । तत्र श्मशानवासिदेवानां श्मशानभूमौ पिंडदानं । दक्षिणाभिमुखस्यन्नवनेजनं । गो
त्र प्रेत श्मशानभूमौ अवनेजनं मद्दत्तं । दक्षिणयं कुशास्तरणं । पिंडदानं । गोत्र प्रेत श्मशानवा
सिदेवानां श्मशानभूमौ एष पिंडो मद्दत्तं । प्रत्यवनेजनं । मार्खान्नमिश्रन्त्र्यामान्नेजलाक्तं नसंक

15

लेपः। दास्यमानं माषमिश्रं आमान्नसजलं कुंभमेकं गोत्राय प्रेताय ते उप- दास्यमानं लोहनिष्क्रयपणीं दक्षिणा
मद्दत्तां तवोपतिष्ठतां। अनेन पिंडदानेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः॥ अनेन तनकर्मयोग्यताप्रा
प्तिः पिंडस्य उदके प्रक्षेपः। अतःपरं चतुर्थेह्नि अस्थिसंचयनं कार्यं। अथवा तृतीये। ततः श्मशानभूमौ
जलपूरितघटस्थापनं। हस्ते पाषाणखंडं गृहीत्वा अप्रदक्षिणं चितां भूमिं कृत्वा तूष्णीं घटस्फोटनं। घ
टस्फोटनमित्याचारः। ततः सव्यं कृत्वा पृष्ठतः अनवलोकयं लौकिकनिष्ठपूर्वो स्नानार्थं नद्यादिं गच्छेयुः। त
त्रोदकसमीपे गत्वा परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय उत्तरदानादिनं पुरुषं अपालकं वा। उदकं करि
ष्यामहे इति मंत्रेण उदकं याचेरन्। कुरुध्वं मा चैवं पुनरिति प्रतिवचनं। प्रत्येके पुत्रादयः समानोदका
श्च यथाज्येष्ठमुदकं प्रविश्य एकवस्त्राः अशिखाः प्राचीनावीतिनः सव्यपाणेरनामिकया नद्यादिस्थं
जलं तूष्णीमपनः शोशुचदघमिति दक्षिणाभिमुखा निमज्जंति अंगोद्वर्षणं न कुर्युः। ततः स्तीर

मागत्याचम्यदक्षिणाग्राननुन्नष्ठयुग्मानृजून्कुशान्हस्तयोः कृत्वासतिलमुदकं पाणिभ्यामादाय।
वाग्यतोदक्षिणाभिमुखाः पितृतीर्थेन भूमौ पाषाणे वा एकैकमंजलिं तिस्रो वा निषिंचेयुः। गोत्रप्रेतप
षदाद्यांजलिस्तेउपतिष्ठतां॥ सर्वाःपुनःस्नानं। आचमनं शिखाबंधा उदकादुत्तीर्य स्नानवस्त्रं निष्पी
ड्य परिधाय पश्चादनवलोकयंतोऽग्रगोमुखाः कनिष्ठानामग्रे कृत्वा ग्रामं प्रत्यायांति। दिवामृतेऽ
स्तमयादूर्ध्वं ग्रामं प्रविशंति रात्रौ मृते सूर्योदयानंतरं। अथवा ब्राह्मणानुज्ञया तदानीमेव प्रविशं
ति। रात्रौ मृतानां रात्रावेव दाहाः। ततो गृहद्वारसमीपे आगत्य निंबपत्रं दंतैर्विदश्याचम्याग्निं स्पृष्ट्वा
पादेन पाषाणमाक्रम्य गृहं प्रविशंति। गाढं रोदनं करोति। अथ पुत्रादीनां नियमः। ब्रह्मचारिणः।
अधःशायिनः। अपंक्तिपवेशिनः। परस्परमसंस्पृष्टाः। दानाध्ययनवर्जिताः। मलिनादीना अधोमु
खाः। सर्वभोगवर्जिताः। असंगवाहनं केशसमार्जनं। वाकुर्वंतो न किंचन कर्म कुर्युः। खड्गादिपाण

16

यः। अशक्या त्रिरात्रं एकरात्रं वा उपवसेयुः। अशक्तौ एकान्नं व्रीहियवादि क्षारलवणमाषान्नापूपप
यसवर्जितं एकवारं शीतलजलधावादिनीत्यये दिवैवाल्पमश्नीयुः। न रात्रौ। भोजनकाले भोजना
दन्नात् भक्तमुष्टीमादाय प्रेतस्य नामगोत्रमुच्चार्य प्रेतोद्देशेन भूमौ क्षिपेत्। त्रिरात्रपर्यंतं सपिंडा
नां एते नियमा भवंति। इच्छया प्रथमादि दशाहपर्यंतं कुटुंबैः सह भोजनं। मलायुतनिपाते द्वादश
रात्रमेते नियमा भवंति। इच्छया प्रथमतृतीयपंचमसप्तमनवमदिनेषु ज्ञातिभिः सह भोजनं। ए
ष्वेव दिनेषु सर्वे सपिंडाः स्नानपूर्वकं प्रथमदिनवदुदकांजलिदानं। कुर्युः। पुत्रादिस्तु प्रतिदिनं आद
शाहात् दशरात्रं प्रेतोपकारार्थं अहर्निशमखंडदीपज्वालनं कुर्युः। ततो देवतायतने नदीतीरे
अन्यतीर्थे अरण्ये वा यत्रेच्छा भवति। तत्र प्रेतस्य मूर्ध्नो निष्पत्त्यर्थे पिंडदानं कुर्यात्। न्यूनेऽपि दृष्टपुरः
सरा गच्छंति। कनिष्टपूर्वा अनपेक्षमाणाश्च प्रत्यागच्छंति। अथ सर्पोस्तमयादूर्ध्वं रात्रौ अंतरिक्षे सी १६

रोदकदानं। ततो रात्रौ त्रिकाष्ठिकायां शिक्याद्दौ वा एकस्मिन्नपक्वे मृन्मये पात्रे उदकं द्वितीये क्षीरं
च कृत्वा चत्वरैकपार्श्वे वा आकाशे स्थापनं। तत्र प्रयोगः। अद्येत्यादि एवं-तिथौ अपसव्यं दक्षि
णामुखमुपविश्य गोत्रस्य अमुकप्रेतस्य आप्यायनार्थं तापोपशमनार्थं चाकाशे मृन्मये पा
त्रे क्षीरोदकयोर्निधानमहं करिष्ये। ततमंत्रः। श्मशानानलदग्धोसि परित्यक्तोसि बांधवैः। इदं नी
रमिदं क्षीरमत्र स्नाहि इदं पिब। अमुकगोत्र अमुकप्रेत अनेन जलेन स्नाहि गोत्र अमुकप्रेत अत्र क्षीरं
पिब। अनेन आकाशे मृन्मये पात्रे क्षीरोदकनिधानेन गोत्रस्य प्रेतस्य तापोपशांतिः प्रेताप्यायन
मस्त्विमवंतोभुवंतु। ततो गृहागमनं। एतत क्षीरोदकनिधानमेकाहं वा दिनत्रयं वा दशाहं वा या
वत्सूतकं पत्यहं रात्रौ कर्तव्यं। रात्रौ वा त्रिरात्रं रात्रौ षे वा। इति दाहप्रकरणं॥ ॥अथाहिताग्नेर्मर
णसमयात्प्रारभ्य दहनकर्म लिख्यते। तद्यथा। अथ शुक्लपक्षे सायंहोमानंतरं रात्रौ यजमानस्य

मरणशंकायांतद्दैवाग्निंविहृत्यप्रातर्होमःकार्यः।अत्रहोमद्रव्याहरणानंतरंतस्योन्नयनात्प्राक्य
जमानमरणेगार्हपत्येहोमद्रव्यंप्रक्षिप्यदहेत्।उन्नयनादूर्ध्वंप्राग्घोमादाहवनीयेतद्दहेत्।एवंकृ
17 तेयदिप्रातःकालपर्यंतंजीवतितदास्वकालेपुनःप्रातर्होमोनभवत्येव।कृष्णपक्षेरात्रौमृतिसंका
चेत्प्रातराहुतिंपृथग्घुत्वातद्दिनादारभ्यामावास्येष्टिपर्यंतानांसायंप्रातर्होमानांतंत्रेणानुष्ठा
नंकुर्यात्।ततःपिंडपितृयज्ञवर्जितामावास्येष्टिंकुर्यात्।तत्रहोमेष्टिपश्वादौअनुष्ठीयमाने
अन्वारंभापत्नीयजमानकर्तृककर्मलोपेनदोषः।सफलेप्यसंभवेआज्यसंस्कृत्यचतुर्गृहीतेनपुरो
नुवाक्यायाज्याभ्यांप्रधानदेवतानांयागानुष्ठानं।तस्याप्यसंभवेप्रतिप्रधानयागंपूर्णाहुतिंजुहु
यात्।अग्नयेस्वाहा।अग्नीषोमाभ्यांस्वाहा।इंद्रायस्वाहेतिस्यात्।अत्राप्यशक्याजनः।असान्नाय्ययाजि
नस्त्वग्नयेविष्णवेइंद्राग्निभ्यामिति।ततःसकलपश्वादिकर्मकार्यंसकलासंभवेप्रधानदेव १७

तानामाज्याहुतिः। एवं कृते यदि अमावास्यापर्यंतं जीवति तदा न प्रतिदिनं सायं प्रातर्होमः। अमावा
स्यायाम अपराह्णे केवलं दक्षिणाग्निमुद्धृत्य पिंडपितृयज्ञः कार्यः। नाग्न्यन्वाधानं न व्रतासनं —ामावा
स्येष्टिः। कृत्वा असकलेष्टौ क्रियमाणायां हविर्ग्रहणानंतरं प्रागासादनान्मरणे हविषां गार्हपत्ये प्र
क्षेपः। अ— दनाद् ऊर्ध्वं मरणे आहवनीये दाहो हविषां तत्र मंत्रः। याभ्यो गृहीतानि ताभ्यः स्वाहेति। तो
वैनान्याहवनीये स— हुतिं कुर्यादिति आश्वलायन ब्राह्मणे। केचित्तु कल्पद्वेधीयमाणस्या मा
वास्येष्टिमेव कुर्वंति। न तत्पर्यंतं — — मः। एवमेवारब्धानां चातुर्मास्यादीनां समापनं। तत्र वैश्वदेव
पर्वणि कृते अन्यत्पर्व पर्यंतं समाप्य विधानेन यथाकालं पक्षहोमं पक्षांते इष्टिं च कृत्वा पुनः पक्षहोमं
पक्षांते इष्टिं पुनरप्येवं। पुनरप्येवं वरुणप्रघास पर्यंतं कृत्वा वरुणप्रघासाः कार्याः। ततो मास
चतुष्टय संबंधिपक्षहोम पक्षांतेष्टीः कृत्वा साकमेधाख्यं पर्व कृत्वा तदानीमेव शुनासीरीयं कुर्या

त्वा। सयत्रैव साकमेधीयं तत्रैतत्स्नुनासीर्येन यजेतेति श्रुतेः। अत्रापि पक्ष—मध्यादेः संन्नषे वरुणप्र
साद्येकृतं त्रैण कुर्यात्। तादृशस्याप्यसंनवे चउत्संस्कृत्य परिस्तरणं समिदाधानं कृत्वा चतुर्गृहीतैः पु
18 रोनुवाक्यायाज्याभ्यां सर्वानूप्रधानयागान्कुर्यात्। तद्दसंनवे प्रतिदेवतमनुष्णे स्वाहेति जुहुयात्। अन्तरा
मरणे दर्शवद्धविषां प्रतिपत्तिः। एवमेव पशुसोमयागादावन्तरामरणशंकायां यथासंनव—रध्वस्य
समापनं कर्तव्यं। पशुत्वाने तद्दैवत्यं पुरोडाशं वा आमिक्षां वा पूर्णाहुतिं कुर्यात्। अनुस्य समाप्ते कर्मणि
मर—तेतदन्तमेव कर्म भवति सर्वत्र। ततो दुर्बलावस्थं यजमानं संभावितसन्निकृष्टमरणं ज्ञा
त्वा गोमयेन गोमूत्रेण च तीर्थोदकेन कुशोदकेन च स्नापयित्वा शुद्धे वाससी परिधाप्य गोमयेनोपलि
प्तायां वेद्यां दक्षिणाग्रान्दर्भानास्तीर्य बहुधां स्तिलान्विकीर्य च तत्र प्राक्शिरसमुदक्शिरसं दक्षि
णशिरसं वा भूमौ निवेशयेत्। तत्र विष्णुपूजनपूर्वकं चेतरणादिदानं। स्वयं दानाशक्तौ पुत्रादिर्दत्वा १८

तस्यश्रेयोर्थात्। ततोगतप्राणंज्ञात्वापुत्रादिस्नात्वावपनंपुनःस्नानंशुद्धेवाससीपरिधायत्रि
खांबध्नामृतस्यशरीरप्रक्षालनं। अहतवस्त्रपरीधानं। उत्तरीयस्यच। चंदनेनसर्वांगलेपनंपु
ष्पैरलंकरणं। कुमेरणप्रायश्चित्तंकर्त्तव्यं। ततउरवाधिश्रयणादिदाहंकुर्यात्। तत्रैवंकृतापसव्यः।
अत्रापसव्येनदक्षिणाभिमुखेनचसर्वंकार्यं। आहवनीयदक्षिणाग्निस्थानेसकृत्सकृत्परिसमूहना
दिसंस्कारपूर्वकंदाहार्थेसंतापजाग्न्युत्पादनार्थंआहवनीयदक्षिणाग्नीविहिरति। तत्रवज्रोपग्र
हेणप्रैषःकार्यः। तिस्रएवस्थालीरैखैवेदूतिप्रैषः। ततःसंतापाग्न्युत्पादनार्थंगार्हपत्याहवनीयद
क्षिणाग्निषुतिस्रोमृन्मयीस्थालीश्चकगोमयचूर्णयुक्ताअधिश्रयति। सत्यावसथ्ययोर्नोधिश्रपणं
तोहिपत्याऽस्यावेवस्थात्मा। कृत्वानीयेति। सर्वासुस्थालीषुचिद्धकरणं॥ ॥अथषट्पिंडाः॥ ॥ततः
मरस्थानेशवनाम्नापिंडदानं। तत्रायंप्रकारः। आचमनंतूष्णींप्राणानायम्यकुशोपग्रहः। शव

समीपेदक्षिणाभिमुखःउपविश्यअद्येत्यादि० अप० गोत्रस्यप्रेतस्यदाहार्थेउत्क्रांतादिपिंडदानमहंकरि
ष्ये।अवनेजनं० गोत्रप्रेतउत्क्रांतौश्राद्धनामपिंडस्थानेअवनेजनंमद्दत्तं० दक्षिणाग्रंकुशास्तरणं।पि
डदानं।गोत्रअमुकप्रेतउत्क्रांतौश्राद्धनामएषपिंडोमद्दत्तः० प्रत्यवने० माषान्नसजलकुंभसंकल्पः।
लोहनिष्क्रयदक्षिणासंकल्पः।अनेनपिंडदानेन।प्रेतस्यसद्गतिविनाशःविनाशः।उत्तमलोकप्रा
प्तिः।पिंडोद्धरणं।एवंद्वारदेशेपांथनाम्नापिंडदानं।अवनेजनंपूर्ववत्।गोत्रप्रेतद्वारदेशेपांथा
नामएषपिंडोमद्दत्तस्तवोपतिष्ठतां।प्रत्यवनेजनं।माषजललोहदक्षिणा।पिंडविसर्जनं।ततो
मृन्मयीस्थालीस्थपंचाग्निसहितंसर्वाणियज्ञपात्राणिषट्पदाज्यदर्भान्तिलान्घृतयवपिष्ट
द्योदकजलपात्रपलाशपात्रशूर्पैकृष्णाजिनसप्तहिरण्यशाकलानिसमिधवर्हिस्रुक्स्रुवगोमयज्ञ
त्पादिकाष्ठसामग्रीनिमित्तंद्रव्यंगृहात्वाहारिद्रावस्त्रेणशावंप्रच्छादितमुखंप्राक्शिरमूर्ध्वमु

स्वगृहान्निष्क्रम्य दाहादेशं प्रतिनयेयुः। स्मार्त्तोग्निः श्रौताग्नयः शावाग्ने अन्येन वानेतव्याः। प्रेताग्निमध्ये
न गन्तव्यं। यमगाथां गायमाना यमसूक्तं जपंत इत्येके आहुः। अहरहर्नीयमानो गामश्वं पुरुषं जग
द्वैवस्वतो न तृप्यति सुरयाइव दुर्मतिरिति यमगाथाः। पुनः अपेताद्यायो यमसूक्तं। परेयिवांसमि
ति षोडशर्चं च सूक्तं बह्वृचानां प्रसिद्धं। ततः ग्रामश्मशानयोर्मध्ये अर्द्धपथे विश्रान्तो मृतनाम्ना पि
ण्डदानं अवने॰ कुशास्तर॰ पिंडदानं। अन्यत्सर्वं पूर्ववत्। पिंडोद्धरणं। सावित्रीतीर्थानि मनसा
ध्यात्वा शवस्नपनं। शवहस्ते साधकानाम्ना पिंडदानं। अन्यत्सर्वं पू॰ पिंडोद्ध॰ सव्यं। आचमनं। पु
नः कुशोपय॰ चितास्थाने अग्न्यागारकरणं। सर्वे प्राचीनावीति दक्षिणामुखः कुर्यात्। अपसव्यं
गार्हपत्याहवनीयदक्षिणाग्नीस्थानेषु सकृत्सकृत् भूसंस्कारान् कृत्वा गार्हपत्याहवनीयदक्षिणा
ग्नीनां स्थापनं। सभ्यावसथ्योरुत्तरतः सप्तसु प्रक्रमेषु स्थापनं। ईशान्यां वा पंचसु प्रक्रमेषु। गार्हप

त्याहवनीयोत्तरादेशे प्रागायतां चितिं काष्ठैश्चिनुयात्। ततः चितौ प्राग्ग्रीवं तत्त्वरलोमकृष्णाजिनमास्ती
र्य। तस्मिन्प्राक्शिरसमुत्तानप्रेतं निदध्यात्। घृतेनाभ्यंजनं। ततो प्रेताच्छादितं वस्त्रं त्रिभिर्नागैः शिर
प्रभृतिपादांगुलीपर्यंतं पादतलपर्यंतं प्राक्शिरं समासाद्य चतुर्थेनांगं तस्य छित्वा श्मशानभूमौ नि
रस्येत्। मुखे नासिकयोः रन्ध्रयोः कर्णयोश्चैकैकं हिरण्यशकलस्य प्रक्षेपः। हिरण्यशकलानामभावे आ
ज्यबिंदून्॥ ॥अथ पात्रप्रतिपत्तिः॥ ॥ततः प्राग्ग्रीवाणामुत्तानानां पात्राणां सादनं। सव्ये पाणौ रिक्तं
प्रागग्रमुपभृतं। हृदये प्रागग्रां ध्रुवां रिक्तां। मुखे प्रागग्रमग्निहोत्रहवणीं। दक्षिणनासिकायां वैकंक
तस्रुवं प्रागग्रमुत्तानां कर्णयोः प्राशित्रहरणे। शिरसि रिक्तं प्रणीताप्रणयनं च समुत्तानं प्रागग्रं। क
पालान्यपि विकल्पेन शिरसि। विकल्पेनाप्सु। पार्श्वयोः शूर्पे। एकमेष्टिकं। द्वितीयं वरुणप्रघासिकं। प्र
तिप्रस्थातुर्मैष्यार्थे यवग्रहणादाभ्रुपसृतं। लौकिकमेवेति केचित्। एकं चेद्द्विधाकृत्वा पार्श्वयोः स्वं

डमासादयेत्। उदरे दृषदाउपवतीमिडां प्रागग्रां। त्रिश्च समीपे शम्यां प्रागग्रां। अंडयोः समीपे अरणी
मुदगग्रे। तत्समीपे अघोमुखमुलूखलमुसलं च। आज्यस्थालीउपवेषषडवत्ता। त्रिशृता वेदान पुरो
डाशपात्री पीगपूणपात्रकूर्चं प्रमुखानि सर्वाणि यज्ञपात्राणि उर्द्वोर्मध्ये सादयेत्। स्मार्त्तपात्राण
मपि अरणिसहितान्यामूर्वोर्मध्ये सादनं। वरुणपाद्यासिकानां च मृन्मयानां स्थालीपाककपालादीनां
पात्राणामश्ममयानां च दृषदादीनामप्सु प्रक्षेपो वा। लोहमयानां चाग्नौ वेदीकपट्टिकाकीलका
दीनां ब्राह्मणाय दानं। अप्सु प्रक्षेपो वा। ततो दक्षिणाभिमुखः। गार्हपत्य आज्यसंस्कृत्य। निरूप्याज्यं गा
र्हपत्ये धिश्रपणं। स्रुक्स्रुवं संमृज्य। खादिरस्रुवः। जुहूस्रुकू आज्यमुद्वासोत्पूयावेक्ष्य जुह्वां स
कृद्गृहीतग्रहणं। उपरि समिधं धारयन् आहवनीये परिस्तीर्ये समिधमाधाय अस्मात्वमधि मंत्रे
ण एकाहुतिं जुहोति। अस्मात्वमधिजातोसि त्वदयं जायतां पुनः॥ असौ स्वर्गाय लोकाय स्वाहा।

इदमन्नयो।ततोजुह्वांघृतेनपूरयित्वाप्रेतस्यदक्षिणहस्तेप्रग्रासादयति।खादिरंस्रुवंसव्यनासिकायां
उत्तानं।सस्रुवंदक्षिणहस्ते।पात्रविशेषादन्यस्यास्यांकवीरंतरैवप्रक्षेपः।मृन्मयीचेत्स्रुक्प्रक्षेपोवा।चितौपरि
काष्ठपूरणं।तदुपरिदक्षिणाग्रैर्बर्हिराच्छादनं।ततः आहवनीयादन्यमंत्रपाठः।कृत्वासुदुष्करंकर्मजानतावा
प्यजानता।मृत्युकालवशंप्राप्तंनरंपंचत्वमागतं।धर्माधर्मसमायुक्तंलोभमोहसमावृतं।दहेयंसर्वगात्राणि
दिव्यान्लोकान्सगच्छतु।ततस्तिलाक्षतैरग्नीनांपूजनं।तत्रमंत्रः।त्वंभूतकृज्जगद्योनेत्वंलोकपरिपालकः।उ
क्तःसंस्कारकस्तस्मादेनंस्वर्गंनय।ततोऽग्निभिश्चितेरादीपनं।ततःस्कंधेउदकपूर्णंकुंभंकृत्वातेनप्रादेत
पादप्रदेशात्आरभ्यचितिंपरितःअप्रदक्षिणंधारांदद्यात्।ततउत्तराभिमुखोभूत्वालौकिकंघोषःगाढं
रोदनंकरोति।दाहानंतरंसर्वेऽप्यनग्निकवत्।इत्याहिताग्नेर्दाहविधिः॥ ॥अथावसथ्याग्निकानांमरणसम
यादारभ्यदाहांतंकर्मलिख्यते।तत्रशुक्लपक्षेसायंहोमानंतरंरात्रौमरणशंकायांआवसथ्याग्नेःपातर्हि

पक्षे रात्रौ

मः कार्यः। एवं कृते यदि प्रातःकालपर्यंतं जीवति तदा प्रातर्होमो न भवत्येव। आहिताग्नेर्मरणे शंका चेत् प्रातरा
हुतिं कृत्वा। तद्दिनादारभ्य अमावास्यापर्यंतानां सायंप्रातर्होमानां तंत्रेणानुष्ठानं कार्यं। ततः पिंडपितृयज्ञ
वर्जितममावास्याप्रतिपद्दिनसंबंधिसकलं पक्षादिकमकार्यं। एवं कृते यदि अमावास्यापर्यंतं जीवति त
दा प्रोन्नेति दिनं सायंप्रातर्होमः। अमावास्यायामपराह्णे पिंडपितृयज्ञं कार्यः। असमाप्ते कर्मणि मरणे जाते
तदंतमेव कर्म भवति सर्वत्र। ततो दर्भेषु स्थं यजमानं संभावितसन्निकृष्टमरणं ज्ञात्वा ततो गोमये
न गोमूत्रेण च तीर्थोदकेन च स्नापयित्वा शुद्धे वाससी परिधाप्य गोमयेनोपलिप्तायां भूमौ दक्षिणाग्रान्
दर्भानास्तीर्य बहुलांस्तिलान्विकीर्य तत्र उदकशिरसं दक्षिणशिरसं वा निवेशयेत्। तत्र विष्णुपूजन
पूर्वकं वैतरण्यादिदानं स्वयं दानाशक्तौ पुत्रादिर्दत्वा तस्य श्रेयो दद्यात्। तत उपनिषदादिश्रुणस्कौ
निश्रापयेत्। गते प्राणे ज्ञात्वा पुत्रादेः स्नानं। वपनं पुनः स्नानं मृतस्य शरीरप्रक्षालनं। अहतवस्त्रं परि

22

धाप्य। उत्तरीयस्य चार्चंदनपुष्पैरलंकरणं। दुर्मरणनिमित्तं प्रायश्चित्तं। कर्त्तव्यं॥ ॥अथ षट् पिंडाः॥ ॥मृतस्था
ने शवनाम्ना पिंडदानं पूर्ववत्। द्वारदेशे पांथनाम्ना पिंडदानं पूर्ववत्। ततश्चावसथ्याग्निसहितमरणिप्रमुखा
नि सर्वाणि यज्ञपात्राणि शूर्पकृष्णाजिनकुशाघृततिलहिरण्यशकलादीन् गृहीत्वा शवसहितगृहान्निष्क्रम्य
यमसूक्तं जपंतः अरण्यं श्मशानं गच्छेयुः। अपेताधायो यमसूक्तं। ग्रामश्मशानयोर्मध्ये विश्रांतौ भूतनाम्ना
पिंडदानं। ततः श्मशानभूमौ शवस्य स्थापनं। ततश्चितास्थाने वासुनाम्ना पिंडदानं सर्वं प्रागवत्। ततः स
र्वाणि तीर्थानि मनसा ध्यात्वा शवस्य स्नपनं। ततः शवहस्ते साधकनाम्ना पिंडदानं। ततः दक्षिणशिरां चितं
काष्ठे क्षिपेद्यात्। पिंडप्रतिपत्तिः प्रागवत्। ततः चितौ दक्षिणाग्रमुत्तरलोमं कृष्णाजिनमास्तीर्य तस्मि
न् दक्षिणशिरं उत्तानं प्रेतं निदध्यात्। आज्येनाभ्यंजनं। प्रेताच्छादितवस्त्रविनियोगं प्रागुक्तवत्। मुखे हिरण्य
शकलं प्रक्षिप्य॥ ॥अथ पात्रप्रतिपत्तिः॥ शिरसि प्रणीताप्रागग्रां। शूर्पं द्विधा कृत्वा पार्श्वयोः एकैकं खं

डमासादयेत्। अग्निं उभयोः समीपे अरणीमुदगग्रे तत्समीपे अधोमुखं उलूखलमुसलं च। उपवेषं वज्रं दक्षि
णहस्ते प्रागग्रं। सव्यहस्ते प्रोक्षणीपात्रं प्रागग्रं। लोहमयानां पूर्ववत्। ततः शिरप्रदेशे भूमौ अग्न्याग
रकरणं। तत्रापसव्यं दक्षिणामुखः सकृत्सकृन्मृतसंस्कारः। आवसथाग्निस्थापनं। आज्यसंस्का
रः। निरूप्याज्यमधिश्रित्य पर्यग्निकुर्यात्। स्रुवं प्रतप्य। कुशैः संमृज्योदकेनाभ्युक्ष्य पुनः प्रतप्य निद
ध्यात्। आज्यमुद्वास्य कुशेनोत्पूयावेक्ष्य सव्यहस्ते कुशान्गृहीत्वा दक्षिणहस्ते स्रुवेणाज्यं गृहीत्वा
सव्यं जान्वाच्य। वामहस्तेन हृदयं स्पृष्ट्वा एकाहुतिहोमः। मंत्रेण अस्मात्त्वमधिजातोऽसि त्वदयं जाय
तां पुनः। अमुकप्रेताय स्वर्गाय लोकाय स्वाहा। स्त्रियां मंत्रस्य ऊहः। इदं स्वर्गाय लोकाय इति शवमुखे
त्यागः। दक्षिणनासिकायां स्रुवं दक्षिणाग्रं उत्तानं निधाय। उपरि काष्ठपूरणं। तदुपरि दक्षिणाग्रैर्ब
र्हिराच्छादनं। ततस्तिलाक्षतैर्वह्निपूजा। स्वं भूतकृज्जगद्योने त्वं लोकपरिपालक। उक्तः संस्कारक

स्तस्मात्त्वमेनं स्वर्गं गमय तं मया। अतः परं वह्नेस्तत्र पूर्वं हि प्रहीणा अग्नेः प्रज्वाल्य प्रदक्षिणं परीत्य मंत्रद्वयेन मुखे
अग्निदानं कुर्यात्। कृत्वा सुदुष्करं कर्म जानता वा प्यजानता। मृत्युकालवशं ज्ञात्वा नरं पंचत्वमागतं। धर्मा
23 धर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु। इति अग्निदानं। ततः
श्रणाभिमुख उपविश्य लौकिकपैषाणां रोदनं। अर्धदग्धे तथा देहे स्याद्दाज्याहुतीततः। दाहानंत
रं दाहान्त्ये सोमश्मशानवासी देवानां पिंडदानं॥ ॥इत्याविस्थ्याग्निसंबंधदाहविधिः॥ ॥अथ सर्वपूर्व
वदा आहिताग्नेरपि पूर्वं स्मार्तपात्रप्रतिपत्तिं कृत्वा पश्चाच्छ्रौतपात्रप्रतिपत्तिर्भवतीति कर्मप्रदीपे आश्वलायन
वचनोक्तमस्ति तदपि युक्ततरं॥ ॥इति श्रौतस्मार्तयोनिरग्निकस्य मरणसमयादारभ्य दाहांतपर्यंतं क
र्मसमाप्तिः॥ ॥अथानंतरं उच्छिन्नगेहे द्विहार्थे मृताधानं लिख्यते। तत्रापसव्येन दक्षिणाभिमुखमुखेन च
सर्वकार्यं। आचमनं। प्राणायामः। अद्येत्यादि एवं गुणविशिष्टायां पुण्यतिथौ अपसव्यं गोत्रस्य अमुकमृत २३

स्यउच्छिन्नाग्नेर्दाहार्थं मृताधानमहं करिष्ये। अरण्योरुपरि दक्षिणं प्रेतपाणिं कृत्वा अयं त इति समारोपमं
त्रं पुत्रादिर्जपेत्। अयं ते योनिर्ऋत्वि॰ रयिम्॰ स्वरत्रय संस्काराः। गार्हपत्यस्य पश्चाद्द्येस्याग्निं अयोऽनुद्ध
तो इति मंत्रेण मथित्वा गार्हपत्यस्य स्थापनं। येस्या अयोऽनुद्धतो मांसकामाः संकल्पयंते यजमानमांस
ज्ञायं तु ते हविषे स्वादनाय ते स्वर्गलोकमिमं प्रेतं नयंतु। इति मंथनमंत्रः। गार्हपत्यादाहवनीयदक्षि
णाग्न्योरुद्धरणं। गार्हपत्ये आज्यसंस्कृत्य स्रुचि द्वादशगृहितं गृहीत्वा समित्पूर्वकमाहवनीये तत् हु
त्वा उषाधिश्रयणादिदाहं कुर्यात्। उच्छिन्नाग्नेः अरणिसंज्ञाचेदेवं। अरण्योरभावे चान्ये अरणी आनी
य अरण्योरुपरि दक्षिणं प्रेतपाणिं कृत्वा अयं त इति समारोपमंत्रं पुत्रादिर्जपेत्। येस्या अयं इति मंत्रे
णाग्निमंथनं। गार्हपत्यस्थापनं। आहवनीयदक्षिणाग्न्योरुद्धरणं। तिस्र एव स्थालीरै ष्टवे इति प्रेषः॥
तत उषाधिश्रयणादिदाहं कुर्यात्। इत्यग्निहोत्रिणः मृताधानं॥ ॥अथ स्मार्त्तमृताधानं॥ पूर्ववत्सं

24

कल्पः। स्वरसंस्कारः। समारोपमंत्रमंथनमंत्रादि पूर्ववत्। मथित्वा स्थापनं। आज्यसंस्कृतस्रुवेण स्रुचि द्वि
स्त्रा गृहीं गृहीत्वा उपरि समित्पूर्वकं जुहोतीति तत्र मंत्रः। ॐ पावा रोहजातवेद इमं प्रेतं स्वर्गाय लोकाय नय
प्रेताहुतिं वा स्य जुष स्व स्वाहा। अयमेदं न मम। इति आपस्तंबशाखीयमंत्रः॥ ॥इति स्मार्त्तधानं
॥ ॥यदि विच्छिन्नाग्निस्तर्हि यतो विच्छेदस्तत्कालगणनया अग्निविच्छेदप्रायश्चित्तं तदैव कुर्यात्। सं
कल्पयेद्वा। तत्र च नास्तिक्यादग्नित्यागे मासद्वयं कार्यं। मासचतुष्टयेति कृच्छ्रः। षण्मासोर्द्ध्वं वा द्वादि
कं। संवत्सरादूर्ध्वं त्रैमासिकं। आलस्यादिनाग्नित्यागे द्वादशाहातिक्रमे त्र्यहमुपवासः। मासाति
तिक्रमे द्वादशाहमुपवासः। संवत्सरातिक्रमे मासोपवासः। पयोभक्षणं वा। प्रमादादग्नित्यागे अ
त्रिरात्रं द्वादशाहलघुप्राणायामः। आषडहाच्चतुर्विंशतिः। आद्वादशाहात्पंचाशत्। आत्रिंशत्याह
स्रुतं। आमासादुपवासः। आषण्मासात्त्रिरात्रं। संवत्सरात्कार्यं। अतःपरं प्रत्यब्दं कार्यं। संवत्सरो

र्ध्वमग्नित्यागे चांद्रं। द्विवर्षत्यागे चांद्रं सोमपानं च। चांद्रद्वयं वा त्रिवर्षत्यागे कृच्छ्राब्दं। गोदानं चेत्यादि। अत्र
त्र पत्न्याम्नायाः कल्प्याः। यावत्कालविच्छेदस्तावदाहुतिपरिमितं होम्यद्रव्यं च दद्यात्। ततः प्राणाया
मो मंत्रकः। एवं सर्वेषु तत्कृत्येषु सर्वं प्रेतकृत्यं प्राचीनावीतिना कार्यं दक्षिणापवर्गं च॥ ॥अथ रात्रौ दा
हादिनिर्णयो देवज्ञानीये॥ रात्रौ वा रात्रिशेषे वा म्रियंते द्विजातयः। दाहं कृत्वा यथान्यायं द्वौ पिंडौ निर्वे
स्नुतः। निगमः। संध्यायां वा तथा रात्रौ दाहः पाथेयकर्म च। नवश्राद्धं च नो कुर्यात्। कृतं निःफलतां
व्रजेत्। रात्रिमृतस्य रात्रावेव दाहः। पेवं नंतु प्रातः। तथा च स्मृतिसंग्रहे। रात्रौ दग्ध्वा तु पिंडांतं कृत्वा
वपनवर्जितां। वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रिया॥ निगमवचस्तु दिनमृतस्याऽहस्यादिना रा
त्रिदाहनिषेधार्थं। तथा च शांबं रात्र्युषितं चेत्त्रीन्कृच्छ्रान्कृत्वा दहेत्सुत इति स्मृतिरत्नावल्यां। द
र्शाहांतर्दर्शपाते भविष्यपुराणे। प्रवृत्ताशौचतंत्रस्तु यदि दर्शः प्रपद्यते। समाप्य चोदकं पिंडान्

25

स्नानमात्रं समाचरेत्। मातापितृविषये तु गौतमः। अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत्। पित्रोस्तु प
वदा श्राद्धं दद्यात् पिंडं तिलांजलीन्। पित्रोरित्येकशेषः। यत्तु गालवः। पित्रोराशौचमध्ये यदि दर्शः स
मापयेत्। तावदेवोत्तरं तंत्रं पर्येवस्यमहात्परं। इति तदौरसपुत्रो यदा करोति तद्विषयं चेति परिज्ञाते
अहानंतरं दर्शे मातापितृतंत्रस्यापि समाप्तिर्न तु अहमध्ये दर्शपाते तद्विषयमेव गौतमवचनं। अन्ये
षां तु यदा कदाचिद्दशाहमध्ये दर्शपाते तंत्रसमाप्तिरिति। अंतर्दशाहे दर्शश्चेद्यदि स्यात्सर्ववर्णिनां
समाप्तिः प्रेततंत्रेण कुर्यात्पित्रोस्तु नैव सा। पितृमातृव्यतिरिक्तायां दर्शपाते दशाहं समापनीयं। अ
थानंतरं प्रथमदिनादारभ्य दशाहपर्यंतं कर्मोच्यते। देवतायतने नदीतीरे अन्यतीर्थे वा अरण्ये वा
यत्रेच्छा भवति। तत्र प्रेतस्य मूर्ध्नि निमित्तार्थे पिंडदानं कुर्युः। तदर्थे च नोष्ट पुरःसराः। [illegible]ग च्छंति कनि
ष्ठापूर्वा अनपेक्षमाणाश्च प्रत्यागच्छंति। तत्रादौ नवश्राद्धं॥ ॥अथ नवश्राद्धविधिरुच्यते॥ ॥प्रथमे

ह्नि तृतीयेह्नि पंचमे सप्तमे तथा ॥ नवमैकादशे चैव तं नवश्राद्धमुच्यते ॥ इति वचनात् । नवश्राद्धे मं-
त्रानावः । आचम्य । प्राणानायम्य तिथ्यादि स्मृत्वा अपसव्यं । अमुके त्यादि प्रेतस्य त्वं तमुक्त्वा । प्रेतत्ववि-
मोक्षार्थं अद्येह नवश्राद्धमहं करिष्ये इति संकल्पयेत् । तत अमुकगोत्रेत्यादि प्रेतेति संबुध्यं तं अ-
यं ते क्षणमुपतिष्ठतामिति क्षणं दत्वा तथैव पाद्यं च दत्वा ऽमुकेत्यादि षष्ठ्यंतमुक्त्वा नवश्राद्धे इद-
मासनमुपतिष्ठतामिति आसनं । ततो दक्षिणाग्रं कुशमेकं दत्वा तत्रैव मर्घपात्रमासाद्य तत्रैकं
पवित्रं क्षिप्त्वा अमुकेत्यादि संबुध्य प्रेतेत्यंतमुक्त्वा नवश्राद्धे इदमर्घं ते वोपतिष्ठतामिति अर्घं द-
त्वा तद्देव प्रत्यक्षं दास्यमानं वा आच्छादनं दद्यात् । अत्र गंधपुष्पादि धूपदीप यथाशक्तं गंधाद्यर्चनं गो-
त्रस्य प्रेतायोपतिष्ठतां । सव्यं । आचमनं । आमान्नसंकल्पः । अपसव्यं । ततः सोपस्करं आमान्नं द्वि-
नाग्रे कुशबरोर्वाग्रे निधाय । ओं विष्णोः । आमान्नैरन्नसेवेति स्पृष्ट्वात् अमुकी पात्रमालम्य अमुकगो

त्रायेत्यादि प्रेताय्येत्वं तण्डुलाढकद्व मामान्नं दास्यमानं वा यथाशक्ति सोपस्करं सोदकुंभं दक्षिणामुपतिष्ठतामि
ति पिंडस्थाने जलं दद्यात्। अवनेजनं। ततो नामगोत्रं प्रथमां तण्डुलाक्तां अवनेजनं मद्दत्तं तवोपतिष्ठतामि
ति पिंडस्थाने जलं दद्यात्। तत्र कुशामेकं दक्षिणाग्रं धृत्वा तत्र सक्तुपिंडं दद्यात्। अद्याद्य विषमश्राद्धे त्रयं
सक्तुपिंडमुपतिष्ठतामिति पिंडं दत्वा पूर्ववदवनेजनं कृत्वा चूर्णसूत्रं उशीरचंदनं भृंगराजं च दत्वा धूपदी
पनैवेद्यं पुगीफलं दत्वा सर्वं आचमनं। अपसव्यं दक्षिणां दद्यात्। दास्यमानं त्वोहं निष्क्रयणीं दक्षिणां गोत्रा
यप्रेताय उपतिष्ठतामिति दक्षिणासंकल्पः। ततः अनादिनिधनो देवः शंखचक्रगदाधरः। अक्षयः पुंडरी
काक्ष प्रेतमोक्षप्रदो भव॥ इति पठित्वा पिंडविसर्जनं। अभिरम्यतामित्यके अभिरम्येति प्रत्युक्तः। विषम
श्राद्धं परिपूर्णतां। पिंडप्रवाहं स्नायात्। ततो देहावयव निषात्पर्थे अवयवपिंडदानं यथाविधिः कुर्या
त्। अथवा पूर्वं वयवपिंडदानं पश्चात् नवश्राद्धं। नवश्राद्धं विषमदिवसे दशाहमध्ये कर्तव्यं। प्रथमदि

नो तृतीयः पंचम· सप्तम· नवम· एकादशादिने विकल्पः॥ ॥इति नवश्राद्धं॥ ॥नवश्राद्धे प्रेताप्यायनं
नवतिनवश्राद्धकरणे अधिकं फलं न भवति। अकरणे प्रत्यवायो नास्ति। इच्छा चेत्कर्त्तव्यं। नो चेन्न कर्त्तव्यं।
॥ ॥अथ पाथेयश्राद्धं॥ ॥अस्थिसंचयानंतरं पाथेयश्राद्धमिति स्मृत्यसारे। पाथेयश्राद्धं के चित्कुर्वंति॥
ततः अमुकेत्यादि प्रेतस्येत्यंतं पठ्यंतमुष्मान्मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धमहं करिष्य
इति संकल्पः॥ पाद्यासनार्घार्चनाच्छादनामान्नपिंडतिलोदककुर्णसूत्रउशीरचंदनभृंगराजम्योक
पाद्यादि स्नानांतं विश्रामश्राद्धवत्सर्वं पूर्ववत्कुर्यात्। अस्मिन्श्राद्धे दक्षिणस्थाने इदं दंडस्यमानं अ
थाशक्ति सोपस्करं सघृतं सोदककुंभं सवस्त्रं कांस्यं यथाशक्ति सुवर्णरजतं ताम्रं तिलोदं दक्षिणे प्रेतं
सोपानत्कं सोदपात्रमुपतिष्ठतामिति दद्यात्॥ सर्वत्रामश्राद्धे आमं आसपादशगुणमष्टगुणपंचगु
णचतुर्गुणंद्विगुणंवादद्यात्॥ ॥इति पाथेयश्राद्धं॥ ॥अथ देवयाज्ञिकमतेन नवश्राद्धान्युक्रमो

लिख्यते। अत्र सर्वेमंत्रकं प्रेतैकोद्दिष्टविधिना श्राद्धं॥ पुराणमते एकपिंडः। देवयाज्ञिकमते द्वौ द्वौ पिंडौ प्र
थमेह्नि तृतीये च पंचसप्तनवमे पि। द्वौ द्वौ पिंडौ प्रदातव्यौ शेषे एकं तु विन्यसेत्स्मरी। विना ब्राह्मणे वै कर्त्रीन्त्र
27 स्यागंधादिदान मंत्रप्रतिनिषिद्धत्वान्नवश्राद्धे प्रेतोद्देशेन मासान्नजलसहितकुंभदानं। भोजनं चान्नं। अयं कुं
भः मासान्नजलसहितः सोपवीतो गंधाद्यर्चितः सघृतमाषान्नसहितः। व[illegible] विद्वद्ब्राह्मणाय दास्यमा
नोमुकगोत्र अमुकप्रेत तेनोपतिष्ठतां॥ ॥अथ नवश्राद्धं संक्षेपेण कर्तव्यता लिख्यते। अपसव्यं द
क्षिणामुखः। चरुद्वयस्थापनं। गोत्र प्रेत विषम श्राद्धक्षणमुपतिष्ठतां। द्वितीयचरौ गोत्र प्रेत नव श्रा
द्धक्षण॰ एवं द्वाभ्यां पाद्यमुपतिष्ठतां। आसनमुपतिष्ठतु। अर्घमुपतिष्ठतु। तिलोपचारैः पूजनं। अवने
जनमुपतिष्ठतु। आमान्नमुपतिष्ठतु। अवनेजनं २ एष पिंड उपति॰ २ प्रत्यवनेजनमुपतिष्ठ॰। ऊर्णासूत्र
मु॰ उशीरचंदन॰ भृंगराजपत्रमु॰। रक्तधूप॰ दीप॰ नैवेद्य॰ लोहनिष्क्रयदक्षिणामु॰ पूर्ववत्कुंभसंकल्पः २७

पिंडविसर्जनं। अभिरम्यतामिति च रविसर्जनं। न चश्राद्धं विषमश्राद्धं परिपूर्णता। पिंडप्रवाहस्नायात्। अ-
थावयवपिंडदद्यात्। प्रथमपिंडप्रमाणं देवदत्तः। एकोद्दिष्टे सपिंडे च कपित्थं तु विधीयते। नालिकेरप्रमाणं
तु षट्त्रिंशे मासिके तथा। तीर्थे दर्शे च संक्रामे कुक्कुटाण्डप्रमाणतः। महालयगयाश्राद्धे कुर्यादामलकोप-
मं। इति पिंडप्रमाणम्॥ ॥अथावयवपिंडश्लोकाः॥ प्रथमेऽहनि यः पिंडस्तेन मूर्द्धा प्रजायते। द्वितीयेऽहनि क-
र्णाक्षिनासिका मुखमेव च। तृतीयेऽहनि वै ग्रीवा भुजवक्षस्तथैव च॥ चतुर्थे नाभिः कटिपृष्ठं गुह्यं लिंगं
च जायते। पंचमे तु रुजानुश्च जंघपादयुगं तथा। षष्ठे च दंतरोमाणि नखत्वक्च प्रजायते। सप्तमे रुधिरं
मांसं अस्थिमज्जा शिरास्तथा। अष्टमे सर्वमर्माणि बलवीर्यं च जायते। नवमे सर्वांगिसंपूर्णं दशमे क्षु-
त्पिपासया। प्रथमदिवसे तीर्थं गत्वा शुद्धभूमिं प्रकल्प्य। गोमयेनोपलेपयेत्। स्नात्वा चरुश्रपणं मानसी
संध्या कर्तव्या। चरुश्रपणानंतरं आचमनं प्राणायामः। कुशोपग्रहः। दक्षिणाभिमुखोपविश्य। अपवित्रः

28

पवित्रो शुचिः। अपसव्यं। तूष्णीं नीवीबंधनं। सव्यं। ततः कर्मार्थे जलाभिमंत्रणं। यद्देवा॰ अपसव्यं। पाक
प्रोक्षणं। पाकपिंडद्रव्योपहाराणां पवित्रता। सव्यं। दिश्याकाद्यपात्रपाकद्रव्यश्राद्धसंपदस्तु। अद्येत्यादि॰ मा
से पक्षे तिथौ अमुकवासरे एवंगुणविशिष्टायां पुण्यतिथौ अपसव्यं। अमुकगोत्रस्य अमुकप्रेतस्य प्रथमे
ह्नि शिरोनिवृत्यर्थे पिंडप्रदानमहं करिष्ये। तूष्णीं रेखाकरणं। अवनेज॰ गोत्र प्रेत अवजनं मद्दत्तं तवोप
तिष्ठतां। दक्षिणाग्रकुशास्तरणं। पिंडदानं। गोत्र प्रेत प्रथमेह्नि शिरोनिवृत्यर्थे एष पिंडो मद्दत्तस्त
वोपतिष्ठतां। प्रत्यवनेजनं। गोत्र प्रेत पिंडस्योपरि अवनेजनं मद्दत्तं तवोपतिष्ठतां। हस्तप्रक्षालनं। नि
वीविस्रंसनं। गोत्र॰ प्रेत ऊर्णसूत्रं मद्दत्तं तवोपतिष्ठतां। उशीरचंदनं मद्दत्त॰ भृंगराजपु॰। रात्र धू॰ एष
दीपो म॰ नैवेद्यं म॰ पुगीफलार्घं म॰ पिंडस्यार्चनविधेः परिपूर्णता। सव्यं॰ आचमनं। अपसव्यं। भोजन
क्रि संकल्पः। द्वास्यमाणं ब्राह्मणमेक भोजनं यथाकालं गोत्राय प्रेताय प्रेताय क्षुधोपशमनार्थं मद्दत्तं तवोप २८

तिष्ठतां। दक्षिणासंकल्पः। दास्यमानं दोहनिष्क्रयणीं दक्षिणां मद्दत्तां तवोपतिष्ठतां। अनेन पिंडदानेन प्रे
तस्य सद्गतिः। उत्तमलोकप्राप्तिः। अथैतज्जलिदानयोग्यता प्राप्तिः। तिलजलकुशमिश्रं अंजलीदानं।
29 गोत्र अमुकप्रेत दाहजनित तपोपशमनार्थं पिंडस्योपरि एष तिलतोयांजली मद्दत्तस्तवोपतिष्ठ
तां। प्रथमदिने अंजली १ अशोकोदकं पिंडोपरि जलधारा॰ पीत। अनादिनिधनो देव· गोग्रास संकल्पः
दास्यमानं गोग्रासः। गोत्राय प्रेताय मद्दत्त·। ततः अशुचित्वनिवृत्यर्थं शुचित्वप्राप्त्यर्थं अ॰ध्यमनि
वृत्यर्थं प्रेतोद्देशेन गर्त्तेषु तैलकल्कोदकप्रक्षेपः। गोत्र प्रेत ते तैलेनाभ्यंगस्नानं। कल्केनोद्वर्तयामि। उष्णोदके
न स्नाहि। शीतोदकेन स्नाहि। सर्वं। अद्य पूर्वोच्चरितत्र वतां ब्राह्मणानां वचनात् श्रीविष्णोः प्रसादा
त् प्रथमदिवसनिमित्तं पिंडदानं परिपूर्णतां। अपसव्यं। पिंडोद्धरणं। सव्यं पिंडमुदके प्रक्षेपः। गर्त्तेषु।
पुनः स्नानं। स्नानानंतरं मंत्रस्नानं। एवं प्रथमदिनादारभ्य दशाहपर्यंतं। गर्त्तोतसे तैलकल्कोष्णादि

सर्वंकार्यं॥ ॥इतिप्रथमदिनकृत्यं॥ ॥अथद्वितीयदिनेचरुश्रपणादिपाकप्रोक्षणांतंसर्वंपूर्ववत्‌।देशा
कालौस्मृत्वा।एवंगुण·तिथौ।अपसव्यं।गोत्रस्यप्रेतस्यद्वितीयेहनिकर्णाक्षिमुखनासिकानिष्पत्यर्थं
एषपिंडोमद्दत्त·प्रत्यवनेजनादिसर्वंपूर्ववत्‌।द्वितीयेहनिअंजलीत्रयं।द्वितीयदिनकृत्यं॥ ॥अथतृती
यदिनेचरुश्रपणादिपाकप्रोक्षणांतंपूर्ववत्‌।प्रयोगेविशेषः।अपसव्यं।गोत्र·प्रेतस्तृतीयेहनिग्रीवाभु
जवक्षनिष्पत्यर्थंपिंडदानंमहंकरिष्ये।रेखा।अवने·पिंडेविशेषः।गो·प्रे·तृती·ग्रीवाभुजवक्षनिष्प
त्यर्थंएषपिंडोमद्दत्तस्तवोपतिष्ठ·प्रत्यवने·सर्वंपूर्ववत्‌।तृतीयदिनेअंजलीपं॥ ॥इतितृतीयदिन
कृत्यं॥ ॥अथचतुर्थदिनेस्थिसंचयनंकार्यं।तत्रघटदुग्धतिलकुशाहरिद्रवस्त्रखंडपर्णवृंतख
नित्रपक्षकर्दमश्रेष्ठाब्जपत्रघृतनित्यश्राद्धसामग्रीसहितश्मशानेगच्छेत्‌।स्नात्वाप्रेतकृत्यंकुर्यात्‌।
आचमं।प्राणायामः।कुशोपग्रहः।दक्षिणामुखउपविश्य।अद्येत्यादिएवंगुणे·अपसव्यं।गोत्रस्यउत्त २९

मत्सोकप्राप्त्यर्थं अस्थिसंचयनकर्माहं करिष्ये। तत्रानुप्रचरती नु अमुष्मान्नु ब्राह्मणान्नो ज्ञापयिष्ये इ
ति संकल्प्य। ततः पलाशादि पर्णे हृत्वा तेन स्मशानस्थानि अस्थीनि प्रकटयनि कृत्वा अंगुष्ठकनिष्ठिकाभ्यां तान्य
स्थीनि गृहीत्वा पलाशपुटे वृटपुटे वा प्रक्षिपेत्। तत्र पत्रपुटानुस्थीनि अभ्युनाभ्युंजनं। मध्ये गौ
वा त्वपसकर्दमे प्रक्षेपः। कर्पूरागुरुचंदनकस्तूरिकाकेसरादि सुरभिद्रव्यैरन्यैर्वा। सर्वोत्ता वे अभ्युंत
तआग्नेयां दिशि निमुखको एगंगर्तं खात्वा हारिद्रवस्त्रखंडे तत्रास्तीर्य तत्र वा क्रूरूत्पनेन मंत्रेण अस्थी
नि प्रक्षिपति। यदा पितृमेधं करिष्यन् तदा कुंभे अस्थिसंचयनं करोति। न गर्ते। एतद्वाजसनेयशाखीना
मित्यर्थः। पुराणं। गर्तात्परिदुग्धसेचनं। सर्वं। अपद्क्षिणं चितां भूमिं कृत्वा पृष्ठतः अनवलोकयन्तः स्ना
नार्थं जलाश्रयं गच्छेत्। अस्थिसंचयनं तृतीयदिने वा॥ ॥इति अस्थिसंचयनं॥ ॥अथ चतुर्थदिने स्ना
नादि सर्वं पूर्ववत्। चतुर्थेऽहनि उदरनामानि लिंगशुद्ध करिष्ये इति तत्प्रत्यर्थं पिंडदानमहं करिष्ये सर्वं पूर्व

=प्रथमे दिने द्वितीये वा त. च. स. न. अस्थिसंचयनकाल नारायणमहीम=

वत्। चतुर्थदिने अंजली ७॥ ॥इति चतुर्थदिनकृत्यं॥ ॥अथ पंचमदिने ऊरुजानुजंघापादचयवनिष्पत्य
र्थे पिंडदानं। अंजली ९॥ ॥इति पंचमदिनकृत्यं॥ ॥अथ षष्ठदिनकर्तव्यता लिख्यते॥ दंतरोमनखशुक्र
वीर्यनिष्पत्यर्थे पिंडदानं। अंजली ११॥ ॥इति षष्ठदिनकृत्यं॥ ॥सप्तमे रुधिरमांसअस्थिमज्जाशिराव
30 यवनिष्पत्यर्थे पिंडदानं। अंजली १३॥ ॥इति सप्तमदिनकृत्यं॥ ॥अथाष्टमे सर्वमर्मावयवपादांगुलीनि
ष्पत्यर्थे पिंडदानं। अंजली १५॥ ॥इति अष्टमः॥ ॥अथ नवमदिने सर्वांगसंपूर्णावयवनिष्पत्यर्थे पिंडदा
ना। अंजली १७॥ ॥इति नवमदिनकृत्यं॥ ॥दशमे हनि क्षुत्पिपासावयवनित्यर्थे अंजली १९॥ ॥ततो
दशमे गर्त्ते प्रेतोद्देशेन तैलकल्कोष्णोदकप्रक्षेपः। यथा प्रत्यहं क्रियते न तथैव सर्वं पूर्ववत्। चरुशेषेण
काकबलिः। काको सि यमदूतो सि गृहाण बलिमुत्तमं। यमद्वारे गतं प्रेतमाप्यायितुमर्हसि। ततः सू
तकनिवृत्त्यर्थं केशश्मश्रुवपनं कारयेयुः। नखलोमनिकृंतनं च। ततः प्रेतसंबंधिकर्मकाष्ठपरिहिता ॐ

निवस्त्राणि त्यक्त्वा अंत्यजानामाश्रितानां दत्वा दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि
वासांसि केशश्मश्रुनखानि च। ततः तिलकल्केन गौरसर्षपकल्केन च तिलैस्तैलेन च शिरःसंयुतं शि
रस्नानं कृत्वा अश्रुद्धे वाससी परिधाय गां सुवर्णं दूर्वादीनि मंगलद्रव्याणि स्पृष्ट्वा शुद्धो भवति। गृहेपि सर्वाणि
गुप्तदोरकादि वासनखट्वादीनि च वैशाखयित्वा मृन्मयानां भांडानां सूतकिस्पृष्टानां परित्यागः। गृहस्य
सन्मार्जनं लेपनं च कर्त्तव्यं। ततः आबालाः सर्वे सचैलं स्नानं कुर्युः। एवं कृते शुद्धिर्भवति। नान्यथा। ततः
सुवासिन्यो ऽभ्यंगस्नाता तदानीमेवोदकमाहृत्य तेनोदकेन भोजनार्थं पाकं कुर्युः। दशाम घोरश्राद्दिन
मागतं तदा सर्वे दशाह संबंधिपिंडोदकदानं दर्शे समापनीयं। न त्रिरात्रादर्वाक् इति केचित्। पित्रोस्तु याव
दाशौचं दद्यादेवेति मदनपारिजातकादयः। अन्येषां तु पितृमातृव्यतिरिक्तानां प्रथमदिनप्रभृति दर्शेपा
ते समापनीयमेव॥ तत्राह गौतमः। अंतर्दशाहे दर्शश्चेद्यदि स्यात्सर्ववर्णिनां। समाप्तिं पूर्वतंत्रेण कुर्या

त्मपित्रोस्तनैवसा। भ्राता वा भ्रातृपुत्रो वा सपिंडस्त्रिषु एव वा। प्रथमेह्नि यो दद्यात्स दशाहं समापयेत्। असगोत्रः सगोत्रो वा नारी वा पुरुषोपि वा। प्रथमेह्नि यो दद्यात्स दशाहं समापयेत्। आदिनासन्तु निर्वापिशाकै
र्वाप्यथ निर्वपेत्। प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिकं॥ दशाहिकाः पिंडा एकेन कर्त्ता एकस्मिन्देशे एकेनै
व द्रव्येण देयाः॥ ॥इति दशाहः॥ ॥अथैकादशाहे कर्त्तव्यतामुच्यते॥ ॥तत्राहिताग्नेर्दाहदिनादारभ्य ए
कादशाहे। [redacted] निरग्नेस्तु मरणदिनादारभ्य एकादशाहे सर्वोपहारान्गृहीत्वा तीर्थं गत्वा तत्र शुद्ध
भूमिं प्रकल्प्य गोमयेनोपलेपनं। श्राद्धसंबंधिनां दारमंतनवस्त्राणि क्षालयित्वा आतपे स्थापयेत्। तत्र
श्राद्धकर्त्ता प्रयोगपूर्वकं यथाविधिस्नानं। धौतवाससी परिधाय नूतनयज्ञोपवीतपरिधानं। अंतर्वास
धरणं। स्वल्पमात्रो धौतपुंड्रं। कुशोपग्रहः। संध्यावंदनं। स्वगोत्रसबांधवादिसहायः सन् श्राद्धार्थं पाकं पचे
त्। यदिनारायणबलिं करोति। तदा एकादश्यां श्राद्धार्थं पंचश्राद्धार्थं पाकद्वयं कुर्यात्। दानं करोति तदान

कार्यं। तदा आद्यश्राद्धार्थे पाकमेकं कर्तव्यं। एकादशाहे मासिकश्राद्धः। करिष्यति तदा मासिकश्राद्धार्थे।
स्थूलपाकमेकं। यदा एकादशाहे मासिकश्राद्धानि न करोति तदा आद्यश्राद्धार्थे एक एव पाकः। द्वादशा
हे तु मासिकानि कर्तव्यानि। अतः परं महांतं एकं दीपं कृत्वा निर्वातस्थले निधातव्यं। ततः श्राद्धक
र्ता प्राङ्मुखः पीठोपरि उपविशति। द्वितीयपीठोपरि संमुखः शालग्राममूर्त्तिस्थापनं। आचमनं। प्राण
यामः। अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥ प्रयोगः
अद्य श्रीब्रह्मणो इत्यादि। एवं गुणविशिष्टायां पुण्यतिथौ। अपसव्यं। गोत्रस्य अमुकप्रेतस्य स्त्री विष
ये गोत्रायाः प्रेतायाः। प्रेतत्वनिवृत्त्यर्थं असद्गतिविनाशनार्थं सद्गति अक्षयविष्णुलोकप्राप्त्यर्थं च
आशौचांते द्वितीयेह्नि शुद्धदेहिक अधिकारार्थं विष्णोः षोडशोपचारैः पूजनाद्यर्चनमहं करिष्ये।
सव्यं पुरुषसूक्तेन अंगन्यासः। विष्णोश्चा सहस्रशीर्षेत्यावाहनं। पुरुष इत्यासनं। एतावानस्येति पाद्यं।

त्रिपादूर्ध्वेत्यर्घ्यं। ततो विराडजायत इत्याचमनं। तस्माद्यज्ञादिति स्नानं। स्नानांते आचमनं। द्वितीयतस्माद्य
ज्ञादिति वस्त्रं। वस्त्रांते आचमनं। तस्मादश्वा इत्युपवीतं। उपवीतांते आचमनं। तं यज्ञमित्यनुलेपनं। य
त्पुरुषमिति पुष्पं। ब्राह्मणोस्येति धूपं। चंद्रमा मनसो इति दिपं। नाभ्या आसीदमिति नैवेद्यं। नैवेद्यांते आच
मनं। यत्पुरुषेणेति प्रदक्षिणा। सप्तास्यासंनिति नमस्कारः। यज्ञेन यज्ञमिति दक्षिणसंकल्पः। अंत्यः संवृत इ
ति षड्ऋचेन स्तुतिः। षोडशोपचारपूजनविधेः परिपूर्णता। अनेन षोडशोपचारपूजनकर्मणा कृतेन अ
पसव्यं गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः। असद्गति विनाशः। सद्गतिप्राप्तिः। अग्रे सत्येशास्थापनयोग्यता
प्राप्तिः। सव्यं अद्येत्यादि एवं॰ तिथौ॰ सत्येशास्थापनप्रतिष्ठापूजनमहं करिष्ये। श्वेतवस्त्रोपरि तंडुलाष्टै
र्ष्टदलं कृत्वा। इशानादि अष्टौ शक्तीनां स्थापनं। रुक्मिणीं स्थापयामि। सत्यभामां॰। जांबवतीं॰। नाग्नि
कां॰। कालिंदीं॰। मित्रविंदां॰। लक्ष्मणां॰ चारुहासिनीं॥ मध्ये ताम्रकलशं स्थापयामि॥ अनावेष्टनमयं

अनावेपत्रपुटं। नूरसीतिक्रमेण कलशस्थापनं। अतः परं सुवर्णमयीं सत्येशमूर्तिं अग्न्युत्तारणं कृत्वा
कलशोपरिस्थापनं। वस्त्रवेष्टनं। समुद्रस्य त्वावकया अग्ने इत्यादि कंडिका ११ अग्न्युत्तारणमंत्राः। म
नोजूतिरिति प्रतिष्ठा। अष्टौशक्तिसहितः सत्येशः सुप्रतिष्ठितो वरदो भवतु। अदेत्यादि एवंगुण। अ
प्रसवं गोत्रस्य अमुकप्रेतस्य रोगोत्पत्तिमरणावसाने ऊर्ध्वोच्छिष्ट अधोच्छिष्ट उभयोच्छिष्ट अकृतस्ना
नमरण आशौच मरणसमये हरिनामोच्चारवर्जित तुलसीतिलानुकुशगोपीचंदनगंगोदकस्ना
नरहित तथा मार्गे शवबवाहे आशौचदेशे अमेध्यके शास्थि इत्यादिनानास्पर्शदोषपरिहारार्थं तथा
परकाष्ठे पराग्निदहने तथा चितामध्ये कीटपतंगज्वालित तत्तद्दोषपरिहारार्थं दुर्गतिनिवारणार्थं। स
र्वां तथा च मम देहशुद्ध्यर्थं एकादशाहकर्म अधिकारार्थं प्रायश्चित्तार्थं सत्येशपूजनमहं करिष्ये। स
त्येशाय अष्टशक्तिसहिताय पंचोपचारैः पूजनं। अत्र संक्षेपपूजनं। चंदनं पुष्पं। धूपं। दीपं। नैवेद्यं।

इति संक्षेपेण पंचोपचारैः पूजनं परिपूर्णता। अथ प्रायश्चित्तार्हयोग्यताप्राप्तिः। अतः परं श्राद्धस्थाम
मूर्त्तेः सत्येश्वरस्य कलशाग्रे स्थापनं। तत्र प्रायश्चित्तांगं विष्णुश्राद्धं। विष्णो एतत्ते पाद्यं। इदमत्र। वंदनपु
33 ष्पं। आचमनं। विष्णुमंत्रेण दिग्बंधः। विष्णोरराटं। विष्णुश्राद्धोपहाराणां पवित्रता। अद्येत्यादि एवं
गुणविशिष्टायां पुण्यतिथौ प्रायश्चित्तांगं विष्णुश्राद्धं करिष्ये। विष्णवे इदमासनं। अर्चनं। धूपं। दीपं। य
थादत्तं गंधाद्यर्चनं विष्णवे स्वाहा। विष्णुश्राद्धस्यार्चनविधेः परिपूर्णता। आचमनं। भोजनसंकल्पः।
दास्यमानं ब्राह्मणभोजनं विष्णुश्राद्धनिमित्तं विष्णवे स्वाहा। सुप्रोक्षितमस्तु। शिवा आपः संतु। सौम
नस्यमस्तु। अक्षतं चारिष्टं चास्तु। दीर्घमायुः शांतिपुष्टिस्तुष्टिश्चास्तु। दक्षिणासंकल्पः। दास्यमानां दक्षि
णां विष्णुश्राद्धनिमित्तं विष्णवे स्वाहा। अद्य पूर्वोच्चरित विष्णुश्राद्धपरिपूर्णता। अतः परं श्रीफलं गृहीत्वा
सत्येश्वरस्य प्रदक्षिणकार्यं। तत्र प्रदक्षिणमंत्राः। अपराधसहस्राणि लक्षकोटिशतानि चानस्यं। ३३

त्रितत्क्षणात्पापं सत्येशात तव सन्निधौ। उपविश्य नमस्कारः। उत्थाय पुनः दक्षिणा। अनेकजन्मसंभूतं पात

तं यन्मयार्जितं। तत्सर्वं नाशमायातु सत्येशात तव सन्निधौ। उपविश्य नमस्कारः। उत्थाय पुनः प्रदक्षिणा।

पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः। त्राहि मां पुंडरीकाक्ष सर्वपापहरो हरिः। उत्थाय नमस्कारः। उ

त्थाय पुनः प्रदक्षिणा। तत्र मंत्रः। यानि कानि च पापा। उपविश्य नमस्कारः। उत्थाय पुनः प्रदक्षिणा। ना

लिकेरं समर्प्य साष्टांग नमस्कारः। प्रार्थना। ततो ज्ञानकृतं वापि कायिकं वाचिकं तथा। तत्सर्वं नाश

येत्पापं सत्येशात तव सन्निधौ। अतः परं गोमिथुनद्रव्यं गृहीत्वा सपत्नीकोपविष्टब्राह्मणानां नमस्कृत्य प्रार्थ

येत्। आब्रह्मस्तंबपर्यंतं नव वृद्धं शमिदं जगत्। यक्षरक्षपिशाचादि सदेवासुरमानुषं। सर्वे धर्मविवेकारो गो

प्तारः श्रासकानघाः। मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। युष्मैः कृतपवित्रोऽहं भविष्याम्यन

घस्तथा। प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथा। पुरा कृतं मया घोरं ज्ञातमज्ञातकिल्बिषं। जन्म

तोश्वदिनं यावत्तस्मात्पापद्धनात्तुमां। ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः। महापातकिनस्त्वेते त
त्संसर्गी च पंचमः। अतिपातकमन्यच्च तन्न्यूनमुपपातकं। गोवधो व्रात्यता स्तेयं ऋणानां चापरिक्रिया। अ
नाहिताग्निता पण्यविक्रयः परिवेदनं। इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनं। हिंसायंत्रविधानेन
मृतकाध्यापकं तथा। प्रथमाश्रममारभ्य यत्किंचित्किल्बिषीकृतं। कृमिकीटादिदहनं यदन्यत्प्राणहिंस
नं। वेदाध्ययनं वेदनिंदा वेदस्य विस्मृतिस्तथा। मातापित्रोरशुश्रूषा तद्वाक्याकरणं तथा। गुर्वादिश्रे
ष्ठविप्राणां यत्किंचिद्दुष्कृतं कृतं। अनृतालापनं किंचित्सद्धर्माकरणं तथा। श्राद्धिकेकस्यचित्तागो
नित्यनैमित्तिकच्युतिः। अनाश्रमस्थता ज्ञानं देवर्षिऋषणादिकं। पराकार्योपकरणं परद्रव्योपजीव
नं। द्वंद्वियाभिः रतिः स्त्रीषु नानाजातिषु या भवेत्। ब्रह्मक्षत्रियविट्शूद्रविधा वा दासिसंगमः। स्त्रीराद
पथ्यस्थता गम्यागमनं त्वन्त्येचयतः। अभक्ष्यभक्षणं पेयपानं भक्ष्यनिंदनं। अलेह्यलेह्यवाचोष्य

वोषणस्पर्शिताधर्मो । कुग्रामवासः पारुष्यं दुर्गमो दुर्जनो गोचमः । दुःप्रतिग्रहशीलत्वं दुरन्नं दुष्टसंगतिः ।
अश्लिष्टवाक्याशयो प्यश्लिष्टस्त्रीसंगो मनोरथाः । दुर्बोधो दुःप्रसंगश्च स्वधर्मेन्द्रियवैमुख्यं । क्रियावाग्रामडु
ष्टान्नफलमूलाकादिभक्षणं । अकेपविक्रयद्रव्याद्युत्पाद्यकृषिकर्मणा वर्त्तनं वृत्तिलोपश्च प्राणिनां ता
डनं तथा । नास्तिकत्वा स्वधर्मेषु परधर्मेषु यारतिः । अपूज्यपूजनं पूज्यपूजनस्य व्यतिक्रमः । कन्यादूष
रसादीनां विक्रयो गेहवंचनं । घृततैलफलादीनां लोहस्य हरणं तथा । संध्यादिकर्मलोपश्च व्रतलोप
स्तथैव च । इत्यादि महापातकोपपातकातिपातकानां । अन्यस्त्राचमनन्यस्तं सकृद्वित्रिचतुष्कृतं
ततो ज्ञानकृतं वापि कायिकं वाचिकं मया । मानसं त्रिविधं पूर्वं प्रायश्चित्तैरनाशितं । एतेषां पापना
शार्थं शाडाब्द्व्रुपदिष्टपतां । अथ स्त्रीविषये विशेषः । पाणिग्रहमारभ्य स्वकर्मोपरि पालनं । इन्द्रिया
भिरति स्त्रीणां नानाजातिषु या भवेत् । कृमिकीटादिदहनं पंक्तिभेदादिकं तथा । स्पृष्टास्पृष्टमना ।

चारं मन्त्रसादोषकल्पितं। तस्य सर्वस्य नाशार्थं [illegible]जाह्नवीयात्रयाधुना। अहमेकं करिष्येहं यथा
विभवसारतः। इतिहेमाद्रिसंकल्पः। गुरुलघुपापानां विशोधनार्थं प्रायश्चित्तमहं वाचये। यथाचरितामिति
ब्राह्मणो ब्रूयात्। गोमिथुनद्रव्यं समोपविष्टब्राह्मणेभ्यो दद्यात्। अथ गोमिथुनसंकल्पः। यथाशक्ति
प्राजापत्यसंकल्पः। अद्येत्यादि० एवंगुण० तिथौ अपसव्यं गोत्रस्य प्रेतस्य अशुद्धमरणदोषपरिहार
र्थं शुद्धिसंपादनार्थं। सव्यं। तथा च मम देहशुध्यर्थं एकादशाहश्राद्धाधिकारार्थं यथासंख्याकान् प्राज
पत्यान् अहं आचरिष्ये। तेन पापाहा विष्णुः प्रीयतां। तत्र प्रायश्चित्तधेनुदानं। द्वितीयं गोमिथुनदानं।
अत्र संक्षेपेन दशविधिस्नानं। आचमनं। शुद्धवस्त्रपरिधानं। तिलकं। सत्येशस्य षोडशोपचारपूजा।
उर्वीं क्षीरसमुद्रेस्मिन्नासितवंद्रे सकर्णिके। तत्र त्वं सत्यपाशार्द्धे सत्येश नव संनिधौ। आवाहनं स
मर्पयामि॥१॥ सोमसूर्याग्निसंकाशं पद्मपद्मदलान्वितं। गृहाणासनं सत्येश त्रैलोक्यस्थितिकारण॥२॥ ३५

ष्ण।१

कृत्वासनं । रत्नाभरणसर्वांग ॥ सर्वदेवनमस्कृत । पाद्यं गृहाण देवेश गंधपुष्पाक्षतैर्युतं ॥ ३ ॥ पाद्यं ॥ स
तोयशासुखस्पृयिष्टं सत्येशामुक्तिदायक । सत्येशासत्ययासुक्त गृहाणार्घ्यं नमोस्तुते ॥ ४ ॥ अर्घ्यं ॥ गंगा
जलसमानितं सुवर्णकलशे स्थितं । गृहाणाचमनं देवत्रैलोक्यस्यापि पावनं ॥ ५ ॥ आचमनं ॥ क्षीरसा
गरकल्लोले स्नाहि पापनिषूदन । मजमांसूतमयेत्रादत्तेन जलबिंदुना ॥ ६ ॥ स्नानं ॥ हरस्व सर्वदुरितं येन
हि वेष्टितो हरे । वस्त्रेणानेन संतुष्टेण सत्येशाकुरु वांछितं ॥ ७ ॥ वस्त्रं ॥ यज्ञे योगे तथा सांख्ये पवित्रत्वं सदोस
तो । यज्ञोपवितदानेन कुरु मां सर्वपावनं ॥ ८ ॥ यज्ञोपवितं ॥ सुगंधं चंदनं दिव्यं केसरागरुसंयुतं । वि
लेपनं सुरश्रेष्ठ सर्वपापहरो नव ॥ ९ ॥ चंदनं ॥ शांतेशायनमस्तेस्तु अमूर्त्तामूर्त्तस्वरूपिणे । वासुदेव न
सिंहाख्य कपिलादित्य सूदन ॥ १० ॥ पुष्पं ॥ शान्तिवृंदसुतो देवपूजा धूपं सुरेश्वर । गृहाण त्वं तु देवे
श सत्यपापसहरक्षमां ॥ ११ ॥ धूपं ॥ ज्योतिरूपमरूप त्वां वदंति मुनिपुंगवाः । ज्योतिमध्ये स्थितो देव दी

36

पंकजं नमोस्तुते ॥१२॥ दीपं ॥ त्राता त्वमेव सततेश सत्पथा सह चित्पते । गृहाण देवदेवेश मम नैवेद्यमुत्त
॥१३॥ नैवेद्यं ॥ नारायण नमस्तेस्तु वासुदेव नमो नमः । त्रैलोक्यजगदाधार त्राहि मां मधुसूदन ॥१४॥ न
मस्कारः ॥ नमस्ते देवदेवेश पुराण पुरुषोत्तम ॥ पापोपशमनार्थाय प्रीत्यर्थं प्रतिगृह्यतां ॥१५॥ प्रदक्षि
ण ॥ अनेकजन्मसंभूतं पापं छिंधि सुरेश्वर ॥ मया दत्तार्घदानेन भुक्तिमुक्तिप्रदो भव ॥१६॥ दक्षिणां
चंद्रादित्यौ च धरणी विद्युदग्निस्त्वमेव हि । त्वमेव सर्वज्योतींषि आरात्रिं प्रतिगृह्यतां ॥१७॥ आरात्रि
कं ॥ पूगीफलं सकर्पूरं तांबूलं सुमनोहरं । पवित्रीकरणं नित्यं तांबूलं प्रतिगृह्यतां ॥१८॥ तांबूलं ॥ प्र
णोसतेश संघोने विष्णो विष्णो सुरेश्वर । हर दुःखं च रोगं च पापं जन्मशतोद्भवं ॥१९॥ स्तुतिः ॥ वाराह
च्युत पद्मेश लक्ष्मीकांत सुरेश्वर ॥ पुत्रपौत्रप्रदो विष्णु पापघ्नो निरंजन ॥२०॥ निरांजनं ॥ अनिरु
द्धेश गोविंद विष्णो चक्रिं नमोस्तुते । पूजां गृहाण देवेश प्रीयतां गरुडध्वज ॥२१॥ दंडवत ॥ ततः पूर्वो

कानां अष्टौ अग्नीनां पूजनं ॥ अथ ध्यानमंत्राः ॥ अपराधसहस्राणि लक्षकोटिशतानि च । नश्यंति तत्क्ष-
णात्पापं सत्येशस्य च पूजनात् ॥ २२ ॥ सत्येशः पंचवक्त्रस्त्वं लक्ष्मीसह जगत्पतिः । वासुदेवस्ततः पूर्वे नृ-
सिंहो दक्षिणे स्थितः ॥ २३ ॥ कपिलः पश्चिमास्येतु वाराहश्चोत्तरे स्थितः ॥ ऊर्ध्ववक्त्रे च्युतो ज्ञेय एतद्वै ब्र-
ह्मपंचकं ॥ २४ ॥ सत्येशः संस्थितं राजन् पूजाकाले सदैव हि । क्षीरोदपार्थं चंद्रास्यं पद्मकर्णिकसंस्थितं ॥
॥ २५ ॥ पद्मकौमोदकीशंखचक्राण्यस्त्राणि धारिणं ॥ इति प्रार्थना ॥ अथ नालिकेरगृहीत्वा सत्येशस्य अर्घ-
दानं ॥ तत्र मंत्रः ॥ सत्येशाय नमस्तुभ्यं पापहा परमेश्वर । मयादत्तार्घदानेन प्रीतो भुक्तिप्रदो भव ॥ नम-
स्कारः ॥ प्रायश्चित्तांग ॥ अष्टौ ब्राह्मणभोजनसंकल्पः । दक्षिणासंकल्पः । प्रायश्चित्तांगव्याहृतिहोमः ॥ घृते-
न व्याहृतिभिः । आहुतिः ॥ ५६ ॥ अथवा घृतं ब्राह्मणाय दद्यात् । व्याहृतिहोमसिध्यर्थं मनः संकल्पितं
घृतं अग्निवायुसूर्यप्रीतये कस्मैचिद्ब्राह्मणायाहं दास्ये । तेन व्याहृतिहोमसिद्धिरस्तु । उदीच्यांग विष्णु

वश्यादं पूर्ववत्। अद्य पूर्वोच्चरित प्रायश्चित्त विषः परिपूर्णता। अनेन एतावत्संख्या कृत प्रायश्चित्तेन अ-
मुकगोत्रोहं अमुकनामाहं निःपापो भूयासं इति त्रिर्वाच्यं। ममदेहशुद्धिरस्तु। त्वं निःपापो भूयाः इति
37 ब्राह्मणो ब्रूयात्। एवं वारत्रयं द्विजमुखात् श्रुत्वा सन्तोषप्रविष्ट ब्राह्मणानां पादाभिवंदनं। ततो मुखाव-
लोकनं। दिव्यांतरिक्ष भूमौ वा यन्मे किल्बिषमागतं। तत्सर्वं माज्यसंस्पर्शात् प्रणाशमुपगच्छतु। अलक्ष्मी
यच्च दौर्भाग्यं मम गात्रे व्यवस्थितं। तत्सर्वं शामयत्वाज्यं लक्ष्मीं पुष्टिं च वर्द्धय। आज्यं तेजः कामधेनोः आ-
ज्यं तेजोमयं। सहिरण्यं ब्राह्मणाय दद्यात्। मुखावलोकनार्थे आज्यपात्राभावे अश्वत्थौ सुवर्णावेक्षणं का-
र्यं॥ ॥ततः परं स्नात्वा नारायणी बलिः कार्यः। आचमनं प्राणायामः। कुशोपग्रहः। अद्येत्यादि एवं गुण-
तिथौ अपसव्यं गोत्रस्य प्रेतस्य प्रेतत्वविमुक्ति पूर्वक अक्षय स्वर्गलोक प्राप्तिकामः। तथावा। चतुःष-
ष्टि कर्मणांतर्गतश्च। कश्चिद्दुर्मरण दोषपरिहारार्थे नारायणबलि कर्माहं करिष्ये। सव्यं। नारायण ३७

बलिकर्मणातथाविहितंपंचकलशापंचतास्थापनंप्रतिष्ठापूजनमहंकरिष्ये।सत्येशाद्दक्षिणेभागेपू
कुसंस्थितपंचकलशस्थापनं।सकृत्सकृन्मंत्रेणभूरसीत्यादिक्रमेणस्थापना।वस्त्रवेष्टनंपृथक्पृ
थक्कृत्वासूत्रवेष्टनं।कलशोपरिपंचमूर्तिस्थापनं।ब्रह्मारूप्यमयःकार्योविष्णुस्वर्णमयोभवेत्।
रुद्रस्ताम्रमयःकुर्याद्यमश्लोहमयःस्मृतः॥सीसमयस्तत्पुरुषःपंचमूर्तिरुदाहृता॥पंचकलशा
ग्रेपंचधान्यसमर्पणं।गोधूमास्तंडुलामुद्गाधान्यामाषास्तिलान्यनुक्रमात्।प्रथमात्प्रमाणंचदेव
तास्तुसमर्पयेत्।ब्रह्मकलशेगोधूमाः।विष्णुकलशेतंडुलाः।रुद्रकलशमुद्गाः।यमकलशेमाषाः
प्रेतकलशेतिलाः।मनोजूतिरितिप्रतिष्ठा।ब्रह्मादिप्रेतपर्यंताःपंचकलशाःसुप्रतिष्ठावरदाभवंतु
अथपंचदेवतानामावाहनमंत्राः।ब्रह्मजज्ञानं।ब्रह्माणमावाहयामि।इदंविष्णुः।विष्णुमावाह
यामि।नमस्ते०रुद्रमावाहयामि।यमायत्वा०यममावहयामि।प्रेताजयता०तत्पुरुषमावाहय

मि। पंचदेवतानां पूजनमहं करिष्ये। इदमन्नं चंदनं पुष्पं। धूपं दीपं नैवेद्यं दक्षिणां तांबूलं पंचदेवता
भ्यः स्वाहा। पंचनालिकेरसमर्पणं। अथवा पूगीफलं। ५। पूजनविधेः परिपूर्णता। अथ पंचसूनाजपा
38 र्थे पंचब्राह्मणानं वरणं। ब्राह्मणानां वेचट ए पादप्रक्षालनं। कुंकुमार्चनं। वरुणश्राद्धं। कुंडमुद्रिका
वस्त्रदानं। आमान्नसंकल्पः। दक्षिणासंकल्पः। वरुणविधेः परिपूर्णता। अतः परं विष्णुतर्पणं। अथ
वा पंचश्राद्धानंतरं विष्णुतर्पणं। विष्णुतर्पणविधिरुच्यते। आचमनं। प्राणायामः। प्रयोगः। अद्ये
त्यादि। एवं तिथौ। अमुकसगोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गलोकप्राप्तिकामः। एका
दशेहनि विष्णुतर्पणमहं करिष्ये। सव्यं। विष्णुतर्पणांगं विष्णुश्राद्धं पूर्ववत्। ताम्रपात्रे जलदुग्ध
तिलयवसर्वौषधीतुलसीगंधमुद्राप्रनप्रक्षेपः। शंखेन शालग्रामोपरितर्पणं। शंखे दुग्धं समा
दाय सहिरण्यं तिलान्वितं। सर्वौषध्याक्षतैर्मिश्रैर्विष्णुमुद्दिश्य तर्पयेत्। वेदोक्तैर्विस्तरैर्मंत्रैस्तथा ३८

पौराणिकैःस्तुतैः।सहस्रशीर्षोध्यायसंपूर्णो।अपसव्यंहस्ताभ्यांअंजलिनातर्पणंविष्णोपरि।गो
त्रस्यप्रेतस्यप्रेतत्वमोक्षार्थंपापहाविष्णुस्तृप्यतु।सव्यं।गोविंदस्तृप्यतु।केशव॰।माधव॰।श्रीधर॰।
हृषिकेश॰।पद्मनाभ॰।पुरुषोत्तम॰।अनिरुद्ध॰।संकर्षण॰।वासुदेव॰।जनार्दन॰।अच्युत॰।वाम
न॰।पुंडरिकाक्ष॰।मधुसूदन॰।दामोदरस्तृ॰।अनंत॰।श्रीकृष्ण॰।आदिदेवस्तृ॰।वैकुंठ॰।श्रीपति॰।श्री
धर॰।त्रिविक्रम॰।नारसिंह॰।रामचंद्र॰।नारायण॰।पीतांबर॰।असुरांतक॰।चतुर्भुज॰।गोपाल॰।परमे
श्वर॰।हिरण्यगर्भ॰।जगन्नाथ॰।गदाधर॰।गरुडवाहन॰।मुकुंद॰।धरणीधर॰।देवकीनंदन॰।अपसव्यं।अ
नादिनिधनोदेवःशंखचक्रगदाधरः।अक्षयःपुंडरीकाक्षःप्रेतमोक्षप्रदोभव।अतसीपुष्पसंकाशंपीत
वाससमच्युतं।येनमस्यंतिगोविंदंनतेषांविद्यतेभयं।कलकलकलकपालत्वंअगतीनांगतिर्भव।संसार
र्णवमग्नानांप्रसीदपुरुषोत्तम।नारायणसुरश्रेष्ठलक्ष्मीकांतवरप्रद।अनेनतर्पणेनाथप्रेतमोक्षप्र

३२५

दोनवा हिरण्यगर्भप्रजानां व्यक्तिरूपेण। अस्यप्रेतस्य मोक्षार्थं सुप्रीतो भवसर्वदा। सव्यं। ॐ अनेन अष्टकेन
पूर्ववत्तर्पणं। अपस। अनादिनिधनो देवेसातिश्लोकपंचकेन तर्पणं। संहितायां विष्णुमंत्रोक्तैस्तर्पणं। अप
सव्यं। पुनः शेषोदकं जलधारामोपरिजलधारा पयधारां दद्यात्। अमुकगोत्र अमुकप्रेत परलोके महत्तृषानि
वृत्त्यर्थं इदं विष्णुतर्पणं मद्दत्तं तवोपतिष्ठतां। तर्पणावसाने तु गां दद्यात् पयस्विनीं। कृते तत्र विष्णुतर्पण
सांगतासिध्यर्थं दास्यमानां पयस्विनीं धेनुसंज्ञिकां गां। अथवा तन्मूल्योपकल्पितं द्रव्यं समनोद्दिष्टं गोत्रा
यप्रेताय वक्ष्ये चित्तं ब्राह्मणाय मद्दत्तस्तवोपतिष्ठतां। ब्राह्मणभोजनसंकल्पः। दास्यमान ब्राह्मणभो
जनं प्रेताय उपतिष्ठतु। दास्यमानं दक्षिणं प्रेताय। सान्नोदकं कुंभदानं सवस्त्रं दक्षिणं गोत्रायप्रेताय उ
कमंडलुदानं। दास्यमानं कमंडलुपात्रं सदक्षिणं वरुणदेवतां परलोके महत्तृषानिवृत्त्यर्थं गोत्राय अमु
कप्रेताय ते उपतिष्ठतु। सव्यं। विष्णुप्रीत्यर्थं ब्राह्मणभोजनसंकल्पः। यथाशक्तिसुवर्णदानं। अपपूर्वो ३९

39

अथ

विष्णुतर्पणविधेः परिपूर्णता। अनेन विष्णुतर्पणकृतेन अपसव्यं। गोत्रस्य पेतस्य पेतत्वनिवृत्तिः। असद्ग-
तिविनाशः सद्गतिप्राप्तिः। नारायणीबलीकर्मांगं दानं सौकृ प्रायश्चित्तहोमयोग्यता प्राप्तिः। सव्यं। स्थंडि-
ले पंचभूसंस्काराः। अग्निस्थापनं। अत्र ब्रह्माचार्यवरणं। गुर्जरां मते। दक्षिणतो ब्रह्मासनादि चरुस्थापनं। अ-
त्र घृताहुतिः। ११० चर्वाहुतिः। १६ तिलाहुतिः। १०८ आज्योद्वासनादिपर्युक्षणांते आज्यहोमः। ॐ प्रजाप-
तये स्वाहा। इदं प्रजापतये। ॐ इन्द्राय स्वाहा। इदमिन्द्राय। अग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदं सोमा-
य। अथ चतुर्गृहीतहोमः। युंजते ष्टकेनास्रुचि चतुर्गृहीतमाज्यग्रहणं। युंजते मन० परिष्टुतिः स्वाहा। इ-
दं विष्णवे सर्वत्र त्यागः। इदं विष्णु० मुरे स्वाहा। इरावती० देवश्रुतौ० विष्णोर्नुकं० दिवो वा० प्रतद्विष्णो
रराट० अथ स्रुवेण होमः। पुरुषसूक्तेन होमः। आहुतिः १६ पुनः स्रुचि द्विर्ग्रहणं तन्नरनारायणेन होमः।
अङ्गाः षट्। आहुति० ६ ततः लोमभ्यः स्वाहा। इत्यादि आहुति ४२ त्वागोपियथादैवतं। ॐ लोमभ्यः स्वाहा
१ इदं०। त्वचे स्वाहा इ० २ इदं त्वचे। लोहिताय स्वा० ३ मेदोभ्यः स्वाहा ४ मांसेभ्यः स्वाहा ५ स्नावभ्यः स्वाहा

५०

मरुद्भ्यः स्वाहा २ रेतसे० प्राणाय वै १ आयासाय स्वाहा १ प्रायासाय स्वाहा। १। संयासाय स्वाहा। वियासाय स्वाहा
१ उद्यासाय स्वाहा १ शुचे स्वाहा १ शोचते स्वाहा १ शोचमानाय स्वाहा १ शोकाय स्वाहा। १ तपसे स्वाहा। १ त
प्यते स्वाहा १ तप्यमानाय स्वाहा। १ तप्ताय १ घर्माय १। निष्कृत्यै स्वाहा। १ प्रायश्चित्यै स्वाहा १ भेषजाय स्वाहा।
यमाय स्वाहा। १ अंतकाय स्वाहा १ मृत्यवे स्वाहा १ ब्रह्मणे स्वाहा १ ब्रह्महत्यायै स्वाहा १ विश्वेभ्यो देवेभ्यः स्वा
हा १ द्यावापृथिवीभ्यां स्वाहा १ अथ चरुहोमः॥ अग्निधार्यो इदं विष्णुर्विचक्रमे० इदं विष्णवे न मम इति स
र्वत्र त्यागः। ३ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः स्वाहा। इपर्वतस्य०। वि
ष्णोः कर्माणि०। तद्विष्णोः०। विष्णोर्नुकं०। दिवो वा०। प्र तत्०। विष्णो रराटमसि०। त्रीणि पदा० अङ्गाः षट् इदं
उत्तरनारायणे त्यागः। इति षोडशाहुतिः॥ ततः कृष्णतिलैः कार्यो घृताक्तैर्यवमिश्रितैस्तद्विप्रासे
ति मंत्रेण जुहुयाद् अष्टोत्तरं शतं। तद्विप्रास इति मंत्रेण तिलयवाहुतिः अष्टोत्तरशत १०८ ततः स्विष्टकृत्
भूरादि घृतेन नवाहुतयः। इंद्रादि दशदिक्पालेभ्यो बलिदानं। ततः पूर्णाहुतिः। स्रुचि स्रुवगृहीतम

ज्यग्रहणं। उ परिरक्तसूत्रवेष्टितचंदनपुष्पकुंकुमसंयुक्तं नालिकेरं धृत्वा। अथवा पूगीफलं। स्वाहा॥
प्राणेभ्य इति कंडिकात्रयं पठित्वा पूर्णाहुतिहोमः। मृडाग्नये नमम इति त्यागः। अथ होमसंकल्पः। आघा
रादिपूर्णाहुतिपर्यंतं अस्मिन्प्रायश्चित्तहोमकर्मणि स्वे स्वे मंत्रैर्यस्यै यस्यै देवतायै यावत्यो यावंत्याहुतयः
स्तास्तादेवताप्रीयंतां। संस्रवप्राशनं। पवित्रयोर्मार्जनं। पवित्रप्रतिपत्तिः। प्रणीताविमोकः। ब्रह्मणे पूर्ण
पात्रदानं। कृतैतन्नारायणबलिकर्मांगतया विहितप्रायश्चित्तहोमसांगतासिध्यर्थं दास्यमानं पूर्णपात्रं
ब्रह्मन्तुभ्यमहं संप्रददे। कृतस्य कर्मणः सांगतासिध्यर्थं यथासंख्याकान्ब्राह्मणान्भोजयिष्ये। तेन कर्मा
गदेवताप्रीयतां। दास्यमानं कृशरान्नं बलिदानार्थं अपसव्यं गोत्राय प्रेताय उपतिष्ठतु। सव्यं। प्रायश्चि
त्तहोमविधेः परिपूर्णता। अनेन कर्मणा प्रायश्चित्तांगहोमकृतेन अपसव्यं गोत्रस्य प्रेतस्य कुर्मणे रे दोष
निवृत्तिः। असद्गतिविनाशः। सद्गतिःप्राप्तिः। अथ एकादशाहे वृत्तश्राद्धयोग्यताप्राप्तिः। सव्यं। ततः स्ना

41

त्वा। एकादशविष्णुश्राद्धानिकुर्यात्। पूर्वोत्तरमुखोपविश्य। आचमनं। कुशोपग्रहः। प्राणायामः। एकादशाच
टाःस्थाप्याः॥ विष्णुःशिवोयमश्चैवसोमश्चहव्यवाहनः। कव्यश्चमृत्युरुद्रश्चपुरुषश्चक्रमानिमान्। प्रेतस्तु
दशमःप्रोक्तोविष्णुरेकादशःस्मृतः। इत्येवैकादशप्रोक्ताश्राद्धेस्मिन्नधिकारिणः। यवान्गृहीत्वा। प्रथमचटे
विष्णुश्राद्धेउपतिष्ठतां। द्वितीयेशिवेश्राद्धेक्षणे० उपतिष्ठतां। तृतीयेयमश्रा०। चतुर्थेसोमराज०। पं
चमेहव्यवाहन०। षष्ठेकव्यवाहन०। सप्तमेमृत्यु। अष्टमेरुद्र०। नवमेपुरुष०। दशमेप्रेत। एकादशेवि
ष्णुश्राद्धेक्षणे० पादार्घः। प्रथमंविष्णवेएतत्तेपाद्यं। पादावनेजनं। पादप्रक्षालनं। एषतेऽर्घः। इदमन्नं। चंद
नंपुष्पं। पादार्घेइदमाचमनं। द्वितीयेशिवएतत्ते। तृतीयेयमए०। चतुर्थेसोमराज०। पंचमेहव्यवाहन०
षष्ठेकव्यवाहन०। सप्तमेमृत्यु०। अष्टमेरुद्र०। नवमेपुरुष०। दशमेप्रेत०। एकादशेविष्णु०। आचमनं। दिग्बं
धः। पूर्वेनारायणःपातुवारिजाक्षस्तुदक्षिणे। प्रद्युम्नःपश्चिमेपातुवासुदेवस्तथोत्तरे। ऊर्द्ध्वंगोवर्द्धनोर

दोदधस्तात्स्वत्रिविक्रमः। सप्तव्याधा दशार्णेषु मृगाः कालिंजरे गिरौ। चक्रवाकाः सरोद्वीपे हंसाः सरसि मान
सेऽतेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं यूयं तेभ्योवसीदथ। देवताभ्यः पितृभ्य
श्चपि[illegible] महायोगीभ्य एव च। नमः स्वाहायै स्वाहायै नित्यमेव नमो नमः॥३॥ ततः कर्मार्थं जलाभिमंत्रणं।
यद्देवा० अपाकपोसणं। एकादशाविंशत्युश्राद्धे पिंडद्वयोपहाराणं पवित्रता। दशाकालसंपदस्तु। अद्येत्या
दि० एवंगुण० तिथौ। अपसव्यं। गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्त्यर्थं असद्गति विनाशनार्थं सद्गति अक्षयविष्णु
लोकप्राप्त्यर्थं षड्विंशत्श्राद्धमेरणं तद्गतिकश्चिद्धुमेरण निवृत्त्यर्थं नारायणी बलिकर्मांगभूतं एकादशाविष्णु
श्राद्धं विष्णवादि विष्णुपर्यंतानां एकोद्दिष्टविधिना एकतंत्रेण अहं करिष्ये। सव्यं। एकादशाघटे आसनं। प्रथ
मं विष्णवे इदमासनं। द्वितीयशिवाय इदं। एवं सर्वत्र। इदमासनं। हस्तप्रक्षालनं। उपग्रहविष्टरार्थं०। एका
दशान्यर्घपात्रपूर्णं। एकैकं पवित्रं सर्वत्र। शंनोदेवि त्यदककपूरणं। येवोसीति यव प्रक्षेपः। इदमत्र चंदनं।

एकादशानामर्घपात्राणां अर्घोर्चनविधेः परिपूर्णता। आसिंचतु स्वाहा घ्यान्वंतु। पवित्रार्पणं। पूजनं। एकाद
~~शार्घपात्राणां~~ अर्घं गृहीत्वा। या दिव्या आपः पयसा॰ सुहवा नवंतु॰ प्रथमं विश्वो एषते अर्घः। एवं सर्वत्र अ
र्घदानं। अत्रन पात्रन्युब्जीकरणं। नार्घवंदनं। एकादशाचट पूजनं। चंदनं। पुष्पं। धूपं दीपं। यथाशक्तिवस्त्रसंक
ल्पः। यथादत्तंगं धाद्यर्चनं दासमानं वस्त्रप्रताम्नायमनसोद्दिष्टं द्रव्यं विश्वादि विश्वपर्यंतानां प्रत्येकं॰ अथ
वा एकतंत्रेण अन्नसेपमस्तु स्वाहा। इदं वो ज्योतिः। दीपज्योति पुष्पं। अमीषां एकादशवैश्वदेवश्राद्धानां अर्च
नविधेः परिपूर्णता। आचमनं। एकपात्रे परिवेषणं। ब्राह्मणभोजनसंकल्पः। प्रथमे पात्रे अन्नं तत्वा सत्येनाभि
षिंचामि इति पात्रप्रोक्षणं। पृथिवी ते पात्रं॰ इदमन्नं यद्दत्तं अपरं दास्यमानं ब्राह्मणभोजनं विश्वे स्वा
हा। एवं एकादशपात्रे भोजनसंकल्पः। अवनेजनं। प्रथमं विश्वो अवनेनिक्ष्व द्वितीयं शिव इत्यादि सर्व
त्र अवनेजनं। एकादशकुशास्तरणं। पिंडदानं। प्रथमं विश्वो एषते पिंडः। एवं एकादशपिंडान्दत्वा। हस्त

पृष्ठाह्वनं। प्रत्यवनेजनं। सूत्राच्छादनं। चंदनं पुष्पं। धूपं दीपं नैवेद्यं ११। पुगीफलानि एकादश। अद्भिरु
पतिष्ठतां। पिंडानामर्चनविधेः परिपूर्णता। एभिः एकादशपिंडैः कृतैः अपसव्यं गोत्रस्य प्रेतस्य सद्ग
तिः उत्तमलोकप्राप्तिः। सव्यं। आचमनं। एकपत्रपुटे सुप्रोक्षितादिकरणं। सुप्रोक्षितो यं प्रदेशो स्तु। शि
वा दर्भाश्चापः संतु। सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु। अपसव्यं। सुप्रोक्षितजलं पिंडानुपरि सि
चनं। गोत्रस्य प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः। सव्यं। अक्षय्योदकदानं। विष्णोः प्रदत्तमन्नपानादि
कं तदुपतिष्ठतां। एवं सर्वत्र। यस्मादिष्टं तस्योपतिष्ठतां। पिंडानामुपरि एकादपवित्रान् समर्पयेत्। अ
तः परं एकादशपिंडे जलधारा कर्तव्या। ताम्रपात्रे जलदुग्धसर्वौषधितिलयवतुलसीचंदनहिरण्यप्र
क्षेपः। पिंडोपरि पृथक् पृथक् मंत्रेण शंखेन धारां दद्यात्। शंखं दुग्धं समादाय सहिरण्यं तिलान्वितं॥
सर्वौषधीचसंयुक्तं दद्याद्धारां पृथक् पृथक्॥ तत्र मंत्राः। प्रथमपिंडे आपो देवा॰ रातीः। विष्णुपिंडे एषते

43 जलधारा। द्वितीयपिंडे उपयामगृहीतोसि त्वं तर्पयेत्कं॰ शिवपिंडे एष ते जलधारा। तृतीयपिंडे येना पावक॰। यमपिं
डे एष॰। चतुर्थपिंडे ये देवासः॥ सोमराजपिं॰। पंचमे समुद्रं गच्छ॰ हव्यवाहनपिंडे। षष्ठे अग्निर्ज्योतिः। हव्यवा
हनपिंडे ए॰। सप्तमे हिरण्यगर्भ॰ मृत्युपिंडे ए॰। अष्टमे नमस्ते रुद्र म॰ रुद्रपिंडे ए॰। नवमे यज्जाग्रतो॰ पुरु
पिंडे एष॰। दशमे याः फलिनीः॰ प्रेतपिंडे ए॰। एकादशे विश्वतश्चक्षु॰ विष्णोःपिंडे एष॰। अपसव्यं। शेषोद
कं एकतंत्रेण एकादश पिंडोपरि जलधारां दद्यात्। अनादिनिधनो॰ इति पठित्वा। सव्यं। दक्षिणासंकल्पः।
अमीषां श्राद्धानां प्रतिष्ठासिध्यर्थं दास्यमानां दक्षिणां विष्ण्वादि विष्णुपर्यंतानां प्रत्येकं प्रत्येकं अस्य मस्तु
स्वाहा। एकादशदानं हिरण्य वस्त्रं रजतं गुडाज्यं लवणं तथा। लोहदंड स्तिला धान्यं महीषी चामरं ददेत्।
एकादशदान प्रत्याम्नाय मनसोद्दिष्टं द्रव्यं विष्ण्वादि विष्णुपर्यंतेभ्यः स्वाहा। अद्य पूर्वोच्चरि[illegible] तत्तीर्थ वि
ष्णोः प्रसादात् एकादशश्राद्धं परिपूर्णतास्तु। एभिः एकादशश्राद्धैः कृतैः। अपसव्यं। गोत्रस्य प्रेतस्य निवृत्तिः।

असद्गतिः विनाशः। सद्गतिप्राप्तिः। अयं पंचकलशोदपानाद्योग्यताप्राप्तिः। भद्रं कर्णेति मंत्रेण कुर्या
त्। पिंडविसर्जनं। भद्रं कर्णेभिः। पिंडानुद्धृत्य चर विसर्जनं। पिंडप्रवाहस्नानाद्यात्मस्नानं ॥११॥ शुक्लवस्त्रं
परिधाय। उत्तरीयस्य च। आचमनं। कुशोपग्रहो। प्राङ्मुख उपविश्य। अद्येत्यादि॰ एवं तिथौ॰। पंचकल
शे पंचसूक्तजपः करिष्ये। जपप्रकारः प्रथमं। प्रागकाः पठ धं। ब्रह्मकलशे तेजोसि। विष्णुकलशे सहस्रशीर्षा। रु
द्रकलशे नमस्ते। यमकलशे तद्देव। प्रेतकलशे अप्रेता ध्याय। पंचकलशोदपानंतरं जपनिवेदनं। हस्ते
जलं आदा — प्रथमकलशं सजलं सहिरण्यं सवस्त्रं सफलं गंधपुष्पाद्यर्च्चितं ब्रह्मसूक्तेनाभिमंत्रितं।
अपसव्यं। गोत्रस्य प्रेतस्य विष्णुलोकप्राप्त्यर्थं विष्णुप्री॰। सव्यं। तृतीयकलशं यथोपस्कर सहितं रुद्रसूक्ते
नाभिमंत्रितं अपसव्यं। गोत्र प्रे॰ रुद्रलोकप्राप्त्यर्थं रुद्रप्री॰। सव्यं। चतुर्थकलशं यथोप॰ यमसूक्तेनाभिमंत्रि
तं। अपसव्यं। गोत्र॰ प्रे॰ यमयातनानिवृत्यर्थं यमाय उपतिष्ठतु। सव्यं। प्रेतकलशं यथोपस्कर सहितं।
अपसव्यं। गो॰ प्रे॰ प्रेतत्वमोक्षार्थं प्रेताय उपतिष्ठतु। अथ पंचदेवतानां तर्पणं। ब्रह्मा मूर्त्ति विष्णुरथेश्या

पनिया ॥ तस्योपरि ब्रह्ममंत्रैस्तर्पणं ॥ ब्रह्मयज्ञा ० आब्रह्मन् ० ब्रह्मणे ब्राह्मणं ० ब्राह्मणमघ ० ब्रह्मणस्पते ० ब्र
ह्मणस्पते ० ब्रह्मणेस्य ० उत्तिष्ठ ब्रह्मणस्प ० युञ्जते ० तत्वा यामि ० ब्रह्मक्षत्रं पवते ० ब्रह्मसूर्यसमं ० रुचं ब्रा
ह्मं ० ब्रह्माणि मे ० प्रैतु ब्रह्मणस्पतिः ॥ अथ विष्णुमूर्त्तिं विष्णुरथस्थापनीया । तस्योपरि विष्णुमंत्रैर्विष्णुतर्पणं
44 इदं विष्णु ० विष्णोर्नुकं ० प्रतद्व ० विष्णोरराटमसि ० तद्विष्णो ० विष्णोः कर्माणि ० त्रीणिपदा ० तद्विप्रासो ० दिवि वि
ष्णु ० अदितेर्बुद्ध ० विष्णोः क्रमोसि पपर्वतस्य ० । अथ रुद्रतर्पणं । नमस्ते ० याते ० इमा रुद्राय ० असंख्याता ०
नीलग्रीवा ० एतन्ते ० अवरुद्र ० एषते रुद्र ० असौ यस्ताम्रो ० मानस्तोके ० नमः शंभवाय ० परिनो ० प्रुन ०
स्वा ० वसुभ्यस्त्वा ० इंद्राय त्वा ० वसुमते ० व्रते स्वाहा ० रुद्राः संसृज्य ॥ अथ यमतर्पणं ० यमाय त्वा ० यमा
य स्वाहा ० यमेन दत्तं ० असि यमो ० यमाय त्वा मखाय त्वा ० मन्यवे यहस्ता ० यमाय यमसूक्तः ॥ ये देवा अ०
यमाय त्वांगिरस्व ० क्रव्यादमग्निं ० अथ तत्पुरुषतर्पणं । अकन्कर्म ० पेताडय ० रूपेणवो ० यत्स्रूता ता ० यो अ
ग्निकव्यवा ० ये दग्ने ० अपेत वी ० अपेतो यन्तु ० ये देवा अग्निनेत्राः ॥ अद्य पूर्वोच्चरित पंचदेवतानां तर्पण ४४

परिपूर्णता॥ अनेन॰। अद्ये पंचश्राद्धयोग्यताप्राप्तिः॥ सव्यं॰। आचमनं। पंचश्राद्धारंभः॥ पंचचराणां स्थापनं। प्राङ्मु
खउपविश्य। कुशोपग्रहः। यवान् गृहीत्वा। प्रथमं ब्रह्मश्राद्धे क्षण उपतिष्ठतां। द्वि॰ विष्णुश्रा॰। तृतीय रुद्रश्राद्धे॰ च
तुर्थे यम॰। पंचम तत्पुरुषश्राद्धे॥ पादार्घं ब्रह्मन् एतत्ते पाद्यं॥ विष्णो ए॰। रुद्र ए॰। यम ए॰। तत्पुरुष ए॰। आचमनं।
दिग्बंधः। सर्वे एकादशश्राद्धवत्॥ कर्मपात्र॰ यद्देवा॰। पाकप्रोक्षणं। पंचश्राद्धोपहाराणां पवित्रता। देश॰ अद्ये
त्यादि॰। तिथौ अमुसे पेच्यं गोत्र॰ प्रे॰ सद्गतिप्राप्त्यर्थे पंचश्राद्धमहं करिष्ये॥ सव्यं॥ पंचचटे आसनं। ब्रह्मणे इदमासनं।
विष्णवे॰। रुद्राय॰। यमाय॰। तत्पुरुषाय॰। हस्तप्रक्षालनं। उपग्रह॰। अर्घपात्रपूरणं। पा। पवित्रकं प्रशनोदेवी
त्युदकं। यवोसि॰। चंदनं॰। पुष्पं। अर्घपात्राणामर्चनविधेः॰। आसिंचउ स्वाहार्घा॰। पवित्रार्पणं पूजनं। यादि
व्या॰ नवं ब॰। ब्रह्मन् एष ते अर्घः। एवं सर्वत्र। अनुज्ञीकरणं। नार्घवंदनं। चाटपूजनं। धूपं दीपं। वस्त्रसंकल्पः।
पथादत्तं गंधाद्यर्चनं दास्यमानं वस्त्रं ब्रह्मादितत्पुरुषेभ्यः स्वाहा। अमीषां श्राद्धानां अर्चनविधेः परिपूर्णता। आ

चमनं। पंचपात्रे परिवेषणं। कृत्वा॰ पृथिवी ते पात्रं॰। इदमन्नं अपरदास्यमानं ब्राह्मणभोजनं ब्रह्मणे स्वाहा॥ एवं
सर्वत्र। अवनेजनं॰ ब्रह्मन् अवनेनिक्ष्व। विष्णो अव॰। रुद्र अ॰। यम अ॰। तत्पुरुष॰। कुशास्तरणं। पिंडदानं। ब्रह्म
न् एष ते पिंडः। विष्णोः। रुद्र॰। यम॰। तत्पुरुष॰। प्रत्यवनेजनं। सूत्राच्छादनं। चंदनपुष्पधूपदीपनैवेद्यं पंचश्राद्धे
उपतिष्ठतां। पंचफलार्घं॰। उद्वापनपिंडानामर्चनविधेः परि॰। एभिः पंचश्राद्धैः कृतैः अपसव्यं गोत्रप्रेत॰ स
द्गतिप्राप्तिः। सव्यं। आचमनं। प्रोक्षितादिकरणं। अक्षय्योदकदानं। ब्राह्मणे दत्तं श्राद्धमुपतिष्ठतां। विष्णोर्दत्तं॰
रुद्रस्य॰। यमस्य॰। तत्पुरुषस्य॰। पिंडोपरि पवित्रकानुप्रक्षेपः। पंचपिंडे जलधारा कर्तव्या। जलदुग्धसर्वौषधी॰
तिलयवतुलसीसंयुतं जलधारां कुर्यात्। शंखेन पृथक् पृथक् मंत्रेण जलधारा। अग्निमीले॰। आब्रह्मन् द्वा
भ्यां मंत्राभ्यां ब्रह्मन् एष ते जलधारा। इषे त्वोर्जे॰। इदं विष्णु॰। द्वाभ्यां॰ विष्णुपिंडे जलधारा। अग्न आया॰ नमस्ते॰ द्वा
भ्यां॰ रुद्रपिंडे॰। शंनो देवी॰। यमाय त्वा॰ द्वाभ्यां॰ यमपिंडे॰। अक्रन्कर्म॰ प्रेता जयता॰ द्वाभ्यां॰ प्रेतपिंडे॰। शेषो

दकं पिंडोपरि। अनादिनिधनो० दक्षिणा संकल्पः। अमीषां श्राद्धानां प्रतिष्ठासिध्यर्थं दास्यमानां दक्षिणां० ब्रह्म

दिप्रेतपर्यंतेभ्यः प्रत्येकं प्रत्येकं अक्षयमस्तु स्वाहा। ततः पंचदानानि। भूमिः सस्यवती धेनुं सुवर्णं च क्रमात्ति

लान्। वृषभं सहिरण्यं च पंचश्राद्धेषु दक्षिणा। दास्यमान पंचदानस्य प्रत्याम्नायमनसोद्दिष्टं द्रव्यं पंचदेवताभ्यः

प्रीयंतां॥ अद्य पूर्वोच्चरिता पंचश्राद्धपरिपूर्णता। एभिः पंचश्राद्धैः कृतैः अमुकसवर्णं गोत्रं० प्रेत० सद्गतिप्राप्तिः॥ ॥

इति नारायणबलिवृषोत्सर्गयोग्यताप्राप्तिः॥ नद्दंकर्णेति मंत्रेण कुर्यात्पिंडविसर्जनं। पिंडांस्तु हत्वा वटविसर्ज

नं॥ पिंडप्रवाह्य स्नायात्॥ पंचस्नानं। शुक्लवस्त्रपरिधानं। उत्तरीमपि॥ इति नारायणबलिः समाप्तिः॥ ॥ अतः

परं वृषोत्सर्गः॥ ॥ अत्र नाचार्यवरणं॥ काम्यवृषोत्सर्गवत्। किंतु स्वयमेव कुर्यात्सर्वं॥ आचमनं। प्राणायामः

कुशोपग्रहः। प्रयोगः। अद्येत्यादि मासे पक्षे० तिथौ अमुकवासरे एवंगुण० थौ। अमुकसवर्णं। गोत्रस्य अमुकप्रे

तस्य प्रेतत्वमुक्तिपूर्वकाऽक्षयस्वर्गलोकप्राप्तिकामः मरणादिनादारभ्य एकादशेऽहनि वृषोत्सर्गमहं

46

करिष्ये।सर्वां रत्निमात्रं स्थंडिलं।पंचभूसंस्कारः।अग्निस्थापनं।सिद्धासादनमुक्तत्वात् पूर्वं पूर्णत्वरूपपणं।दक्षि
णतो ब्रह्मासनादिकुशकंडिकारणं॥सद्वीरं प्रणीताप्रणयनं।आसादने विशेषः।आज्यं तंडुला नंतरं पूर्णव
रुसिद्धासादनं।पूर्णपात्रं।त्रिनिद्धित्रिछिद्रघटतादिपायसचरुश्रपणं।केषांचिन्मते आज्यस्थालीद्रव्यविकल्पः।द
क्षाने रक्तवस्त्रोपरि प्रेतमातरः स्थापनं।कालीकरालीविकटाभीषणा च महोत्कटा।संहारिणी दुराधर्षा सेषेन
प्रेतमातरः।प्रेतमातृणामीशाने रुद्रकलशस्थापनं।भूरसीति क्रमेण।मध्ये पंचरत्नं।रुद्रकुंभं सवस्त्रं च सरत्नां
नः सपल्लवं।प्रतिष्ठा पूजा।धूपदीपनैवेद्यादि फलार्घतांबूलदक्षिणं सर्वं प्रेतमातृणां पूजनविधेः परिपूर्णता
अथ रुद्रकलशप्रार्थना।गंगाद्याः सरितः सर्वा तथातीर्थान्यनेकशः।आयांतु यजमानस्य दुरितक्षयकारकाः।रुद्र
कलशे संकल्पविधिना रुद्रगणश्राद्धं सव्येन कार्यं।वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः।अजैकपादं दहि
र्बुध्नः पिनाकी चापराजितः।भुवनाधीश्वरश्चैव कपाली च विशांपतिः॥स्थाणुर्भगश्च भगवान् रुद्रा एकादशा

भूं

स्मृताः॥ अथ प्रयोगः। देशकालौ स्मृत्वा अमुकगोत्रेत्यादि प्रेतत्वविमुक्तोत्तमलोकप्राप्त्यर्थं रुद्रगणश्राद्धमहं
करिष्ये॥ ब्राह्मणपाद्यासनादिक्रमेण सर्वं कार्यं। अत्रैकैकेनैकैकरुद्रनामग्रहणेनैकैकब्राह्मणभोजनं कार्यं। ए
वं चैकादश ब्राह्मणा भवंति। अशक्तेन सर्वोद्देशेनैक एव ब्राह्मणो भोजनीयः। ब्राह्मणभोजनाभावे एकादश
आमान्नानि भवंति। एकं वा। रुद्रगणश्राद्धं प्रेतोपकारार्थं कर्तव्यं। इति रुद्रगणश्राद्धं नारायणभट्टीपद्धतौ॥ स्रु
वः प्रतपनादि पर्युक्षणांते आज्यहोमः। आदौ इह रतिरित्यादाज्येन षडाहुतिः। आघारावाज्यभागौ च। ततो वह्निं
समर्चयेत्। रुद्रनाम्ने वैश्वानराय पूजनं। इह रतिः स्वाहा। इदमग्नये न मम। ॐ इह रमध्वं स्वाहा। इदमग्नये। ॐ इह
धृतिः स्वाहा। इदमग्नये। इह स्वधृतिः स्वाहा। इदमग्नये। उपसृजं धरुणं मात्रे धरुणो मातरं धयन् स्वाहा। इदमग्न
ये। ॐ रायस्पोषमस्मासु दीधरत् स्वाहा। इदमग्नये। प्रजापतये स्वाहा। इदं प्रजापतये। इंद्राय स्वाहा। इदमिंद्राय। अ
ग्नये स्वाहा। इदमग्नये। सोमाय स्वाहा। इदं सोमाय। रुद्रनाम्ने वैश्वानराय इदमावाहनं। इदमत्र चंदनं पुष्पं। अभिघा

र्थे पायसचरुहोमः। ॐ अग्नये स्वाहा। इदमग्नये। ॐ रुद्राय स्वाहा। इदं रुद्राय। शर्वाय स्वाहा। इदं शर्वाय। पशुपतये
स्वाहा। इदं पशुपतये। उग्राय स्वाहा। इदं उग्राय। ॐ अशनये स्वाहा। इदं०। ॐ भवाय स्वाहा। इदं भवाय। ॐ महादेवाय
स्वाहा। इदं महादेवाय। ॐ ईशानाय स्वाहा। इदमीशानाय। अथ पूष्णे चरुहोमः। अभिघार्य। पूषा गा अन्वेतु नः पूषा रक्ष
त्वर्वतः। पूषा वाजं सनोतु नः स्वाहा। इदं पूष्णे०। उभयोश्चरुशेषात् स्विष्टकृद्धोमः। ॐ अग्नये स्विष्टकृते स्वाहा। इद
मग्नये स्विष्टकृते। अथ भूरादि प्राजापत्यान्तान् वा कृत्वा ततो रुद्रकलशे रुद्रानुजपित्वा रुद्राध्याय जपः। ततः स
द्रकलशोदकेन वृषवत्सतरि एणां अभिषेकः। वत्सवत्सतरीणां एकां वा गोसहितवृषस्य मंत्रैरभिषेकः। वच्छि
काष्टौ चतस्रो वा द्वौ वा एका वापि भवति। अथाभिषेकमंत्राः। आपो हि ष्ठा ३ पुनंतु मा २ कयानश्चित्र ३ ततः रुद्रकलशो
दकेन वृषवत्सतरीणां स्नपनं। सुवर्णशृंगाद्यलंकरणं। कौसुंभवस्त्रवेष्टनं। वृषस्य कंठघंटाबंधनं। पार्श्वयोश्चामरं।
सूर्यपद्मबंधनं श्वेतवस्त्रेणाच्छादनं। उभयोः मदनफलबंधनं। कुंकुमेन वृषस्य चक्रत्रिशूलं कार्यं। त्रिशूलं दक्षिणे

र्श्वे वामे चक्रं तु विन्यसेत्। ललाटे तिलकं। पुष्पमालाद्यलंकरणं। ततो न्यासं प्रकुर्वीत स्वदेहे क्रमेण तु। हृषे त्वा वि
न्यसेन्मूर्ध्नि रुद्रमा रुद्राय शूलके। नमस्ते रुद्र वक्त्रे च ललाटे गोमहूषुणा। विद्याडित्यनुवाकेन नेत्रयोश्चोपसंस्पृशे
त्। प्राणदा इति नासाभ्यां श्रवतत्पुमुखे न्यसेत्। नीलग्रीवेति कंठे च मर्माणि बाहुमध्यतः। समिधाग्निं च बाहुभ्यां
नमो वः किरिके हृदि। नाभिर्मेद इति मंत्रेण नाभिस्थाने तु विन्यसेत्। पंचनद्येति कुक्षौ च कोसीति कटिं विन्यसेत्। परि
ति धन्वतु रुभ्यां उदुत्यं जंघयोर्न्यसेत्। इमं मे इति च पुच्छाग्रे एतावानस्येति पादयोः। एवं न्यासे कृते नूनं रुद्ररूपो भवे
द्ध्रुषः। अथ वक्ष्ये तरीन्यासः। गौरीं शिरसि विन्यस्य ललाटे पार्वती तथा। नेत्रयोर्विन्यसेद्गंगां कालिंदीं नासिके तथा।
महादेवीं मुखे न्यस्य कंठे लक्ष्मीं ततो न्यसेत्। गायत्रीं हृदये चैव सावित्रीं बाहुमध्यतः। नाभौ च विन्यसेत्स्वाहां स्वाहा
चैव स्तने न तु। ऊरू सरस्वती देवी भवानी पादयोस्तथा। खुरे च विश्वधारिण्यै खुराग्रे मंगला भवेत्। उमा पुच्छे धृति
शृंगे रुद्राणी शृंगमध्यतः। कौर्यै पृष्ठदेशे तु सर्वांगे शूलवाहिनी। एवं न्यासे कृते नूनं पार्वत्या च समाहिताः॥

अथ वृषभप्रार्थना॥ नंदिनीकुलसंभूतं वृषभत्वं रुद्रवाहनं। गवां कोटिसहस्राणां तासां त्वं वृषभस्तथा। ततो वत्सत
रीप्रार्थना। या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनुरूपेण सा देवी तस्य पापं व्यपोहतु॥ अथ वृषस्य दक्षि
णे जपः। तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि। तन्नो वृषः प्रचोदयात्। वत्सतरी दक्षिणकर्णे जपः। तीक्ष्ण
शृंगायै विद्महे वेदपादायै धीमहि। तन्नो गौरी प्रचोदयात्। उभयोः पूजनं। वृषमलंकृत्य रुद्रसूक्तं श्रावयेत्।
नमस्तेऽर्द्धहस्ते जलं आदाय। अपसव्यं। इमां वत्सतरीं यथाशक्त्यालंकृतां गोत्रस्य प्रेतस्य प्रेतत्वमोक्षार्थे रु
द्ररूपिणे वृषभाय तुभ्यमहं संप्रददे। यथाशक्तिहिरण्यदक्षिणां तुभ्यमहं। सव्यं। ततो गृहीतकुसुमांजलिः स
वृषं प्रदक्षिणमावृत्य नमस्कुर्यात्। नमस्कारमंत्रः। एनं वृषं गुणैर्युक्तं पतिं वो बलिनं शुभं। ददामि तेन सहि
ताः क्रीडध्वं हृष्टमानसाः। अयं हि तो मया दत्तः सर्वासां पतिरुत्तमः॥ तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः
ततःश्चतुष्कृत्वोग्निप्रदक्षिणं कारयित्वा तत्पुच्छे तर्पणं कुर्यात्। मनो मे तर्पयत। वाचं मे तर्पयत। प्राणं मे तर्पयत। च

चक्षुर्मे तर्पयत। श्रोत्रं मे तर्पयत। आत्मानं मे तर्पयत। प्रजां मे तर्पयत। पशून्मे तर्पयत। गणान्मे तर्पयत। अपसव्यं
अनादिनिधनो देवः गोत्रस्य प्रेतत्व निवृत्त्या उत्तमलोकप्राप्त्यर्थं वृषवत्सतरीपुच्छे तर्पणं मद्दत्तं तवोपतिष्ठतां
तर्पणं तेन तृप्तो हे न निर्हृदे वृं वृषं गुरुं॥ चक्रं त्रिशूलं तत्राकं ततो वै वृषमुत्सृजेत्। अथोत्सर्गः। उदङ्मुखो
पविश्य सव्येन पाणिना वृषपृष्ठं गृहीत्वा दक्षिणहस्तेन सहिरण्याः सतिलाः सकुशाः आपः आदाय अद्येत्यादि
देशकालौ स्मृत्वा एनं वृषं रुद्रदैवतं यथाशक्त्यालंकृतगंधपुष्पाद्यर्चितं त्रिशूलचक्रांकितं रुद्रदैवतमेवं विध
वत्सतरीसंयुतं अपसव्यं। अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वमुक्तिपूर्वकाक्षयस्वर्गलोकप्राप्तिकामः अहमु
त्सृजामि। एनं युवानं पतिं वो ददामि तेन क्रीडतीश्वरथ प्रियेण मानः सामप्रजान्नुषा राय स्पोषेण समिषामदेम।
इत्युक्त्वा प्रेतायस्तं तारयंतु सर्वदा। इत्युच्चार्य सहिरण्यं सतिलमुदकं भूमौ निक्षिपेत्। सव्यं। ततो वत्सतरीम
ध्यस्थितस्य मयोभूरित्यनुवाकेनाभिमंत्रणं। मयो भूरग्निमाद्या हि स्वाहा। मारुतो सीत्या दिस्वर्णी सूर्यः स्वाहे त्यंते

नाम्। अथ विसर्जनमंत्रः। मुक्तस्त्वं नो मया वत्स गच्छ त्वं तत्र वरोचते। चर त्वं वनसहस्रेषु क्रुरु क्रीडां च गोकुले। धर्मस्त्वं
वृषरूपेण ब्रह्मणा निर्मितः पुरा। तवोत्सर्गप्रभावेन प्रेतोद्धर भवार्णवात्। नमस्कारमंत्रः। नमो वृषभदेवेशान्-
तर्पितपितृपोषक। त्वयि मुक्ते ऽस्य ये लोकाः प्रेताः संतु निरामयाः॥ ततो दक्षिणस्कंधेन वृषभस्य ईशान्यां वा प्राची-
प्रेरणं॥ यश्चेद्दं यूपं पर्यटेति मंत्रेण। मम मुक्ते मया स्कंधे यत्र यत्राति रोचते। तुभ्यं ये विघ्नकर्तारः पतंतु नरके ध्रुवं।
ततो यजमानेन ब्राह्मणान् प्रत्येवं वक्तव्यं। अत्रोत्सृष्टं वृषवत्सतयादिकेन चिह्नेन न नेयं। न विमर्द्यमपि देयं। ततो
बहुलक्षणे दक्षयुक्ते देशे महति गोकुले वा तं रक्षेत्। ततः कर्म समापनीयं। संस्रवप्राशनं। आघ्राणं वा। पवित्र-
योमार्जनं। पवित्रप्रतिपत्तिः। प्रणीताविमोकः। ब्रह्मणे पूर्णपात्रदानं। कृतस्य वृषोत्सर्गसांगतो कर्मणः सांगतासिध्यर्थं
दास्यमानं पूर्णपात्रं ब्रह्मन् तुभ्यमहं संप्रददे। सहिरण्यं रुद्रकुंभं पयस्विनीं धेनुं च वस्त्रयुग्मं सुवर्णं घृतसंयुक्तं वा
स्पात्रं आचार्याय देयं। ततः स्वशाखाविधानानुसारेण पायसेन मधुसर्पिर्भ्यां युक्तेन अन्नेन एकादश ब्राह्मणान् भो-

ज्ञानपर्याप्तमन्त्रसंकल्पः। अशक्तौत्रीणि। एकंवा। वृषोत्सर्गसांगतासिध्यर्थं यथासंख्याकान्ब्राह्मणान्भोजनेन
हंतर्पयिष्ये। तेनभगवतः कर्मांगदेवताः प्रीयतां। ततोब्राह्मणान्स्वस्तिवाच्यतेभ्योदक्षिणांदद्यात्। अद्यपूर्वो
च्चरितएवंतांब्राह्मणानांवचनात्श्रीविष्णोः प्रसादात्। वृषोत्सर्गस्यविधेः परिपूर्णता। अनेनवृषोत्सर्गकर्म
णाकृतेनअपसव्यंगोत्रस्यप्रेतस्यप्रेतत्वनिवृत्तिः। असद्गतिविनाशः सद्गतिप्राप्तिः। अग्रेआद्यश्राद्धयोग्यताप्रा
प्तिः। स्नात्वाआद्यश्राद्धंकुर्यात्॥ ॥इतिवृषोत्सर्गः॥ ॥अथआद्यश्राद्धं॥ वत्सपादांकितांभूमौपरित्यक्तांचभूमिषु॥
आद्यश्राद्धंतुयः कुर्यात्वृषाभावेपतितस्तदा। आचमनं॥ कुशोपग्रहोबद्धशिखः। दक्षिणामुखोपवित्रपआत्मस
न्मुखः एकः घटस्थापनीयः। अपसव्यं। तिलान्गृहीत्वाघटंस्पृष्ट्वामंत्रंपठेत्। गतोसिदिव्यलोकत्वंकृतांतविहि
तात्पथात्। मनसावायुभूतेनविप्रेत्वाहंनिमंत्रयेत्। अथवाघटेत्वाहंनिमंत्रयेत्। पादार्घः। गोत्रप्रेतआद्यश्रा
द्धनिमित्तंएतत्तेपाद्यं। पुष्पं। पादार्घेदमासनं। सव्यंस्वपादप्रक्षालनं। आचमनं। कुशोपग्रहो। प्राणायामः। अ

सव्यं। तूष्णीं दिग्बंधः। सव्यं। ततः कर्मार्थं जलाभिमंत्रणं। यद्देवा॰। अपसव्यं। पाकप्रोक्षणं। दुष्टदृष्ट्यादिनिपातदूषि
तः श्राद्धपाकः सोपहारः पूतोऽस्तु। सव्यं। देशकाल॰ संपत्। अद्येत्यादि॰ पूर्वोक्त एवं गुण विशिष्टायां पुण्यतिथौ॰
50 अपसव्यं। गोत्रस्य प्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गलोकप्राप्तिकाम मरणदिनादारभ्य एकादशेऽहनि महै
कोद्दिष्टमाद्यश्राद्धमहं करिष्ये। आसनदानं। गोत्रस्य अमुकप्रेतस्य इदमासनं मद्दत्तं तवोपतिष्ठतां। हस्त
पादप्रक्षालनं। उपयह्विष्टरार्थाद्भूमेक्षणाः। अर्घपात्रपूरणं। एकं पवित्रं निधाय पात्रे शन्नो देवीत्युदकपूर्णं। तिलो
ऽसि सोमदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तैत्तः प्रेतान्लोकान्प्रीणाहि नः स्वाहा। दूदमत्र चंदनं पुष्पं
अर्घपात्रस्यार्चनविधेः परिपूर्णता। अस्त्विति उपवित्रार्पणं। पूजनं। अर्घं गृहीत्वा या दिव्या॰ त्वा। गोत्र अमुकप्रेत
आद्यश्राद्धनिमित्तं एष तेऽर्घो मद्दत्तः स्त तवोपतिष्ठतां। पात्रमुत्तानमेव स्थापनीयं। न तस्य न्युब्जीकरणं। ततः घट
पूजनं। तिलोपचारं कृत्वा चंदनपुष्पं धूपं दीपं वस्त्रदानं। घटोपरि उदकं कृत्वा। इदं चंदनं गोत्रप्रेत तेऽपतिष्ठतां। इ

तिचंदनसमर्पणं।पुनरुदकंदत्वाइमानिपुष्पाणिगोत्रप्रेततेउपतिष्टतां।पुनरुदकंदत्वा।गोत्रप्रेतएषधूपस्तेउपति
ष्टतां।इदंवोज्योतिः।अस्यश्राद्धस्यार्चनविधेःपरिपूर्णता।सव्यं।आचमनं।अपसव्यं।घृताक्तमन्नमुद्धृत्यएकस्मिन्पात्रेपरि
वेषणं।नपात्रालंभावगाहो।कृतंत्वासत्येनाभिषिंचामितिअन्नाविकिरः।अपहता०द्।यथाशाखंयुग्मब्राह्मण
भोजनसंकल्पः।अद्यअमुकएकएव।इदमन्नंघृताद्युपस्कररसहितंयद्दत्तंअपरंदास्यमानंयथासंख्याकंब्राह्मणभोज
नंमहत्त्क्षुधोपशमनार्थंगोत्रायअमुकप्रेतायमद्दत्तंतवोपतिष्टतां।इदमन्नंप्रेतायउपतिष्टतु।सकृत्त्वापो
दत्वा।सव्यं।गायत्रीजपित्वा।अत्रनरेखाकरणं।अवनेजनं।अमुकगोत्रअमुकप्रेतएकादशाहनिमहैकोद्दिष्ट
श्राद्धनिमित्तंपिंडस्थानेअवनेजनंमद्दत्तंतवोपतिष्टतां।समूलदर्भास्तरणं।तत्रपिंडदानं।एकःपिंडः॥
अमुकगोत्रअमुकप्रेतमरणदिनादारभ्यएकादशाहनिमहैकोद्दिष्टश्राद्धनिमित्तंएषपिंडोमद्दत्तस्तवोपतिष्ट
तां।प्रत्यवनेजनं।हस्तप्रक्षालनं।तूष्णींसूत्रदानं।चंदनं।अयंतेगंधःउपतिष्टतां।इदंपुष्पंतेउप०।एषधूपंतेउ०।

51

एषदीपते॰इदंफलंतेउप॰इदंनैवेद्यंगोत्रप्रेततेउपतिष्ठतु।इदंतांबूलंते॰इतिप्रतिद्रव्यंप्रयोगः।अत्राच्छादन
गंधपुष्पधूपदीपफलार्घैरन्नैर्नैवेद्यतांबूलैःपिंडस्यार्चनविधेःपरिपूर्णता।अनेनपिंडदानेनगोत्रस्यप्रेतस्यप्रेत
त्वनिवृत्तिःअसद्गतिविनाशःसद्गतिप्राप्तिः।सव्यं।आचमनं।उपग्रहकुशत्यागः।पुनःकुशोपग्रहः।ततःच
शेपरिजलपुष्पाक्षतान्तूष्णींमेवार्पयित्वाअक्षय्योदकंदद्यात्।गोत्रस्यअमुकप्रेतस्ययद्दत्तमन्नपानादिकंत
दुपतिष्ठतां।यस्योद्दिष्टंतस्योपतिष्ठतां।ततःपवित्रंतूष्णींपिंडोपरिनिधायपिंडोपरितिलोदकेनसदुग्धेनजल
धारांकुर्यात्।अनादिनि॰।गोत्रप्रेतपिंडस्योपरिजलधारापयधारातेउपतिष्ठतां।अथदक्षिणासंकल्पः।अस्यआ
द्यश्राद्धस्यप्रतिष्ठासिध्यर्थंरजतदक्षिणांतन्मूल्योपकल्पितंद्रव्यंमनसोद्दिष्टंगोत्रायप्रेतायमयादत्तंतवोपतिष्ठतां।छ
त्रोपानहदानं।सव्यं।आद्येत्यादिएवंतिथौअपसव्यं।गोत्रस्यप्रेतस्यपरलोकेआतपनिवारणार्थंछत्रंसदक्षिणं
तेउपतिष्ठतां।दास्यमानंउपानहयुगलंउत्तानांगिरोदैवतेगोत्रायप्रेताययममार्गेशीततप्तवालुकाकंटकनि

=भाजनं भोजनाधारं छत्रौपानत्कमंडलुं मुद्रिकामासनं वस्त्रं पदमष्टविधं स्मृतमिति=

वारणार्थं कस्मै विद्वद्ब्राह्मणाय मद्दत्तं। उपानहद्दानमंत्रः। असिपत्रवनं घोरं तप्तभूकंटकैर्युतं॥ तत्रोपानहद्दानेन सुखी भवतु निश्चितं॥ अथ कमंडलुदानं॥ दास्यमानं कमंडलुपात्रं सजलं वरुणदैवतं गोत्राय प्रेताय परलोके महत्तृषानिवृत्त्यर्थं कस्मै विद्वद्ब्राह्मणाय मद्दत्तं। अथ कमंडलुदानमंत्रः। बहुघर्मसमाकीर्णे निवाते तोपवर्जिते। कमंडलुप्रदानेन सुखी भवतु निश्चितं। ततः यज्ञोपवीतदानं। प्राजापत्ये उपवीते। पददानं। दास्यमानानि त्रयोदश अथ वा यथासंख्याकानि अष्टविधानि पदानि सभोज्यानि गंधाद्यर्चितानि नानादैवतानि नानागोत्रेभ्यो ब्राह्मणेभ्यो दास्यमानानि गोत्राय प्रेताय उपतिष्ठतां। एभिः पददानैः गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः सद्गतिप्राप्तिः। अथ शय्यादानं॥ अद्येत्यादि देशकालौ स्मृत्वा दास्यमानं शय्यां यथोपस्करसहितां विश्वकर्मदैवतां सदक्षिणां गोत्राय प्रेताय परलोके अक्षय्यशयनप्राप्त्यर्थं सुखशयनार्थं कस्मै विद्वद्ब्राह्मणाय सपत्नीकाय ते उपतिष्ठतां॥ अथ शय्यादानमंत्रः। यथा न कृष्णशयनं शून्यं सागरजातया। शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि। प्रेतसंबंधि

वस्त्राभरणादीनां दानं। इमानि प्रेतसंबंधीनि वस्त्राभरणानि। शय्यां। गां। गृहं। आसनं। दासीं। आयुधानि। अश्वारथ
गजा। महिषी। भूमि। तिला। हिरण्यं। तांबूलं। अयमश्वो यमदैवतो गंधाद्यर्चितो यथोपपन्नोपस्करसंयुक्तः कस्मैचि
52 त्। एवं सर्वत्र दानेषु प्रयोगस्तूह्यः। अयं रथो विश्वकर्मदैवतः। अयं गजः। इयं महिषी यमदैवता। इयं शय्या। इयं
गौ। इयं भूमिः। इमे तिलाः। इदं हिरण्यं। इदं तांबूलं। इमानि पुष्पाणि। इमान्यन्नानि दानानि। चतुर्दशोपदानानि
गोत्राय प्रेताय ते ३। इति यथायथं प्रयोगः। ब्राह्मणेभ्यो दास्यमानः। दास्यमानानि। दास्यमानं। इति च यथायथं प्रयो
गः। अन्नं वा सोदकं चैव वस्त्रं पानं हि कमंडलुं। छत्रं वस्त्रं तथा यष्टिं लोहदंडं तथाष्टमं। अग्निष्टिकां च दीपं च तिल
तांबूलमेव च। चंदनं पुष्पदानं च उपदानान्यनुक्रमात्। तिलपात्र घृतपात्र दानं। क्षीरमण्येवं शपात्री दानं। त
त्र प्रयोगः। इयं वंशपात्री सुपक्वोपस्करसर्ववस्तुसंयुक्ता गंधाद्यर्चिता कस्मैचिद्दास्यमाना गोत्राये प्रेताये ३ प। अथ
नित्यान्नदानसंकल्पः। एकादशाहारभ्य प्रथमसंवत्सरांतिमदिनपर्यंतं सान्नजलपूर्णकुंभदानं। संवत्सरपर्यंतं ५२

दीपदानं। विप्रायनदीतीरे मार्गे देवालये तथा। प्रेतोद्देशेन कर्त्तव्यं दीपं संवत्सरावधि। रात्रौ दीपोज्ज्वालनं। ऋणधेनुप्र
नं। तत्र प्रयोगः। देशकालाद्युच्चार्य प्रेतस्य ऋणत्रयस्यापकर्षणार्थं इमां ऋणधेनुसंज्ञिकां गां सदक्षिणां रुद्रदैवतां क
स्मैचिद्ब्राह्मणायेत्यादि। अनेन ऋणधेनुदानेन प्रेतस्य ऋणत्रयाद्विमुक्तिः। दास्यमानं संवत्सरपर्यंतं नित्योदकं
तृषोपशमनार्थं गोत्राय प्रेताय मद्दत्तं तवोपतिष्ठ॰। दीपदानं करिष्यमाणं प्रत्यहं अथवा एकस्मिन्दिने तंत्रेण य
थाकाले गोत्राय प्रेताय तमोनिवृत्त्यर्थं मद्दत्तं॰ सव्यं। अत्र च पूर्वोच्चरित॰ श्रीविष्णोः प्रसादात्। अपसव्यं। गोत्रस्य
प्रेतस्य एकादशाहविहितस्याद्यमासिकस्य नवमिश्रैकोद्दिष्टविधिना कृतस्य विधेर्यन्नूनं यदतिरिक्तं तत्सर्वं प
रिपूर्णतां। अनेन महैकोद्दिष्टआद्यश्राद्धकर्मणा कृतेन गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः। असद्गतिविनाशः स
द्गतिप्राप्तिः। अग्रेतु नमासिकादि पंचदशश्राद्धयोग्यताप्राप्तिः। पिंडोद्धरणं। पिंडप्रवाह्यनायोत्म। मृताहनितु
कर्त्तव्यं प्रतिमासं तु वत्सरं। प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि॥ ॥इत्याद्यश्राद्धं॥ ॥अथ मासिकश्राद्धं॥

अथवा द्वादशाहे मासिकश्राद्धानि कर्त्तव्यानि यथाकालं कुर्यादेकादशेहनि। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः
53 क्षयात्॥ अस्थिरेषु शरीरेषु द्वादशाहो विशिष्यते। तथैवैकादशाहोपि मासिकानां विशिष्यते। मासिकानि द्वा
दशाहे सपिंडस्यात्रयोदशे। इति बौधायनः प्राहनैकस्मिन्दिवसे द्वयं। द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिंडनं।
एकादशे ह्निकुर्वीत प्रेतश्राद्धानि षोडश इति। आचमनं। प्राणायामः। कुशोपग्रहः॥ संकल्पः। अद्येत्यादि एवं
गुण॰ तिथौ। अपसव्यं। गोत्रस्य प्रेतत्वविमुक्तिपूर्वकाक्षय स्वर्गलोकप्राप्तिकाम प्रेतस्यैकादशाहे अथवा द्वादशा
हे मासिकश्राद्धार्थंनिमित्तं विष्णोः पूजनमहं करिष्ये। षोडशोपचारैरशक्तौ पंचोपचारैर्वा यथोक्तं पूजनं कुर्या
त्। यदा एकादशाहे मासिकश्राद्धं करोति। तदा विष्णोः पंचोपचारैः पूजनं कर्त्तव्यं। विष्णुपूजानंतरं दक्षिणाभिमु
ख उपविश्य। अपसव्यं कृत्वा। प्रागग्रेषु कुशेषु उदङ्मुखानां पंचदशघटानां स्थापनं। अधिमाससंभवे षोडशा
नामपि। प्राक्संस्थश्राद्धकर्त्तव्यं। प्रथमघटे कुशाति लान्गृहीत्वा गतोसि दिव्यलोकत्वं॰ इति मंत्रेण आद्यश्राद्ध

=आद्यमासिकवत्पंचदश श्राद्धानि पृथक्कर्तव्ये तेषां समाप्ति तिकेचिदिति नाम = ५३

वत्।सर्वेषु चटेषु पृथक् पृथक् निमंत्रणे मंत्रोच्चार्यः। पादार्घः। गोत्र प्रेत ऊनमासिकश्राद्धनिमित्तं एतत्ते पाद्यं। पाद्
र्घेऽर्द्द माचमनीयं। एवं सर्वत्र। अद्वितीय चटे गोत्र नामोच्चारणादि पूर्ववत्। द्वितीचटे द्वितीयमासिक निमित्तं ए
तत्ते पाद्यं। तृतीय चटे त्रिपाक्षिक निमित्तं। चतुर्थ चटे तृतीयमासिकः। पंचम चटे चतुर्थमासिक। षष्टे चटे पंचम
सिक। सप्तमे चटे षष्टामासिका। अष्टमे चटे ऊनषण्मासिक। नवमे चटे सप्तमासिक। दशमे चटे अष्टमासिक
एकादशे चटे नवमासिक। द्वादशे चटे दशममासिक। त्रयोदशा चटे एकादशमासिक। चतुर्दशे चटे द्वादशमा
सिक। पंचदशे चटे ऊनाब्दिक निमित्तं। अधिमासश्चेत्षोडशा चटे अधिमास निमित्तं। नचेत्पंचदशा चटे दूतिक्र
मेण पादार्घः। सव्यं। स्वपादप्रक्षालनं। आचमनं। उपयहत्कुशत्यागपूर्वकं पुनः कुशोपग्रहो। प्राणायामः। अपस
व्यं। तूष्णीं चतुर्दिक्षु तिलविकीरणं। तूष्णीं निविबंधनं। सव्यं। कर्मपात्रकरणं। यद्देवा० अपसव्यं। पाकप्रोक्षणं॥
दुष्टदृष्ट्यादि। देशे काल पाकपात्र द्रव्य श्रद्धा संपत्। पात्राद्य मासे पक्षे तिथौ अमुकवासरे एवं गुण। तिथौ। अपसव्यं।

54

गोत्रस्य प्रेतस्य प्रेतत्व निवृत्यर्थं असद्गति विनाशनार्थं सद्गति प्राप्त्यर्थं ऊनमासिकाद्यारभ्य ऊनाब्दिकान्तानि पंचदश
श्राद्धानि सपिंडीकरणकालापकर्षेण प्रेतोद्दिष्ट विधिना एकतंत्रेण अहं करिष्ये। आसनं। गोत्रस्य प्रेतस्य ऊनमासि
कश्राद्ध निमित्तं हस्त प्रक्षालनं। उपय॰। एवं सर्वत्र आसनं। पंचदश अर्घपात्र पूरणं। पंचदश पवित्राणि। शन्नोदे
वी त्यूदकं। तिलोसि॰। आद्यश्राद्धवत्। इदमत्र चंद॰। प्रेतपात्राणां अर्घोर्चन विधेः। अर्घदानं। आसिंचतु पवित्रा
र्पणं पूजनं। यादिव्या। गोत्र प्रेत ऊनमासिक निमित्तं एष वो र्घे मद्दत्तस्तवोपति॰। एवं द्वितीयमासिक निमित्तं॰। त्रै
त्रिपाक्षिक निमित्तं॰। तृतीयमासिक॰। चतुर्थ॰। पंचममा॰। षण्मासिक॰। ऊनषण्मासिक। सप्तम॰। अष्टम॰। नवम॰
दशम॰। एकादश॰। द्वादश॰। ऊनाब्दिक घट पूजा सर्वेषु घटेषु। चंदनं॰। पुष्प॰। धूपदी॰। १५ यथाशक्ति वस्त्र संकल्पः।
अत्र चंदनगंध पुष्प धूप दीप वासांसि यथादत्तं गंधाद्यर्चनं गोत्राय प्रेताय ऊनमासिकादि ऊनाब्दिका पर्यंतानां
एकतंत्रेण अर्चनं मद्दत्तं तवोपतिष्ठतां। अमीषां पंचदश मासिक श्राद्धानां अर्चन विधेः। सव्यं। आचमनं। अ

पसव्यं। पंचदशाचयनामध्ये घृताक्तमन्नपरिवेषणं। प्रथमपात्रे श्रृतं तत्वा। कुशातिलोदकमादाय। इदमन्नं घृत
स्तुपस्करसहितं यद्दत्तं परं दास्यमानं प्रेताय तदुपतिष्ठतु। एवं सर्वेषु चरेषु भोजनसंकल्पः। सव्यं। गायत्रीं जपित्वा।
अपसव्यं। अवनेजनं। अत्र नरेखाः कार्याः। गोत्र प्रेत ऊनमासिकश्राद्धनिमित्तं पिंडस्थाने अवनेजनं यद्दत्तं त
वोपतिष्ठतां। एवं द्वितीयादि सर्वत्र। कुशानास्तीर्य सर्वत्र। पिंडदानं। गोत्र अमुक प्रेत ऊनमासिकनिमित्तं एष पि
डो मद्दत्तस्तवोपतिष्ठतां। एवं द्वितीयादिक्रमेण पंचदश पिंडाः देयाः। हस्तप्रक्षालनं। प्रत्यवनेजनं। निवीविसं
सनं। सूत्राच्छादनं। चंदनपुष्पधूपदीपनैवेद्यफलार्घ्यप्रतांबूलतिलकुशजलान्यादाय। अत्राच्छादनगंधपु
ष्पधूपदीपफलार्घतांबूलगोत्राय प्रेताय मद्दत्तं तवोपतिष्ठतां। पिंडानामर्चनं। एभिः पिंडदानैः कृतैः गोत्रस्य प्रे
तस्य सद्गति उत्तमलोकप्राप्तिः। सव्यं। आचमनं। अक्षय्योदकदानं। अपसव्यं। कुशोदकं गृहीत्वा। गोत्रस्य प्रेतस्य
ऊनाब्दिकश्राद्धे यद्दत्तमन्नपानादिकं तदुपतिष्ठतां। एव द्वितीयमासिकादिश्राद्धे। एवं सर्वत्र। पिंडानामुपरि प

= तत आद्यादिकमपि कार्यं। आद्यमासिकेन तंत्रेण सिद्धेन ... कार्यं। किंतु आद्यमासिकं आद्यादिकं च तंत्रेण—
— कार्यं प्रतिसंकल्पमिति केचिदिति नारा॰ =

55

त्येकं पवित्रं निधाय पिंडोपरि जलधारा पयधारा कर्त्तव्या। अमादि नि॰ गोत्र प्रेत जलधारा पयधारां ते उपतिष्ठतां। दक्षि
णा संकल्पः। अस्य मासिकश्राद्ध प्रतिष्ठासिध्यर्थं दास्यमानां रजत निष्कृति दक्षिणां तु न मासिकादि तु नाह्निकानां पं
चदश श्राद्धानां प्रत्येकं प्रत्येकं मद्दत्तं। षोडश दान संकल्पः। अंजनं पादुकां यष्टिं छत्रं चामर दर्पणं। मुकुटं दधितांबू
लं चंदनागरु केसरां कस्तूरिक पूर्वं हेम घृतकुंभश्च षोडश। षोडशदाननिमित्तं यथाशक्ति मनः संकल्पितं द्रव्यं।
गोत्र प्रेत उपतिष्ठतां। सर्वा पाप धेनु संकल्पः। सुखावलोकनं। अद्य पूर्वोच्चरित ॰ पंचदशश्राद्ध परिपूर्णता। एभिः
पंचदशश्राद्धैः कृतैः अपसव्यं गोत्रस्य प्रेतस्य प्रेतस्य प्रेतत्व निवृत्तिः। असद्गति विनाशः सद्गति प्राप्तिः। अग्रे स
पिंडीकरण श्राद्ध योग्यता प्राप्तिः। पिंडोद्धरणं। सव्यं। चट विसर्जनं। पिंड प्रवाह स्नात्वा विष्णोः पूजनं। यस्य स्मृत्या
दिति। ततो गृहमागत्य वैश्वदेवः। शांतिपाठः। स्वचं वाचं अध्याय शांति सूक्तः। यच्चैव दद्याद्विप्रेभ्यो श्रुतं वा यदि
वाऽश्रुतं। तेनामीकरणं। कुर्यात्पिंडास्तेनैव निर्वपेत्। पक्वेन कुरुते पिंडान् विप्रेष्वामं प्रयच्छति। उनो तो मनुना ५५

=पाकश्राद्धे षोडशपाका अशक्तावेकपाकं तस्मादेवोदनमे इतिनामाधारणं तृतः ।=

प्रोक्तो नरकाद्धीनसंशयः ।तथा। आमश्राद्धं यदा कुर्यात् पिंडदानं कथं भवेत् । गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा
॥ ॥अथ सपिंडीकरणस्येतिकर्तव्यता लिख्यते ॥ ॥तत्रादौ श्राद्धकर्ता स्नानं माध्याह्निकं च कृत्वा शुचिः सन् गोमयोप
लिप्तस्थले कृततंत्रोपग्रहः स्वाचांतो विष्णोः षोडशोपचारैः अशक्तौ पंचोपचारैर्वा यथोक्तं पूजनं कुर्यात् । सा
ग्निकश्चेत् । श्राद्धकर्ता तदा तर्पणानंतरं श्राद्धात्पूर्वं वह्नेश्वदेवं कुर्यात् । निरग्निकश्चेत्कर्ता तदा श्राद्धं समाप्य तं कु कृत्वाइदंकु र्यात
र्यात् । सपिंडीकरश्राद्धार्थं चरुपाकद्वयं कार्यं । आचमनं । आधारं नः । प्राङ्मुखः विश्वेदेवाः । कर्ता उदङ्मुखः । यवा
न्गृहीत्वा दैवे क्षणः क्रियतां तथा प्राप्नोतु भवान् प्राप्नवाम । अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः । भवितव्यं भ
वद्भिश्च मया च श्राद्धकारिणा सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः । भवद्भिर्दैवकार्यं नः संपाद्यं मे प्रसीदता
भवतां आगतं सुस्वागतं । कालकामसंज्ञका विश्वेदेवा एतद्वः पाद्यं । पादावनेजनं । पादप्रक्षालनं । एष वोऽर्घः इ
दमत्र चंदनं च पुष्पं । पादार्घेदमाचमनीयं । एवं द्वितीयस्या । अपसव्यं । ततः कर्ता दक्षिणामुखोपविश्य प्रेतास

नार्थं उत्तराभिमुख एकस्य पादप्रक्षालनं। करोति। तिलान्गृहीत्वा॰ गतासि दिव्यलोकत्वं कृतांत विहिता त्वया तत्॥

56 मनसा वा यदुक्तेन विप्रेत्वाहं निमंत्रयेत्॥ गोत्रे अमुकप्रेते एतत्ते पाद्यं। ततः प्रेतस्य पितृपितामहप्रपितामहानां

पार्वणं। तदर्थं त्रयाणां पादप्रक्षालनं। विपरीतं वा। पूर्वं पार्वणं। पश्चादेकोद्दिष्टमिति। तत्र पार्वणे सर्वं दर्शवत्॥

अथ कर्तव्यता। प्रेतस्य पादप्रक्षालनादनंतरं पितॄणां पादार्घः। तिलान्गृहीत्वा। प्रेतपि॰ येसेन श्वश्रूस्वएव क्रियतां

श्वश्रू तथा कामक्रोधविवर्जितैः। भवद्भिः प्रेतपितृकार्ये नः संपाद्यं मे प्रसीदत। भवतां॰। गोत्राः प्रेतपितृपितामहप्रपि

तृपितामहप्रपितामहाः अमुकामुकशर्मणः वसुरुद्रादित्यस्वरूपाः एतद्वः पा॰ स्वधा। अस्मिन्श्राद्धे अतिथियज्ञ

नं इच्छावेत्॥ कर्तव्यं। अकरणे न दोषः। कृते महत्फलं भवति। अतः परं स्वपादप्रक्षालनं। आचमनं। उपग्रहकुशात्पाणौ

पुनः कुशोपग्रहः। प्राणायामः। ब्राह्मणः प्रसादं कृत्वा श्राद्धं कारयध्वं। ॐ कुरुष्वा दिग्बंधः। अपसव्यं। अग्निष्वात्ता

पि॰ यमो रक्षां करोतु मे। निवीबंधनं। निहन्मि॰। तिलान् रसं ल॰ सर्वं। पंक्तिवैश्यो॰ श्राद्धभूमौ गया॰ सप्तव्याधा॰ देवता ५६

गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्त्या पितृलोकप्राप्त्यर्थं गोत्रे अमुकामुकशर्मणि वसुरुद्रादित्यरूपे पितृपितामहप्रपितामहैः स
हसपिंडीकरणं मृताहाद्द्वादशाहे पार्वणैकोद्दिष्टविधानेन करिष्ये। मातुस्तु॰ गोत्रायाः प्रेतायाः अमुकिदास्याः अस्मत्पिता
महीप्रपितामहीवृद्धप्रपितामहीभिः सहेति विशेषः। एवं मातामहादेरपि इति नारा॰ — ×अस्मन्मातुः×

न्यः॰ गयायै नमः। गदाधराय॰ गयायां पितृरूपेण रूपेण॰ ततः कर्मार्थं जलाभिमंत्रणं। कर्मपात्रे आसनं। आसने पात्रं
पात्रे कुशाः। तूष्णीं जलपूरणं। मध्ये कुसुमाक्षततिलप्रक्षेपः। गायत्री १० यद्देवा॰ अपसव्यं पाकप्रोक्षणं। दुष्टदृष्ट्यादि
निपातदूषितः श्राद्धपाकसोपहारः पूतो भवतु। सव्यं देशकालौ॰ पत्मा॰ अद्येत्यादि॰ तिथौ। अपसव्यं। गोत्रस्य प्रेत
स्य प्रेतत्वनिवृत्त्यार्थं असद्गतिविनाशनार्थं सद्गतिअक्षय्यलोकप्राप्त्यर्थं वसुरुद्रादित्यलोकप्राप्त्यर्थं च गोत्राणां प्रे
तपितृपितामहप्रपितामहानां अमुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां विश्वेदेवापूर्वकं सैकोद्दिष्टं पार्वण
विधिना युष्मदनुज्ञया सपिंडीश्राद्धमहं महं करिष्ये। सव्यं। कालकामसंज्ञिकानां विश्वेषां देवानां इदमासनं। स्वाहा
हस्तप्रक्षालनं। उपयह विष्टरार्थाद्दूमे कुशाः। एवं द्वितीयस्या॰ अपसव्यं। गोत्रस्य प्रेतस्य इदमासनं मया दत्तं तवो
पतिष्ठतां। हस्त॰। उप॰। सव्यं। का गोत्राणां प्रेतपितृपितामहप्रपितामहानां अमुकामुकशर्मणां वसु॰। इदमा
सनं स्वधा। हस्त॰। उप॰। सव्यं। कालकामासंज्ञकान् विश्वान्देवान् आवाहयिष्ये। ॐ आवाहय। विश्वेदेवास आ

= प्रेतपात्रे चत्वारि पवित्राणि एकं प्रेताय। एकैकं संयोजनार्थं पितृपात्रेषु करणीयेति नारा॰ =

57 गत॰ विश्वेदेवाः शृणु॰। आगच्छंतु॰। ततः पार्वणे आवाहनं। एकोद्दिष्टेन आवाहनं। अपसव्यं। गोत्रान् प्रेत पितृपितामह प्र
पितामहान् अमुकामुकशर्मणः वसुरुद्रादित्यस्वरूपान् आवाहयिष्ये। आवाहय। उशंतस्त्वा॰ आयंतु न इति जपित्वा।
सव्यं। अर्घपात्रपूरणं। विश्वेदेवा पात्रे पवित्रे द्वे। शन्नोदेवीत्युदकप्रक्षेपः। यवोसीति यवाः। इदमत्र त्वं॰। देवपात्रयोः
अर्घार्चनविधेः परिपूर्णता। अपसव्यं। प्रेतपात्रे एकं पवित्रं सूत्रवेष्टितं निधाय। शन्नोदेवी॰। तिलोसि सोमदेवत्यो गो
सवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः प्रेतान्लोकान्प्रीणाहि नः। इदम॰। ततः प्रेतपात्रस्यार्घार्चस्य पूर्णता। ततः पि
तृपात्राणां पूरणं। पवित्रत्रयं सर्वत्र। शन्नो॰ तिलोसि॰। इदमत्र। प्रेतस्य पितृ॰ णां अर्घार्चनविधेः परिपूर्णतास्तु। स
व्यं। आसिंचतु स्वाहार्घे जवं तु। अस्तु स्वाहा। पवित्रार्पणं पूजनं। विश्वेभ्यो देवेभ्यः इदं पुष्पं। अर्घं गृहीत्वा प्रेषं कुर्यात्
या दिव्या॰ सुहवा नवन्तु। कालकामसंज्ञिका विश्वेदेवा एष तेऽर्घः। एवं द्वितीयः। अपसव्यं। प्रेतस्यार्घदानं। पवित्रार्पण
पूज॰ गोत्राय प्रेताय इदं पुष्पं या दिव्या॰ तु चतुर्थीशा जलसेचनं गोत्र अमुकप्रेत एष हस्तार्घो महत्तस्ते वोपतिष्ठतां। त ५७

= अमुकगोत्रस्यामुकप्रेतस्यार्घपात्रोदकं अमुकगोत्राणां अमुकामुकशर्मणां प्रेतपितृपितामहप्रपितामहानां अर्घपात्रोदकेन =
= संयोजयितुं ... इति प्रत्युक्तिः। पितामहादीनां ... प्रेतार्घ्यजलम् आदौ पितृपात्रे किंचित् संयोज्य ... वशिष्टेन ...
= ... पादित्यक ... नारा =

तः प्रेतपात्रं पितृपात्रे ष्वासिंचति। प्रेतार्घपात्रादवशिष्टजलं पित्रादिपात्रेषु विभज्य तृतीयांशान् निनयेत्। पवित्रं चाखं
डमेव सर्वत्र संचारयेत्। तत्र प्रयोगः। सव्यं। अद्येत्यादि० एवंगुण० तिथौ अपसव्यं। अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्व
निवृत्यर्थं पितृलोकप्राप्त्यर्थं अमुकगोत्रैः अमुकशर्मभिः वसुरुद्रादित्यरूपैः अस्मत्पितृपितामहप्रपितामहैः सहार्घ
संयोजनमहं करिष्ये। संयोजनैर्येत्यनुज्ञातोऽर्घं संयोजयेत्। प्रेतपवित्रं पितृपात्रे निधाय प्रेतार्घपात्रं गृहीत्वा
गोत्रस्य अमुकप्रेतस्य अर्घस्य प्रथमांशं प्रेतपित्रा अमुकशर्मणा सह संयुनज्मि। स्वल्पं जलं निनयेत्। ये समाना इ
ति मंत्रद्वयं पठित्वा। संयोजनं। पुनः प्रेतपवित्रं पितामहपात्रे निधाय गोत्रस्य अमुकप्रेतस्य अर्घस्य द्वितीयांशं प्रे
तपितामहेन अमुकशर्मणा सह संयुनज्मि। पुनरपि स्वल्पं जलं निनयेत्। ये समाना इति द्वाभ्यां मंत्राभ्यां संयोज
नं। पुनः प्रेतपवित्रं पितामह पात्रे निधाय अमुकगोत्रस्य अमुकप्रेतस्य अर्घस्य तृतीयांशं प्रेतप्रपितामहेन अ
मुकशर्मणा० सह संयुनज्मि। सर्वजलं निनयेत्। सेवं ये समाना इति द्वाभ्यां। अनेन अर्घसंयोजनेन प्रेतस्य वसु

= अमुकगोत्रऽमुकप्रेत अमुकगोत्रैः अमुकामुकशर्मभिः पितृपितामहप्रपितामहैः सायुज्यं गच्छतिवदेत् इति नारा =

रुद्रादित्यलोकप्राप्तिः। ततः प्रेतपवित्रं प्रेतपात्रे कृत्वा प्रेतसमीपे उत्तानं पात्रं। स्थापयेत्। ततः प्रेतपितृणां अर्घदा
नं। स्वधार्घ्या निवंतु। अस्तु स्वधा पवित्रार्पणं पूजनं। गोत्राय प्रेतपित्रे अमुकशर्मणे इदं पुष्पं। अर्घं गृहीत्वा या दि
व्या०। त्वा प्रेतपितः अमुकशर्मन् वसुरूप एष तेऽर्घः। आसिंचतु स्वधा० पवि० गोत्राय प्रेतपितामहाय अमुकशर्मणे इ
दं पुष्पं। यादिव्या० गोत्र प्रेतपितामह अमुकशर्मन् रुद्ररूप एष तेऽर्घः। आसिंचतु स्वधा० पवित्रा० गोत्राय प्रेतपि
तामहाय अमुकशर्मणे इदं पुष्पं। यादि० प्रेतपितामह अमुकशर्मन् आदित्यरूप एष तेऽर्घः। प्रथमे पितृपात्रे
सं स्रवान् समवनीय। शुंधंतां लोकाः पितृषदनाः इति भूमिं प्रोक्ष्य। पितृषदनमसीति कुशं निधाय पितृषदनमसी
ति न्युब्जं पात्रं निदध्यात्। तदुपरि सर्वाणि पवित्राणि निदधाति। अन्यानि त्रीणि कुशान् उपरि सव्यं। अर्घोदकं चंदनं
आपशि०। विश्वेदेवा पूर्वकं सर्वेषां पूजनं। इदमत्र चंदनं पुष्पं। धूपदीपा स्रुगंधकुंडलमुद्रिका वस्त्र उत्तरीयं यज्ञो
पवीतं। तूष्णीं समर्पणं दानं। अत्र संकल्पः। अत्र चंदनगंधपुष्पधूपदीपयज्ञोपवीतवासांसि यथादत्तं गंधाद्यर्चि

58

तं कालकाम संज्ञिकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा। इदं विश्वेभ्यो देवेभ्यो न मम। द्वितीयस्य। अपसव्यं। पुनः अत्र गंधा

अमुक मुश्चार्ये गोत्राये प्रेताय अर्चनं मद्दत्तं। इदमर्चनं प्रेताय। पुनः अत्र गंधादि॰ यथागंधाद्यर्चनं गोत्रेभ्यः प्रेत पितृपि

तामह प्रपितामहेभ्यो अमुकामुकशर्मभ्यो वसुरुद्रादित्यरूपेभ्यो यथा यथा विभागं वः अक्षय्यमस्तु स्वधा। स

व्यं। अतिथये विष्णवे॰ अर्चनगंधादिकं वः स्वाहा। इदं वो ज्योतिः। अस्य श्राद्धार्चनविधेः परिपूर्णता। आचमनं।

अग्नौकरणं। उद्धृत्य घृताक्तमन्नं पृच्छति। अपसव्यं। ब्राह्मणः अग्नौकरणमहं करिष्ये। साग्निकस्य वह्निकुंडे हो

मः। निरग्निकस्तु। पंक्तिमूर्द्धन्यपितृब्राह्मणहस्ते होमः। ब्राह्मणाभावे एकस्मिन्पात्रे जलं पूरयित्वा तत्र होमः।

अत्र साग्नेरपि प्रेतपितृविप्रपाणावग्नौकरणमिच्छंति केचित्। ॐ अग्नये कव्यवाहनाय स्वाहा। इदमग्नये कव्य

वाहनाय न मम। ॐ सोमाय पितृमते स्वाहा। इदं सोमाय पितृमते न मम। हुतशेषं पितामहपात्रयोः परिवेषणं। प्रेत

पाकमध्यात् अन्नं प्रेतपात्रे परिवेषणं। सव्यं। पितृपाकात् विश्वेदेवापात्रे परिवेषणं। अतः परं विश्वेदेवा पूर्वकं सर्वं

59

त्रपायसादिसर्वान्नपरिवेषणं। संकल्पः। तं त्वा सत्येन परिषिंचामि। पात्रालंभः। पृथिवी ते पात्रं द्यौः पिधानं ब्राह्म
णस्य मुखे अमृते अमृतं जुहोमि स्वाहा। इदं विष्णुः सुरे। यवानवकीर्य। विष्णो हव्यं रक्ष। इदमन्नमिदमापमिदं ह
विः। अंगुष्ठमन्ने अवगाह्य। इदमन्नं सोपस्करं प्रजापतिदैवतं यद्दत्तं यच्च दास्यामि तत्सर्वं तृप्तिपर्यंतं ब्राह्मणभो
जनं कामचकामसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा। इदमन्नं विश्वेभ्यो देवेभ्यो न मम। एवं द्वितीयस्यां अपसव्यं प्रे
तपात्रे। ऋतं त्वा॰। पृथिवी ते॰। इदं विष्णु॰। तिलानवकीर्य। अपहता॰। षदा। अंगुष्ठमन्ने॰। इदमन्नमिदमापमिदं
हविः। इदमन्नं सोपस्करं प्रजापतिदैवतं यद्दत्तं यच्च दास्यामि तत्सर्वं तृप्तिपर्यंतं ब्राह्मणभोजनं अमुकगोत्राय अमु
कप्रेताय स्वधोपशमनार्थं मद्दत्तं स्वोपतिष्ठतां। इदमन्नं प्रेताय उपतिष्ठतु। ततः पितृपात्रे॰। ऋतं त्वा॰। पृथिवी
ते॰। इदं विष्णु॰। विष्णोः कव्यं रक्ष। तिलानवकीर्य। अपहता॰। इदमन्नं सोपस्करं प्रजापतिदै॰। भोजनं गोत्रेभ्यः प्रेत
पितृपितामहप्रपितामहेभ्यः अमुकामुकशर्मभ्यः वसुरुद्रादित्यस्वरूपेभ्यो यथा यथा विभागं वः स्वधा। इदम

त्रं पितृभ्यो नममा। सव्यं। अतिथि पात्रे परिवेषणं। इदमन्नं। अतिथये नममा। अपसव्यं। सकृत्सकृद्द्पोदत्वा। सव्यं। स
कृत्सकृत् गायत्रीं जपित्वा। ॐ तत्सत् सुषध्वं। यस्योपदिष्टं तस्योपतिष्ठतु। अधुना अघकृत संकल्पसिद्धिरस्तु। यथासौ
ख्यं अमृतं भुंजयध्वं। अश्नन्तु जयेद्याइति पूर्वं गायत्री ३ सप्रणवा ३ सकृत् त्रिर्वा। रक्षोघ्नी पितृमंत्रान् पुरुषसूक्त
मप्रतिरथमन्यानि च पवित्राणि। कृणुष्व पाज ५ उदीरता १२ सहस्रशीर्षा १६ आशुः शिशान अनुवाका न मस्ते
संपूर्णे। तस्मात्सर्वात् अन्नं प्रकीर्य। विकिरासनं। असंस्कृतप्रमीतानां त्यागिनां कुलदोषिणां। उच्छिष्टभागधेयानां
दर्भेषु विकिरासनं। अग्नीदग्धाश्च येजीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन चान्नेन तृप्तायांतु परांगतिं। विकिराय
इदमन्नं। हस्तप्रक्षालनं। सव्यं आचमनं। उपस्पृह्य कुशत्यागः। प्राणायामः। अपस० सकृत्सकृदपोदत्वा। सव्यं। सकृ
पूर्ववद्गायत्रीं जपित्वा। मधुमतीमध्वितिच। मधुवाता ऋ ३ ब्राह्मणाः तृप्तास्था। तृप्ताःस्म इत्युक्त्वा ततःशेषमन्नं इष्टैः सह
भुज्यतां। अपसव्यं। रेखाकरणं पार्वणे। नत्वेकोद्दिष्टे। अपहता ३ उदपात्रेण अवनेजनं। गोत्रे प्रेत अवनेजनं मद्दत्तं

अमुक १

= प्रेतपिंडं द्वोदश्विभागतः पं ... पितादिभ्यो दद्यात्। मध्यपूर्वतः प्रेताय ... पित्रादिभ्य इति नारा = 

60

गोत्र प्रेत पितः अमुक शर्मन् वरुणरूप अवनेनिक्ष्व। प्रेत पितामह प्रजापतिरूप अवनेनि०। प्रेत प्रपितामह अमुक श
र्मन् अग्निरूप अवनेनि०। सकृदाच्छिन्नास्तरणं। प्रेत पाकमध्यात् पिंडदानं प्रथमं स्थूलदीर्घपिंडमादाय। गोत्र अमुक
प्रेत सपिंडीकरणनिमित्तं एष पिंडो मद्दत्तस्तवोपतिष्ठतां। ततः पार्वणे पितृपाकमध्यात् पिंडत्रयं पिंडमादाय गोत्र प्रे
त पितः अमुक शर्मन् वरुणरूप एतत्ते अन्नं स्वधा। प्रेत पितामह अमुक शर्मन् प्रजापतिरूप एतत्ते अन्नं स्वधा। प्रे
त प्रपितामह अमुक शर्मन् अग्निरूप एतत्ते अन्नं स्वधा। एवं चत्वारः पिंडान्निर्वाप्य प्रेत पिंडस्य गोत्र प्रेत पिंडोपरि अव
नेजनं मद्दत्तं तं०। सूत्राच्छादनं मद्दत्तं०। चंदन पुष्प धूप० दीप० नैवेद्यं मद्दत्तं० [illegible] फल अर्घं। तांबूलं० पिंडस्यार्चनवि
धेः परिपूर्णता। अनेन पिंडदानेन प्रेतस्य सद्गतिः उत्तमलोकप्राप्तिः। अग्रे कुंभदानयोग्यता प्राप्तिः। सव्यं। आचमनं कुं
भसंकल्पः। अद्येत्यादि० एवं गु० तिथौ। दास्यमानं कुंभमेकं सान्नोदकं विष्णुप्रीत्यर्थं ब्राह्मणायाहं दास्ये। कुंभमेकं य
मप्रीत्यर्थं ब्राह्मणाय०। कुंभमेकं चित्रगुप्तप्रीतये०। अपसव्यं। दास्यमानाः द्वादश कुंभाः सान्नोदकाः गोत्राय प्रेताय ६०

अमुकगोत्रस्यामुकप्रेतस्य पिंडं पित्रादिपिंडैः सह संयोजयिष्ये। संयोजयेति प्रत्युक्तिः। संयोजनं। गोत्रप्रेत अमुकगोत्रेणामुक
शर्मणा त्वं पित्रा संसृजस्व। पितामहेन सं॰ प्रपितामहेन सं॰। मात्रादित्रितयपिंडेऽपि पितामह्यादिपिंडत्रयेण संयोजयेत्।

स्तृप्तिपासानिवृत्त्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो नानानामभ्यः मद्दत्तास्त्वेपो प्रतिष्ठतां। तत्र मंत्रः। सुशीतलजलोपेतां
सर्वेपस्कर संयुतां॥ एते घटा मया दत्ताः स्वर्गद्वारं च प्रतिष्ठतां। एभिः कुंभदानैः प्रेतस्य क्षुत्तृष्णानिवृत्तिरस्तु। सर्व
सुप्रोक्षितकरणं। अपसव्यं। अर्घ्योदकदानं। गोत्रस्य प्रेतस्य यद्दत्तमन्नपानादिकं तदुपतिष्ठतां। पिंडोपरि तू
ष्णीं प्रेतपवित्रसमर्पणं। तूष्णीं जलधारां तेउपतिष्ठतां। दक्षिणासंकल्पः। श्राद्धप्रतिष्ठासिध्यर्थं दास्यमानां र
जतनिष्क्रयणीं दक्षिणां गोत्राय प्रेताय तेउपतिष्ठतां। ततः प्रेतपिंडं पित्रपिंडेषु संयोजयिष्ये। इति पृष्ट्वा संयोज
येत्येवं ब्राह्मणैरनुज्ञातः सुवर्णशलाकया प्रेतपिंडं त्रिधा विभज्य विष्णुस्मरणं वारत्रयं कृत्वा। आद्यनागमाय्
यये समाना इति मंत्रद्वयं पठित्वा। अमुकगोत्रस्य अमुकप्रेतस्य पिंडस्य प्रथमांशं प्रेतपित्रा अमुकामुक शर्मणा
प्रेतपिंडेन सह संयुज्यतां। सह संयुनज्मि। पिंडं वर्तुलं कुर्यात्। अवशिष्टं प्रेतपिंडस्य भागद्वयमेव पितामह
हप्रपितामहपिंडयोः संयोजनीयं। अर्घसंयोजनवत्। अनेन पिंडदानेन अमुकगोत्रस्य अमुकप्रेतस्य

=केचित्तु पिंडत्रयस्य त्रयेण संयोज्य तान् त्रीन् पिंडान् उद्धृतानीत न मृतमारभ्य पुरुषत्रयाय पार्वणावत् पुनः पितामहगोत्रा पुत्रा= =र्थदपादिप्याद्गीतिनाम दत्वामहद्विपद्ध तौ उद्धृतानीतनानां कचिद्ध्रस्व लोपनाना प्राया तोप्येवं दृश्यतएव=

प्रेतत्वनिवृत्तिः वसुरुद्रादित्यलोकप्राप्तिः। ततः पिंडस्थान त्रिःमृत्पिदं प्रगेत। एषवोनुगतः प्रेतः पितरस्तंदधामिवः

शिवमस्त्विति शेषाणंजायतां चिरजीवितां। समानीव आकूतिः समानाहृदयानि वां समानमस्तु वोमनो यथवं सु

सहासति। अतऊर्द्ध्वं यांत्या पिप्रेतशब्देनकार्यः। तत्र अत्र पितर इतिजपित्वा उदंझास्ते आतमनात्। आहत्वामीमदंते

तिजपित्वा। पूर्ववद्दनेजनं। गोत्रपितामह अमुकशर्मन् अवनेनिक्ष्वा एवं प्रपितामहस्य वृद्धप्रपितामहयोः। नि वि

विस्रंसनं। नमोवः इति षडंजलीकरणं। गृहान्न इति जपः। एतद्वत्ततःपास्पति सूत्राणि प्रतिपिंडं। गंधपुष्पधूपदीपनै

वेद्यादिदत्वा यथाक्रमपिंडेभ्यो फलैर्घृरेदानं। तत्रवाक्यं। इमानिगंधपुष्पधूपदीपनैवेद्यफलानि गोत्रेभ्यः यजमा

न पितृपितामहप्रपितामहेभ्यः अथवा पितामहादि अमुका अमुकशर्मभ्यः वसुरुद्रादित्यरूपेभ्यो यथायथावि

भागं वः स्वधा पिंडमूले सयमस्तु नैवेद्यः स्वधा। पिंडानामर्चनविधेः परिपूर्णेस्तास्तु। एभिः पिंडदानैः पितामहादित्रय

णां अक्षयातृप्तिरस्तु। सपिंडीकरननिमित्तं पिंडदानं परिपूर्णमस्तु। सर्वा आचमनं। नमस्कारः। सुप्रोक्षितादिकरणं।

६१

अपसव्यं। अक्षय्योदकदानं गोत्रस्य यजमानपितुः अमुकशर्मणो दत्तं श्राद्धमक्षय्यमस्तु। एवं पितामह प्रपिताम
हयोः ये षामनुद्दिष्टं तेषामक्षय्यमस्तु। अघोराः। सव्यं गोत्रं नो वर्द्धतां। दातारो॰ वेदाः संत॰॥ श्रद्धा॰ बहुदेयं॰ अपस
व्यं। स्वधां पितृभ्यो वाचयिष्ये वाच्यतामित्यनुज्ञातो यजमानपितृपितामहप्रपितामहे स्वधोच्यतां। अस्तु स्वधा ऊर्जे
मित्यपो षिंचति। ऊर्जं॰। पात्रमुत्तानं कृत्वा। सव्यं दक्षिणा संकल्पः। अस्य श्राद्धस्य प्रतिष्ठासिद्ध्यर्थं दास्यमानां हिर
ण्यनिष्क्रयिणीं दक्षिणां मुखवासं तां धूर्लं च कालकामसंज्ञिकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा। एवं द्वितीयं॰ अपसव्यं। गो
त्रेभ्यः यजमानपितृपितामहप्रपितामहेभ्यः अमुकाऽमुकशर्मभ्यः वसुरुद्रादित्य॰ दास्यमानां रजतनिष्क्रयिणीं दक्षि
णां मुखवासं च यथायथाविभागं वः स्वधा। सव्यं। विश्वेदेवाः प्रीयन्तामिति ब्रूहि विश्वेदेवाः प्रांति दानवं तु। अन्नं चात्र
तिथिश्च॰ मा याच॰ मा च॰ एता एवाशिषः संतु। स्वयमेव तिलकं। मोक्षधेनुदानं। अद्येत्यादि॰ एवंगुण॰ अपसव्यं। गोत्रस्य
अमुकशर्मणः परलोके मोक्षप्राप्त्यर्थं दास्यमानां मोक्षधेनुसंज्ञिकां गां प्रत्यक्षां अथवा तं निष्क्रयीभूतं मनसोद्दिष्टं

= अत्र चाप्रेताय दक्षिणादानं प्राप्नोति नारा॰ =

62

द्रव्यं कस्मै विद्ब्राह्मणाय विष्णुरूपाय दातुमहं मुत्सृजे। तेन अमुकशर्मणः परलोके मोक्षप्राप्तिरस्तु। पिंडोद्धरणं। पात्रा
णि चालयेत्। संवरमस्तु स्वपा। पुनः प्रक्ष्या सव्यं। अद्य पूर्वोच्चरित नक्षत्रां ब्राह्म० श्रीविष्णोः प्रसादात्। अमुकमासे अ
मुकपक्षे अमुकतिथौ अमुकवासरे। अपसव्यं। गोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुका अमुकशर्मणां
वसुरु० विश्वेदेवा पूर्वकस्य पार्वणैकस्य सैकोद्दिष्टस्य सपिंडविधिना श्राद्धस्य कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्स
र्वं विष्णोः प्रसादात् संपूर्णोयं विधिरस्तु। चतुर्थस्य निवृत्तिः। निश्वास धेनुदानं। वाजे वाजे ति विसर्ज्य। सव्यं० वाजे०
अपसव्यं। आमावाज० सव्यं आचमनं। आयुः प्रजां यं कामं कामयते सो स्मै कामः समृध्यते। श्राद्ध परिपूर्णार्थे वि
ष्णोः पूजनं। यस्य स्मृत्या० द्वादशाहांत परिधान वस्त्रं उत्तरीयं च गां च प्रदद्यात् दक्षिणां च आचार्यो गृह्णीयात्। सपिंडीक
रणे श्राद्धे भोजिनो पि सचैलस्नानं कुर्युः॥ ॥इति सपिंडिकरणश्राद्धं॥ ॥त्रयोदशाहे कर्तव्यं अष्टवर्णी पूजनं गृहो
भूमौ वा अष्टदलं पद्मं विलिखित्वा शुक्लतंडुलैः स्थापयेत् कलशं तत्र भूरसी ति क्रमेण च। लिखित्वा तत्र कुंभे वै देवताश्च

६२

[illegible] प्रतिष्ठां कारयेत्तां सा मनोजूतीति मंत्रतः। आदौ संपूजयेद्विघ्नं उपचारैः प्रयत्नतः।
कुंभे प्रपूजयेत्पश्चात् बलिं दत्वादि(?)

दनेन वा। अथवा कुंकुमेनैव ललितादिक्रमेण तु। ललिता विश्वमाता च भद्रा च भुवनेश्वरी। कंदर्पवासिनी आर्या
मोक्षदा रेवती तथा। दिग्गा(?) पञ्चाश्रवणी स्तमा(?) कीर्तिमूर्त्तयो दश। पूजासमये अर्घदानमंत्रः। नमस्ते श्रवणे देवी साक्षी
भूते सनातनी। एष अर्घो मया दत्तो तारस्व भवार्णवात्। कर्त्तव्यं वैष्णवश्राद्धं स्वस्तिवाच्यं ततः परं। तिलकं यजमा
नस्य आशिर्वादस्ततः पठेत्। कलशो स्थापनं कुर्यात् स्कंधे कलाडं(?) तं क्षिपेत्। निंबमूले यवाश्वत्थे(?) पृष्टदेशे च नि
क्षिपेत्। ततो मंत्रान् समुच्चार्य आचार्येण प्रयत्नतः। यद्बाल्ये यच्च कौमारे वार्द्धके चापि यत्कृतं। तत्सर्वं नाशमायं(?)
तु स्रवणे देवर्षिपैत्रकं। इमम्मे सलिलं पूर्णं तारयस्व भवार्णवात्। अनृणो गंतुमिच्छामि तद्विष्णोः परमं पदं। कटुकं
निंबवृक्षं च ततो मधुरमारुह। ततो गच्छ महादेवं श्रवणा श्रवणके स्थाने(?)। ततो वै गृहमागत्य शांतिसूक्तं जपेत्सु
धीः। ब्राह्मणान्भोजयेत्पश्चात् दक्षिणाभिः प्रतोषयेत्। इति श्रवणीपूजनविधिः॥ ॥अथ सूतिकामरणे विशेषः॥
सूतिकामरणे प्राप्ते सर्वौषध्यनुलेपनं। अस्नातकी तु संस्पृष्ट्वा पञ्चपूर्णानां तु श्रातं(?) क्षिपेत्। पूर्ववत्संकल्प्य ब्राह्मणव
चनात् चांद्रायणत्रयं कृत्वा पूर्ववत् ततः पश्चात् स्नानानि कारयित्वा कुंभजलमादाय पंचगव्यं तत्र क्षिप्त्वा। आपो हि

म्रियते तु सा नारी द्विवर्षं कृच्छ्रमाचरेत्। एतद्द्वितीयत्र्यहविषयं। सूतिका तु यदा साध्वी विस्नाता मरणं गता ॥

ष्ठा वामदेव्य वारुणादि पुनंतु मेति — — वमिर्ल्लिंगैरभिमंत्र्य तेन कुंभोदकेन शूर्पोदकेन च स्नापयित्वा नववस्त्रे

णवेष्टयित्वा विधिना दहेत्॥ ॥अथ सूतिकामरणे दिनभेदेन विशेषप्रायश्चित्तं। सूतिका तु यदा साध्वी विस्ना

63 ता मरणं गता। त्रिवर्षं पूर्वं पर्यंतं। शुद्धेत् कृच्छ्रेण सर्वदा। एतत्प्रथमत्र्यहविषयं। सूतिका तु यदा नारी रजसा तु

परिप्लुता। अर्द्धकृच्छ्रेण शुध्येन व्यासस्य वचनं यथा। तथा। सूतिका तु यदा नारी विस्नाता मरणं गता। त्रिषण्णवदि

नादर्वागेकाद्देन विशुध्यति दशाहात्तु परे शुद्धा। प्रतिसूतिका तु यदा नारी प्राणांश्चैव परित्यजेत्। मासमेकं वधिया

वत्रिभिः कृच्छ्रैर्विशुध्यति। सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमासाद्य पंचगव्यं ततः क्षिपे

त्। पुण्यग्भिरभिमंत्र्यापो वाचा शुद्धिं लभंते नरः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधिः। अब्लिंगाभिर्मंत्रि

ताभिर्वामदेव्याभिरेव च। अन्येश्च वारुणैः मंत्रैः संस्नाप्य विधिना दहेत्॥ ॥इति सूतिकामरणे दाहविधिः॥

अथ सूतिकामरणे सुगमपक्षे दाहविधिरुच्यते॥ कुंभे उदकं कृत्वा पंचगव्यं प्रक्षिप्य पूर्वोक्तमंत्रैरभिमंत्र्य पंच

दश प्राजापत्यान् कृत्वा तेन कुंभोदकेन शतकृत्वा स्तां स्नापयित्वा वस्त्रांतरेण सर्वांगं वेष्टयित्वा दाहः कार्यः। शूर्प ६३

विकल्पेनारजस्वलामरणेमप्येवं।उदक्यासूतिकावापियंप्रेतंस्पृशंतितस्याप्येषएवविधिः॥ ॥अथगर्भिणीमर
णेविशेषः।यदागर्भवतीनारीसशल्यासंस्थिताभवेत्।कुक्षिंभित्वाचतत्तस्याःशल्यंनिर्हरेद्यदिजीवति।प्रमीतं
निक्षिपेत्तत्तुप्रायश्चित्तंचरित्वातुशुध्यंतिपापकारिणः।दग्ध्वातुगर्भसंयुक्तांत्रिरब्दंकृच्छ्रमाचरेत्॥ ॥अथकु
ष्ठिमरणेविशेषः॥ ॥मृतस्यकुष्ठिनोदेहंनिखनेज्जीर्णभूमिषु॥वासरत्रितयंपश्चादुद्धृत्यान्यत्रतंदहेत्।नगं
गाप्लवनंकार्यंनिक्षिपेद्विधिरुच्यते।षडब्दव्रतपूर्णेनविधिनांत्यंक्रतुंचरेत्।ततोस्थिसंचयनंतस्यगंगायां
प्रक्षिपेत्सुधीः।मासिमासितथाकुर्यान्मासिश्राद्धानिपूर्ववत्।संकल्पविधिनाकेचित्प्रवदंतिमनीषिणः॥
इत्येतत्कुष्ठिनांसूर्ध्वंकथितंशास्त्रकोविदैः।स्मृतिविद्भिरनूचानैर्येमाद्यैःपूर्वविग्रहैः॥ ॥इतिकुष्ठिमरण
विधिः॥ ॥अथसर्पहतेनागव्रतं॥ ॥तत्संवत्सरेभाद्रपदशुक्लपंचमीमारभ्यांऽन्यांवाशुक्लपंचमीमारभ्यपंच
म्यामुपवासः।यद्वाचतुर्थ्यामेकनक्तंपंचम्यांनक्तंदारुमयंमृन्मयंवानागंपंचफणंकृत्वागंधैःकरवीरैःशत
पत्रैःजातिपुष्पैर्धूपैर्दीपैरनंतंवासुकिंशंखंपद्मंकंबलंककोटकंअश्वतरंधृतराष्ट्रंशंखपालंकालियंचैवे

64

दर्शकं कपिलं च प्रतिमासं नामभिः शुक्लपंचम्यां संपूज्य ब्राह्मणान् घृतपायसमोदकैर्भोजयेत्। संवत्सरांते चैव
संपूज्य महद्ब्राह्मणभोजनं। आत्मा सौवर्णनागदानं। गोदानं च कुर्यात्। अथवा नयोः पक्षयोः पंचमीषु भूमौ पि
ष्टेन नागं विलिख्य सितपुष्पैः सितगंधेन तिलतंडुलैरभ्यर्च्य गव्यं क्षीरं मोदकं च भूमौ निवेद्योपस्थायेवं वदे
त्। मुंच मुंचामुकमिति। तद्दिने मधुरमश्नीयात्। एवं मद्धं विधिना नागमभ्यर्च्य पूर्णेब्दे यथाशक्ति सौवर्णना
गं गां च दद्यात्। ततो नारायणबलिं कृत्वा श्राद्धानि सर्वं कुर्यात्। तत्र मूलवचनानि स्मृतिरत्नावल्यां द्रष्टव्यानि॥
अथ पूर्वोक्तपारवंड्यादीनां शुद्धिपूर्वात्मघातिनां च नारायणबलिः॥ ॥अथ पंचकमरणविधिः॥ ॥गरुड
पुराणे॥ आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्रपंचकं॥ रेवत्यंतं सदुष्टंमशुभं सर्वदा भवेत्। बालस्य वाथ वृद्धस्य
पंचकेषु पंचकेषु मृतस्य च। विधानं येन कुर्वीत तस्य विघ्नः प्रजायते। दाहस्तत्र न कर्त्तव्यो विषादः सर्वजातिषु। न
जलं दीयते तेषु त्वशुभं सर्वदा भवेत्। पंचकानंतरं कार्यं दाहादिकं खलु। अथवा तद्दिने कार्यो दाहस्तु विधिपूर्व
कः। तत्र विधिः। तदा च शवसमीपे तु दर्भपुत्तल्यः पंचैव पुत्तलाः। दर्भमयास्तु कर्त्तव्या ऋक्षमंत्राभिमंत्रिताः। दाहदेशो ६४

शावं नीत्वा स्थापयेद्बुधस्ततः। दर्भाणां प्रतिमाः कार्याः पंचोर्णसूत्रवेष्टिताः॥ यवपिष्टेनानुलिप्तास्ताभिः सह शावं
दहेत्। प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः। पंचमं प्रेतहर्त्ता च नामान्येतानि च क्रमात्। शिरस्यां दक्षिणे कु
क्षौ वामे नाभौ चतुर्थकं। पंचमं पादयोर्मध्ये तेभ्यो दद्याद्धृताहुतिः॥ अथ प्रयोगः॥ एवंगुण॰ अपसव्यं। गोत्रस्यअ
मुकप्रेतस्य धनिष्ठाद्यपंचकादिमरणसूचितवंशानिष्टविनाशनार्थं पंचविधिं करिष्ये। इति संकल्प्य गंध
माल्याद्यैः प्रतिमा अलंकृत्य दाहसमये प्रेतोपरि न्यसेत्। प्रथमां शिरसि। द्वितीयां दक्षिणे कुक्षौ। तृतीयां वा
मकुक्षौ। चतुर्थीं नाभौ। पंचमीं पादयोर्मध्ये। तदुपरि तासां नाममंत्रैर्घृताहुतीर्दत्वा। प्रेतवाहाय स्वाहा।
प्रेतसखाय स्वाहा। प्रेतपाय स्वाहा। प्रेतभूमिपाय स्वाहा। प्रेतहर्त्राय स्वाहा। इति पंचाहुतिः॥ ततो विधिना श
वं दहेत्। सूतकांते ततः कुर्यात् विधानं पंचकं तथा। अन्यथा न गतिस्तस्य पुंप्रेतपुत्रसुशोभनं। स्वगृह्योक्त
विधानेन कृत्वाग्निस्थापनं ततः। अग्निध्यानं निर्वपणं देवतानां तथा शृणु॥ वासवो वरुणश्चैव अजैकपात्तृ
तीयकं। अहिर्बुध्न्यश्चतुर्थं च पूषणं पंचमं तथा॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय

सर्वभूतक्षयाय च। ओं उदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः। अघोररुद्रमं-
त्रश्च निर्वापयेत्क्रमेण च। विधिना अर्पणं कृत्वा एकैकामाहुतिं हुनेत्। कुंडादीशानदिग्भागे स्थंडिलं हस्तमात्रकं।
65 तत्र वस्त्रं समास्तीर्य स्थापयेद्दक्षादि पंचकान्। चतुर्दशयमांश्चैव अघोरं स्थापयेत्पुनः। आवर्णं कलशान् स्था-
प्य दिक्षु चत्वारि विन्यसेत्। कलशः पंचमो मध्ये स्थापयेद्विधिपूर्वकं। उच्चार्य वारुणं मंत्रं पूरयेत्तीर्थवारिणा। म-
ध्ये सर्वौषधीं क्षिप्त्वा मृद्दूर्वापल्लवांस्तथा। हिरण्यफलसंयुक्तं वस्त्रेणैव वेष्टयेत्ततः। कलशोपरि विन्यसेन्मूर्तिं पंच-
स्वर्णमयीं च वेत्। प्रतिष्ठापूजनं कार्यं पंचसूक्तान् जपेत्ततः। श्रपयित्वा चरुं विद्वान् दद्यादग्निमुखं ततः। आघा-
रावाज्यभागौ च ततो वह्निं समर्चयेत्। समित्तिलांश्चरुमिश्रं होमं कुर्यात्पृथक्पृथक्। अघोरेणैव मंत्रेण ततो होम- रे=४
चरोः क्रमात्। पूर्णाहुतिं च विधिवत्पूजयेद्देवतांस्ततः। इत्थं समाप्य हवनं धेनुं दद्यात्पयस्विनीं। सहिरण्यां ति-
लान्दद्यान्मैन्महिषीं सप्तधान्यकं। सहिरण्यं घृतं दद्यात्कृष्णवस्त्रं सदक्षिणं। अभिषेकं ततः कुर्यात्कलशोदके-
न यन्ततः। कलशैः स्नपनं तस्य कुर्यादाज्यावलोकनं। वस्त्रं चैव परित्याज्यं रुद्रजन्ति विशेषतः। ब्राह्मणोजयेत्पश्चात् ६५

यसंमधुसर्पिषा। एवंयः कुरुते पुत्रश्च जातस्य प्रजायते। विधानं यो न कुर्वीत विघ्नं तस्य भवेत्सदा। तस्मात्सर्वप्रयत्ने
न शांतिं कुर्याद्यथाविधिः॥ कृत्वा तु गोत्रजाः सर्वे सुखिनस्तु निरामयाः। भवंति नात्र संदेहो नात्र कार्या विचारणा॥
इति ब्रह्मपुराणोक्तं पंचकविधानं॥ ॥अथ पद्धतिः॥ तीर्थे गत्वा स्नानं शुद्धवस्त्रपरिधानं। अद्येत्यादि एवं॰ अपस
व्यं। गोत्रस्य अमुकप्रेतस्य पंचकजनितदुर्मरणदोषोपशांत्यर्थं। सव्यं। मम गृहे सपरिवाराणां आयुरारोग्यसुखश्री
प्राप्त्यर्थं विष्णुपूजनपूर्वकं पंचकविधानमहं करिष्ये। विष्णोः षोडशोपचारपूजा। स्थंडिले पंच भूसंस्कारान्कृत्वा
अग्निस्थापनं। दक्षिणतो ब्रह्मासनादि चरुश्रपणं। तं ईशाने कलशस्योपरि पंचनक्षत्रदेवतानां स्थापनं। तत्रा
श्रेयमादिच्चतुर्देवतानां स्थापनं। ईशाने अघोरमृत्युंजयस्थापनं। अघोरमंत्रः। अघोरेभ्यो थ घोरेभ्यो घोर
घोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः। इति अघोरमंत्रः। ततः पंचकलशस्थापनं। मध्ये
फलमुद्रापनसर्वौषधीदूर्वामृत्तिकाप्रक्षेपः। वस्त्रवेष्टनं। कलशोपरि स्वर्णमयी पंचमूर्तिस्थापनं। नालिकेरप
प्रतिष्ठापूजा। पंचधान्यसमर्पणं। पंचसूक्तजपार्थे पंचब्राह्मणानां वरणं। पादप्रक्षालनं। अर्चनकुंडलमुद्रिका

66

वस्त्रदानं। भोजनदक्षिणसंकल्पः। जापकाः। जपध्वं पाठकाः पठध्वं। प्रथमकलशे रुद्रपाठः द्वितीये विरजाष्टकं तृती
ये अष्टशिरसा ना। १७ चतुर्थे नमस्ते १६ पंचमे रुद्रं वा चं पर्युक्षणं तेनाज्यहोमः। प्रजापतये स्वाहा। इदं०। इन्द्राय स्वा
०अग्नये० सोमाय० इदं० वसो पवित्रमसि शतधारं० इदं वसुभ्यो० वरुणस्योत्तं० इदं वरुणा०। उत नो हिर्बुध्न्यः। इदम
जैकपदे०। शिवो नामासि० इदं महिर्बुध्न्याय० पूषं तव० इदं पूष्णे०। यमाय० धर्मराजाय० मृत्यवे० अन्तकाय० वैव
स्वताय०। कालाय० सर्वभूतक्षयाय० औदुम्बराय० दध्नाय० नीलाय० परमेष्ठिने० वृकोदराय० चित्राय० चित्रगुप्
ताये स्वाहा। अघोरमंत्रेण एकाहुतिः। अघोरेभ्योथ०। अथ चरुहोमः। अग्निर्घार्य। पूर्वोक्तमंत्रैश्चरुहोमः पुनः न
मस्ते रुद्रमंत्रेण अष्टोत्तरशत १०८ समिधहोमः। विष्णुमंत्रेण तिलहोमः। १०८ पुनः पूर्वोक्तमंत्रैस्तिलहोमः। स्विष्ट
कृतहोमः। आज्येन भूरादिनवाहुतयः। इन्द्रादिदशादिक्पालेभ्यो बलिदानं। स्वाहा प्राणेभ्य इति मंत्रद्वयेन पूर्णा
हुतिनारिकेरहोमः। संस्रवप्राशनं। पवित्राभ्यां मार्जनं। पवित्रप्रतिपत्तिः। प्रणीताविमोकः। ब्रह्मणे पूर्णपात्रदानं।
षड्ब्राह्मणभोजनसंकल्पः। पंचकलशोदकेन यजमानः सपरिवाराणं अभिषेकः। पंचकलशोदकेन स्नानं। मं ६६

शंनो मित्रः॰ अहानि शं॰ शंन इन्द्राग्नी॰ शंन इन्द्रापूषणा॰ शंनो देवी॰ अथ पंचदानं॰ पयस्विनीं गां॰ महीषीं॰ सप्त
धान्यसहितं। सहिरण्यं कृष्णवस्त्रं तिलसहितं दानं। सहिरण्यं घृतं। सुखावलोकनं इति पंचदानं मूल्ये समानं। भू
भूयसी दक्षिणा दानं। पुनः स्नाने श्रिवस्त्रताऽर्प्यं। पंचामृतेन शिवपूजनं। अष्टोत्तरशतमृत्युंजयमंत्रः जपः। अद्य
पूर्वोच्चरित॰ पंचकविधानपरिपूर्णार्थं सा। अनेन पंचकविधानकृतेन अप॰ गोत्रस्य प्रेतस्य पंचकजनितदुर्मर
णदोषनिवृत्तिः। सर्वं मम गृहे सकलदुरितोपशान्तिरस्तु। यस्य स्मृत्यादि विष्णुपूजासंपूज्या। इति पंचकविधान
समाप्तं॥ ॥अथ पुत्तलकदहनं विधि॥ यथा विदेहादि मृतानामकृतदाहादिनामस्थिलाभाभावदा तामृतस्य निघ्न
तान्यक्षानि दाहयित्वा त्रिरात्राशौचमाचरेत्। अस्थिमलाभेऽस्थ्याधिकं तत्रयष्टुत्रपालाशपत्रैर्नरदेहमेकं
कुर्यात्। यथा। यथाविधिः स्नानादिनित्यं विधाय ततः शरसंयुतं। अथवा पालाशदंड॰ संयुक्तं कुशमयं पुत्त
लकं कृत्वा भूमौ निधाय आचम्य कुशोपग्रहः। अद्यादि प्रयोगः एवं गुण॰ थौ। अपसव्यं। अमुकगोत्रस्यामुकपुत्तल

कदहनकर्माधिकारार्थं तथा च मम देहशुध्यर्थं प्रायश्चित्तमहं करिष्ये। प्रायश्चित्तारंभनिमित्तं विष्णोः पंचोपचारैः पू
जनं। प्रायश्चित्तांगं वैष्णवश्राद्धं। गोमिथुनसंकल्पः। वपनं। दशविधिस्नानं। शुभ्रवस्त्रपरिधानं तिलकं। कुशोप
67 ग्रहः। अद्येत्यादि०थौ। प्रायश्चित्तांगं व्याहृतिहोममहं करिष्ये। स्थंडिले पंचभूसंस्काराः। अग्निस्थापनं। आज्यसं
स्काराः। ॐ भूः स्वाहा। इदं० ॐ भुवः स्वाहा। ॐ स्वः स्वा०। ॐ भूर्भुवः स्वः स्वाहा। इदं प्रजापतये। एवं सप्तवारं। आहुति
२८। ततः यथाशक्ति प्राजापत्यसंकल्पः। मुखावलोकनं। सूर्यावेक्षणं वा। प्रायश्चित्तधेनुदानं। पंचब्राह्मणभोजन
संकल्पः। प्रायश्चित्तं परिपूर्णता। अथ नारायणीबलिः॥ अद्येत्यादि०थौ। अप०गोत्रस्य अमुकमृतस्य दुर्मरणदोष
निवृत्यर्थं नारायणीबलिपूर्वकं पूतलकं विधिकर्माहं करिष्ये। सव्यं। पंचकलशस्थापनादि पंचश्राद्धांतपर्यंतं
यथोक्तं नारायणबलिः कार्यः। नारायणीकर्मपरिपूर्णता। अनेन नारायणबलिकृतेन अपसव्यं। गोत्रस्य प्रेत
स्य दुर्मरणदोषनिवृत्तिः। अग्रे पाषाणाकृतिदाहविधिकर्मयोग्यताप्राप्तिः। सव्यं। आचमनं। स्नानं। शुद्धवस्त्रप

रिधानं।कुशोपयः।प्राणायाम।।देवागातुविद।इति मंत्रेण कृष्णाजिनमास्तीर्य।तदुपरि उदक्शिरं कुशपुत्तकं नि
धाय।अग्नक्कर्म इति मंत्रः सद्योजातेति सर्वांग संकल्पयेत्।पुरुषसूक्तेनाभिमंत्रयेत्।ततः षष्ठ्यधिकशतत्रय
पालाशवृन्तानि सर्वांगेन्यसेत्।आयुष्यं वर्चस्यमिति शिरसि चत्वारिंशत् ४० वायुष्ट्वा पवतेति ग्रीवायां दश १०
सप्त ऋषीति मंत्रेण स्कंधे विंशति २० नमस्ते रुद्रेति बाह्वोः शतमेकं। १०० देवस्य त्वेति सर्वासु करांगुलीषु १० नमो
वः किरिकेभ्य इति हृदये विंशति २० इंद्रस्य क्रोडे इति जठरे विंशति।२० स्तीर्णं बर्हिरिति कट्यां दश १० देवीरापो
अपां नपादिति शिश्ने दश १० एवेदिंद्रमिति वृषणे दश १० अंतरा मित्रावरुण इति उर्वोः प्रत्येकं प्रत्येकं पंचाशत्
५० देवस्य त्वेति सर्वासु पादांगुलीषु दश १० एवं षष्ठ्यादिकशतत्रयमितैः पर्णशरैः शरीरं निर्माय ऊर्णसूत्रेण ब
द्ध्वा यज्ञेन यज्ञमिति मंत्रेण जलालोडितयवपिष्टेनानुलिंपेत्। सोमा निषयति इति मंत्रेण मांसस्थाने माषापिष्टं।।
घृतवतीति मंत्रेण घृतेनाभ्यंजनं। मूर्द्धानं दिवो। इति शिरसि नालिकेरं। अग्नये गायत्रेति कपालस्थाने तुंबिका

न्यसेत्।। आत्मन्तु पस्चेति केशस्थाने शूकरकेशाः। विश्वतश्चक्षुरिति नेत्रे कपर्दिका द्वे द्वे। आश्विनां चक्षुरिति कनीनि
कास्थाने गुंजाद्वे। आनो नियुद्भिरिति नासिकास्थाने कार्पासः। प्राणदा इति वसास्थाने कर्पूरं। इदं इत्यस्य रूपमृषभो इति
कर्णस्थाने शुक्तिकाद्वे। मुखं किं सदस्य इति जिह्वास्थाने ताडपत्रं। परिव्राजपतिरिति मुखे पंचरत्नानि। मा स्पासीदमिति
दंतस्थाने दाडिमबीजानि।। ऊर्ध्व एषस्य वाजि इति ग्रीवायां सुत्रवेष्टनं। इदं सुत्रामा इति हृदये हरतालकं। देव्यान्नघर्य
इति गोत्रे मनःशिला। ततो ओरमिति धातुस्थाने गंधकं। लोमभ्य इति रोमस्थाने ऊर्णं। नाभिर्मे इति नाभिस्थाने उत्पलं। संधे
आरमिति संधिस्थाने लाक्षारसः सर्वसंधिषु। आग्निर्हृदये इति कालेय स्थाने मांजिष्ठं। इमं स्तनमिति स्तनयोः जंबी
रफलद्वयं। भूर्भुवस्वः इति ललाटे अभ्रकं। शुनं शुफाला इति नखस्थाने प्रवालं।।२०।। ओं षधयः समवदंत इ
ति सर्वांगे सर्वौषधी। श्रोत्राणी स्थाने इति श्रोत्रे कमलकया। प्रजापतिश्चरति मंत्रेण शिश्ने गृंजनं। स्त्रीविषये योनिस्था
ने अश्वत्थपत्रं। सरस्वती योन्या इति मंत्रः। आग्नेर्जनित्रमिति वृषणस्थाने वृंताकद्वयं। आविर्मे मेषो इति वीर्यस्थाने

पादं। पृष्ठीमें इति हारिद्रवस्त्राच्छादनं शिरसि तूली पट्टवस्त्रं त्वामग्ने अंगिरस इति पुरिषे पित्तत्वं। गंधद्वारेति गुह्ये
टंकण क्षारं। अश्वक्रांते इति गुदे मृत्तिका। रेतो मूत्रमिति मूत्रस्थाने गोमूत्रं। अग्निर्वृत्राणि इति जंघायां मूलकद्वयं।
बाहू मे बलमिति बाह्वोः मांकदली फलं। त्रीणि पदा वि नत्रिकायां इक्षुखंड २ एतावानस्येति चरणे तंडुलाः॥ म
धु वाता इति रुधिरस्थाने मधु। यज्ञायज्ञेति स्कंधे दंडं निधाय। तेजः पशूमिति तेजस्थाने काचा। तालुदेशे काचा पुनं तु
मेति गुल्फयो पुगीफलद्वे। जिह्वा मे इति। पादांगुली स्थाने षुउत्तति १० यो देवेभ्य इति पादपृष्ठे आम्रफलद्वयं २ आत्र
श्रुः त्रिः श्रानो इति द्घटीकायां बीली फलद्वयं। इमं जीवेभ्य इति जीवस्थाने हेमा वरुणः पाविता इति पित्तस्था
ने पिप्पली। वायो ये ते इति वातस्थाने उशीरं। दधिक्राव्णो इति श्लेष्मस्थाने दधि। तूली क्रमेण प्रोक्षणं। घृतं घृते
ति घृतेन स्त्रिप्रोक्ष्य। अथ पंचगव्येन स्नपनं। गायत्र्या चैव गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति वै क्षीरं दधिक्रा
व्ण इति वै दधि। तेजोसि शुक्रमित्याज्यं। अथ पंचामृतेन स्नपनं। पयः पृथिव्यामित्यादि श्वेतवस्त्रेण वेष्टनं। चंदनस

वांगे प्रोक्षणं। कुलसिमाला। दधिमधुलेपः। गुग्गुलेन धूपः। दीपा पुनर्मनं इति मंत्रेण प्राणवेशनं। शिरो मे त्वत्कुवाके
न सर्वांगेषु योजयेत्। शिरःप्रदेशे सजलं घटस्थापनं तूष्णीं। फलमुद्वापनपर्द्दे पः। अपेताध्यायतकलशानि मंत्रेण
69 इमं मे वरुण मंत्रेण वरुणावाहनं। कलशोदकेन पुत्तलकस्याभिषेकः। अग्निमीळे० इषेत्वा० अग्न आयाहि० शं ६९
नो देवि० कलशोदकेन वा वांते श्रद्धामिति शारीरावयवप्रोक्षणं। मनस्त आप्यायतामिति आप्यायनं कुर्यात्। स
प्तऋषीति मंत्रेण नामगोत्रं प्रतिष्ठापयेत्। अथ गर्भाधानादि संस्काराः। अग्निर्ऋषीति मंत्रेण अमुकस्य गर्भं परिक
ल्पयामि। वयं सोमेति पुंसवनं। स्वस्ति न इति सीमंतः। या ते रुद्रेति जातकर्म। अग्नये गायत्रेति नामधेयं। तच्चक्षुरि
ति सूर्यावेक्षणं। अन्नपत इत्यनेन प्राशनं। शिवो नामेति चूडाकरणं। भद्रं कर्णेति कर्णवेधः। ब्रह्मजज्ञानमिति व्रत
बंधः। वस्त्रपरिधानं। यज्ञोपवितमिति यज्ञोपवीतपरिधानं। आ ब्रह्मन्न इति व्रतविसर्गः। ध्रुवासीति विवाहः। प्रज
पतिश्चरतीति चतुर्थीकर्म। एवं यथोक्तं स्त्रीपुरुषपुत्तलं कृत्वा ततः दुर्मरणनिमित्तं यथाशक्ति प्राजापतिसंकल्पः। आ

तुरं वैश्लव श्राद्धं। वैतरण्यादि दानं। अष्टौ महादानानि। तिलपात्रं घृतपात्रं। यथाशक्त्या अन्यानि दानानि। ततः परं
नाभौ स्वल्पमात्रं दीर्घस्थापनं। इन्धनावास्यामित्यादिभिर्ल्लवित्यां श्रावयेत्। दीपः शमनसमयेत्तु ससीति नानूशही
त्वा अत्र सियमोऽइति मंत्रेण पुत्तलकोपरि प्रक्षेपः। रामकृष्णस्मरणं। अत्र पुत्रकर्तृश्चेत् वपनं कार्यं। स्नानं। अथ
षट्पिंडाः। आचमनं तूष्णीं प्राणानायम्य। अद्येत्यादि एवं० तिथौ अप० गोत्रस्य प्रेतस्य दाहार्थं उत्क्रांतादि पिंडदा
नमहं करिष्ये। अवनेजनं। गो० प्रे० अवनेजने मद्दत्तं० पंचपिंडस्थाने अवनेजनं मद्दत्तं०। पंचकुशानास्तीर्य पि
डदानं। गोत्र० प्रे० उत्क्रांतनिमित्तं एष पिंडो मद्दत्त० द्वारदेशे पांथनिमित्तं० विश्रांतौ भूतनि० चितास्थाने वा
युनि० वामहस्ते साधाकनिमित्तं० प्रत्यवने० मा स्वमिश्र आमांन संकल्पः। लोह निष्क्रय दक्षिणासंकल्पः। पिं
डविसर्जनं०। चतुर्थपिंडस्य चितामध्ये प्रक्षेपः। पंचमपिंडस्य वामहस्ते निधानं। त्रयः पिंडा भूमौ प्रक्षेपः मृतकस्य द
क्षिण शिरश्चितायां न्यसेत्। घृतेनाभ्यंजनं। उपरिकाष्ठपूरणं। शिरप्रदेशे भूमौ अग्निस्थापनं। आज्यसंस्कारः।

70

अस्मात्त्वमितिमंत्रेण एकाहुतिः। तूष्णीं मुखे आहुतिः। अग्निं गृहीत्वा अप्रदक्षिणं परितप्तमुखेऽग्निदानं। तत्र मंत्रः। कृ
त्वा सुडुष्कृतोममोहेति। गाढं रोदनं करोति। दाहानंतरं उदकेनाग्निशमनं। दाहभूमौ पिंडदानं। गोत्रप्रेत अवनेजनं
मदत्तं० पिंडदानं। गोत्रप्रेत स्मशानवासिदेवानां एष पिंडो मदत्त० प्रत्यव० माखमिश्रान्नामामसंक० लोहदक्षि०
पिंडोपरणं। अथास्थिसंचयनं। गर्त्तखननं पूर्ववत्सर्वं। दाघांजलिः। पालाशवृंतानावेष्टकुशैः प्रकृतिं कुर्यात्॥
इति पुत्तलविधिः॥ अथ सहगमनविधिर्लिख्यते॥ ॥पतिं कंठगतप्राणं दृष्ट्वा चैव पतिव्रता॥ सकल्पं चात्मनं
कृत्वा इदं वचनमब्रवीत्। वाग्भिः संपादिता मह्यं पतित्वे सर्वदेवते॥ त्वया सह गमिष्यामि जन्मनि त्वं चान्यजन्मनि। इति
संकल्पः। सा सती कृतस्नाता स्वशक्त्या दानपुण्यादि कृत्वा। ततः कुंकुमांजनस्रजमुकुरायैः स्वशरीरमलंकृत्य।
पूर्वे सन्यचर्मसुवासिनाचतुष्टयं। तानि सह पायसघृतमधुमिश्रं भोक्तव्यं। तद्दुदनाचेद्दुग्धं। दुग्धान्नावेष्टलं। प्राश
नं मंत्रेण। वारचतुष्टयं। वैधव्यं मा दधं न कदापि भूयात् पत्या वियोगो न मम मास्तु चान्यं। वंध्यात्वमेकं न कदात्तृतीयं म

मत्तुर्चेणात्वं न कदा चतुर्थी॥४॥ तांबूलवस्त्राभरणैः स्रजश्च संतोष्य तान् कुंकुमगंधधूपैः बंधून् समस्तान् क्षमयेत्
स्वक्रियान् विभूषितस्याभरणैः। सहर्षा। सा सती स्वगृहं कुंकुमाक्षतैः कृत्वा अग्नौ निक्षिप्य विवर्धयेत्। ततस्तीर्थं
गत्वा सती श्रोत्रादिकं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य। अद्यादि प्रयोगः एवं गुण० पुण्यतिथौ० भर्त्रा सहगमना
र्थं स्नानमहं करिष्ये इति संकल्प्य स्नायात्। स्नानानंतरं कुसुंभवस्त्रपरिधानं। अत्र उत्क्रांतधेनुदानं। सुखेन प्राणो
त्क्रमणार्थं इमां उत्क्रांतधेनुसंज्ञिकां गां प्रत्यक्षां अथवा तन्मूल्योपकल्पितं द्रव्यं ब्राह्मणायाहं संप्रददे। दानप्रति
ष्ठासिध्यर्थं हिरण्यं दक्षिणां। अन्यानि दानानि देयानि। ततः कुंकुमांजनस्रज विभूषितानि विलुध्यायन् चिता
समीपमागत्य पिंडान् दद्यात्। स्वहस्तेन वा प्रतिनिधिर्वा। अन्वितोत्क्रांतनिमित्तं अमुकगोत्राये मह्यं परलोकगताय
एष पिंडो मे उपतिष्ठतां। प्रातिनिधिको वा। अमुकगोत्राये अमुकदेव्यै दायै उपसंनाविन्यौ उत्क्रांतनिमित्तं एष पिंडो हस्ते
उपतिष्ठतु। एवं निमित्तस्थानेषु देयां। ततः सूर्यार्घः। एषऽर्घो मया दत्तो सूर्ये साक्षी तदथ्यतः। प्रसादं कुरु मे दे

71

व गृहाणार्घं नमोस्तु ते॥ ॥अथ सूर्यस्तुतिः॥ त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः। त्वं सूर्यो वसवश्चाष्टौ परमात्मा
त्वमेव हि॥ त्वमेव शरणं विष्णो शरणं तु पतिर्मम। स्वर्गे वा नरके त्वं हि यत्र यत्र गमष्यति। तत्र तत्र ह्यहं दृष्टे स्वर्गमे
ष्यामि माशुचः॥ ब्रह्महत्यादिभिः पापैः त्वं मोक्षसि यमालयात्। अहं ब्रह्मा ह्यहं विष्णुः अहं वै सूर्य दिक्पतिः। अथ
लोकान्विज्ञापयते। आदित्यचन्द्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मो
हि जानाति नरस्य वृत्तिं। अनेन सर्वे मम साहसेन तुष्यंतु मे देववराश्च सर्वे। पतिरग्रे ततो गत्वा अर्घं दद्यात्फलान्वितं
अज्ञानात् ज्ञानतो वापि यद्दुष्कर्म मया कृतं॥ तत्सर्वं क्षम्यतां देव प्रसीद पुरुषोत्तम। अथ प्रार्थना। सर्वदेवमयो यस्मात्
सर्वतीर्थमयः पतिः। तस्मै जीवननाथाय नमोस्तु परमात्मने। इति प्रार्थना। क्षिप्यस्य मृतकं तत्र चितामध्येषु यत्नतः॥
चितपर्यंतु प्रदातव्यं फलैश्च विविधैः शुभैः। चितिस्थो भगवान्ब्रह्म विष्णुरूपी सनातन॥ पतिलोकमवाप्स्यर्थं गृहाण
र्घं नमोस्तु ते। क्षमापयित्वा तान् लोकान्साध्वी हस्ते पतिमुखे। एकस्मै इति मंत्रेण घृतहोमं तु कारयेत्। ततः साध्वी ७१

घृताभ्यंगंविधायतुतत्सीदलं।।पंचरत्नंमुखेक्षिप्त्वाततःकुर्यात्प्रदक्षिणां।प्रदक्षिणप्रकर्त्तव्यादीपिकातत्रसाध्वी
नलाब्रवीतितां।त्वंदीपिकासर्वतमोपहारिणीसम्यक्कांतेजगदंघहिंसिनी।वंदेप्रसीदस्वतवप्रभासिप्रकाश
यत्वंममभर्तृगामी।अस्मात्त्वइतिमंत्रेणअग्नौएकाहुतिः।अथप्रवेशनंमंत्रः।किंमयानकृतंसद्योभवेयद्दिन
धानघाइतीदंशरीरमालिंग्यप्रविशामिहुताशनं।भर्तुश्चरणेहृदयेध्यात्वाश्रीजगदीश्वरं।ततोववह्निप्रार्थना
फलपुष्पांजलिंकृत्वाग्निंप्रार्थयेत्।त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्।त्वमेवदेवजानीषेनविदुर्येतिमा
नुषाः।अनुगच्छामिभर्तारंवैधव्यभयपीडिता।सत्यमार्गप्रदानेननयमांभर्तुरंतिकं।इदंशरीरंसकलंदग्ध्वाकृ
शानोकुरुदिव्यमाशु।तथास्वभर्तुःकुरुदिव्यदेहंभर्तुःसमीपंभगवान्व्रजामि।इत्युक्त्वासाहसंदद्यात्करताली
प्रदापयेत्।हरिशब्दादिस्वजनैर्भूयात्।। ॥इतिसहगमनविधिः॥ ॥अथारोहणंस्त्रीणामात्मानोभर्तुरेवच।सर्व
पापक्षयकरंनिरयोत्तारणंपरं।जन्मांतरेचसौभाग्यंधनपुत्रादिवृद्धिदं।।हारीतः।।मृतेभर्त्तरियानारीधर्मेण

व्यादृढव्रता। अनुगच्छति भर्त्तारं श्मशाने तस्यास्तु यत्फलं। तिस्रः कोट्योऽर्द्धकोटिश्च यावंतंगरुहारिणि। तावंत्पत्युः सहस्राणि
स्वर्गलोके महीयते। कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छति। यावन्नाग्नौ दहेद्देहं मृते पत्यौ पतिव्रता। तावन्न मुच्यते ना
रीधर्मश्रीव्यादृढव्रता। आर्त्ता आर्त्ते भवेद्यातु सुखिनिःस्यात्सदा सुखी। एवंविधा तु या नारी सा स्त्री ज्ञेया पतिव्रता॥
न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहिता। प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी। भर्त्तेन सपाम्रियेताऽस्तु साऽक्षयं सु
समश्नुते। यावच्चाग्नौ मृते पत्यौ न ह्यात्मानं दहेत्स्वचित्। तावन्न मुच्यते नारी स्त्रीशरीरात्तु कर्हिचित्। अन्वारोहणं तु
गर्भिणीनां ब्राह्मण्याः एकचित्यारोहणमेव। पृथक्चित्यारोहणं क्षत्रियादिस्त्रियाः पृथक्सह वा चितिः। असवर्णायाः
पृथक्चितिरेव मदनपारिजाते। आपस्तंबः। चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत्। प्राजापत्येन शुद्ध्येत तस्मा
द्वै पापकर्मणः। भर्तृगमने चितिभ्रष्टेत्यर्थः। पत्यां रजस्वलायां यदा भर्त्ता मृतः। सा च देशकालवशात्तदेवानु
गंतुमिच्छति न पंचमादिदिनं प्रतीक्षते। तत्र विधिरुच्यते॥ यदि स्त्रियामुदक्यायां प्रतिप्राणान्समुत्सृजेत्। द्रोणमे

कंतंडुलानांअवहन्याद्विशुद्धये।मुसलाघातेतदसृक्स्रवतेयोनिमंडलात्।विरजस्कामन्यमानास्वेच्छितेतदसृ
क्स्रायां।दृष्ट्वाशौचंप्रकुर्वीतपंचमृत्तिकया:एथक्।त्रिरद्भिःशतिदशपंचगव्यंदत्वात्वदह:क्रमात्।विप्राणांवचना
च्छुद्धासमारोहेहुताशनं॥वारिणासरजस्कानांइयंशुद्धिरुदाहृता॥ ॥अथरजस्वलामरणेविधिः॥ ॥अंतरिदे
मृतायेचवक्षावाप्रसुप्रमादत:।उदक्यासूतिकानारीचरेच्चांद्रायणत्रयं॥संग्रहे।पंचभिःस्नापयित्वातुगव्यैःप्रेतांर
जस्वलां।वस्त्रांतरघृतांकृत्वादाहयेद्विधिपूर्वकं॥वृद्धशातातपः।रजस्वलायाःप्रेतायाःसंस्कारादीनिनाचरेत्
ऊर्ध्वंत्रिरात्रात्स्नातायाःशवधर्मेणदाहयेत्।अहोत्तरसंस्कारमाह।अत्रदेशकालानुसाराद्यवस्था।अद्येत्यादि
अमुकगोत्रायाऽमुकरजस्वलाऽवस्थामरणनिमित्तप्रत्यवायपरिहारार्थंऔर्ध्वदेहिकयोग्यताप्राप्त्यर्थंचांद्राय
णत्रयंकृत्वायवपिष्टेनप्रायश्चित्तपूर्वकंशूर्पेणअष्टोत्तरशतस्नानानिकारयिष्ये।इतिब्राह्मणवचनेनचांद्रा
यणत्रयंकृत्वायवपिष्टेनप्रेतमनुलिप्यस्वयंस्नात्वाशूर्पोदकेनशतवारंस्नापयेत्।प्रेतंप्रक्षाल्यभस्मगोमय

73

मृत्तिकाकुशोदकपंचगव्यशुद्धोदकैः स्नापयेत्॥ पवमानीभिः स्वस्त्ययनीभिर्यदंतिर्यच्च दूरके० आपो हि ष्ठेति तिसृभिः
कयान इति तिसृभिः॥ संस्नाप्य पूर्ववत्सर्वं परित्यज्य विधिना दहेत्॥ यद्वा रजस्वलां सूतिकां च मृतां स्नाप्य स्नापयित्वा
काष्ठवद्दग्ध्वास्थीनि विधिना दहेत्॥ ॥इति स्वैरेणामरणविधिः॥ ॥अथ पाथेयश्राद्धं॥ अस्थिसंचयनानंतरं पाथेय
श्राद्धमिति स्मृत्यर्थसारे॥ पाथेयश्राद्धं केचित्कुर्वंति केचिन्न कुर्वंति॥ ततः अमुकेत्यादि प्रेतस्यात्यंतं पथ्युं मत्कामनुष्य
लोकगमनार्थं पाथेयश्राद्धमहं करिष्ये॥ इति संकल्प्य। पाद्यासनार्घ्यार्चनाच्छादनामान्नपिंडतिलोदककुशोर्णसूत्रउ
शीरचंदनभृंगराजश्वोपाठादिस्नानानांतविषमश्राद्धवत्सर्वं पूर्ववत्कुर्यात्॥ अस्मिन्श्राद्धे दक्षिणास्थाने इदं दास्य
मानं यथाशक्तिसोपस्करं सघृतं सोदकुंभं वस्त्रं कांस्यं यथाशक्तिसुवर्णरजतं ताम्रं लोहं दक्षिणोपेतं सोपानत्कं सोद
पात्रमुपतिष्ठतामिति दद्यात्॥ सर्वत्रामश्राद्धे आमं यथाशक्त्यापादशगुणमष्टगुणं पंचगुणं चतुर्गुणं द्विगुणं वा दद्या
त्॥ ॥इति पाथेयश्राद्धं॥ ॥अथोदकुंभश्राद्धं॥ तत्र याज्ञवल्क्यः। अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत्। तस्या ७३

पन्नं सोदकुंभं दद्यात्संवत्सरं द्विजो।गौतमः। अदैवं पार्वणश्राद्धं सोदकुंभं सधर्मकं। कुर्यात्प्रत्याब्दिकाः श्राद्धास्सं
कल्पविधिना ह्यहं। अथ कर्म पुनर्भोजनादा नियमरहितं यथा चेदं कृते वा सपिंडसपिंडने त्रयोदशादिनादारभ्य
यावद्वर्षं प्रतिदिनं कार्यं। अशक्तौ प्रतिमासं तच्चाकृते सपिंडने एकोद्दिष्टं। कृते तु तस्मिन्नयं यथा पार्वणमेकोद्दि
ष्टं मृताहश्राद्धं कुर्यात्। तथैव सत्कुर्याच्च ततो वर्षोत्पदिने संवत्सरविमोक्षश्राद्धं पार्वणविधिना शक्त्या पात्रे ब्रा
ह्मणभोजनं कुर्यात्॥ ॥इत्युदकुंभश्राद्धांतकल्पं॥ ॥अथ मातापित्रोर्मरणे प्रथमाब्दे विहितनिषिद्धानि। तत्र
धवनिबंधे देवलः। इमौ तौ पितरौ यस्य देहस्तस्यास्थिचिर्जेवेत्स्यान्न दैवं नापि वा पित्र्यं यावत्पूर्णो न संवत्सरः। तथा। म
हागुरुनिपाते तु प्रेतकार्यं यथाविधिः। कुर्यात्संवत्सरादर्वाग् एकोद्दिष्टं न पार्वणं। अन्यदीयमर्थैः। स्नानं चैव महाद स
नं स्वाध्यायं चाग्नितर्पणं। प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने। तथा सर्वेषां प्रेतकार्याणि महागुरुनिपातने॥
कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत्तान्वयुः। माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा। एषां मृतौ चरेच्छ

74

द्वंमन्यस्य न पुनः पितुः। तथा। माता चैव तथा भ्राता पत्नी चैव विपद्यते। तत्र श्राद्धानि कुर्वीरन् न कुर्यात्कुनके मृते। ए
तस्सर्वं वर्षपर्यंते तैमकृते सपिंडेऽ ज्ञेयमिति केचित्। अन्यत्वा। अस्तित्वे पंगथा श्राद्धं श्राद्धं चापरपाक्षिकं। अब्दमध्ये
न कुर्वीत कृते पितुः सपिंडने। अस्यापवादः। अस्तित्वे पंगपा श्राद्धं श्राद्धं चापरपाक्षिकं। प्रथमेऽब्दे पि कुर्वीत यदि
स्याद्भक्तिमान् सुतः। भक्तिमानूरुस्यापाख्ये श्राद्धे देवतात्वयोग्यतासंपादकं श्राद्धे तद्धानूरुत्वाएतानि कुर्यात् इत्यर्थो।
अन्ये तु यथाश्रुतं व्याचक्षते। एतस्य च विषयविवेको स्मत्कृते त्रिस्थलीसेतौ गयाप्रकरणे चागंव्यः॥ ॥अथ पालाश
प्रकृतिदाहविधिः॥ ॥तत्र देशांतरमरणे पाराकद्वयं अष्टौ कृच्छ्रान् कृत्वाऽस्यास्थीनि दहेत्। यद्यस्थीनि चांडा
लश्वादिभिः स्पृष्टानि स्युस्तदा पंचगव्येन गंगोदकाभ्यां प्रक्षाल्य विधिना दहेत्। अथ यस्यास्थीन्यपि न लभ्यंते तस्य प
र्णशरदाहः। स चैवं। शुचिभूमौ कृष्णमृगचर्म मास्तीर्य तदुपर्येकं शरं दक्षिणोत्तराग्रं निवेश्य तदुपरि पालाशवृ
न्तानि न्यसेत्। शिरसि चत्वारिंशद्दितादि प्राग्वत्। षष्ट्यधिकशतत्रयमितैः पर्णशरैः शरीरं निर्माय मंत्रपूर्णसूत्रेण शरे ७४

एसहबधाऽस्थ्नोऽतिपवपिष्टेनानुलिपेत्। तत्र शक्तौ सत्यां वक्ष्यमाणान्यपि कार्याणि नालिकेरं क्षीरसिद्धत्वादि
पूर्ववत्। वैतरणादिदानपूर्वकं कृष्णाजिनेनाच्छाद्य चक्रुणसूत्रेणवेष्टयित्वा पूर्वोक्तविधिना शवं दहेत्। पालाशवृं
तानावेकुशैः प्रतिकृतिं कुर्यात्। आहिताग्नेः प्रकृतिदाहे अरि — दाहे वा दशाहमेवाशौचं। आहिताग्निस्तु अहं पर्ण
शरदाहे पुत्रपत्न्योरगृहीताऽशौचयोर्दशाहादि पूर्णमेव गृहीताशौचयोस्तु तयोरपि त्र्यहमाशौचं पत्नीपुनःसंस्का
रे पत्न्याश्चैव त्र्याशौचं। आहिताग्नौ विदेशस्थे मृते स्तावद्विधिनान संस्कारः। तावत्पुत्रादीनां नाशौचं न च संध्यादि
कर्मलोपः॥ ॥अथ पुनःसंस्कारे कालशुद्धिः॥ आशौचमध्ये पुनःसंस्कारे यथासंभवदिनं संशोध्यं अकालांतरे तु
शोध्यमेवा संवत्सरादूर्ध्वं प्रेतकार्येऽत्तरायणः श्रेयान्। तत्रापि कृष्णपक्षः। तिथिषु नंदा त्रयोदशी चतुर्दशी दिन
क्षयं च वर्जयेत्। शुक्रशनिवारौ चानक्षत्रे प्रभरणी कृत्तिकाऽश्लेषा मघार्द्रा मूलपंचके। परिघो विष्टिकरणं व्य
तीपातेति वैधृतः। रिपुबंधु हमचंद्रोऽपि तथा शुक्रशनैश्चरे। त्रिपुष्करा एवातीव दुष्टानि प्रेतकर्मणि। नन्दायां

सोमवारेण चतुर्दश्यां च जन्मभे। प्रेतश्राद्धं न कर्तव्यं कुलक्षयकरं हि तत्। रोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तराचित्रावि
शाखाज्येष्ठाराधापूर्वाषाढोत्तराषाढाद्विपुष्कराणि चैषु षट्सु षष्ठानि संजवे वर्ज्यानि त्रिष्ठान्यष्टषष्ठानि सर्वथा दिनशुद्धसंजवेऽ
नतिष्ठवाह्यनक्षत्रेष्वाद्यं। पुनःसंस्कारे आंतरं ग्राह्यं। नंदायां शुक्रे चतुर्दश्यां त्रिजन्मनि नक्षत्रेषु एकोद्दिष्टमतिनि
षिद्धं। एकदशाहादौ न निषेधः। तत्र तिथ्यादिनैव शोध्यं। युगादिमन्वादिसंक्रांतिअमावास्यासु एकोद्दिष्टमतिनिषि
द्धं। एकादशाहादौ न निषेधः। तत्र तिथ्यादिनैव शोध्यं। युगादिमन्वादिसंक्रांत्यमावास्यासु प्रेतकार्ये पुनःसंस्कारे
च किंचिदपि नैव शोध्यं। इंदुक्षये च संक्रांतौ मन्वादिषु युगादिषु। न किंचिदपि संशोध्यं प्रेतकृत्यस्य तद्विदुः। अथाधि
कारिणः। तत्र दाहपिंडादिष्वपतितादिज्येष्ठऔरसपुत्रः कुर्यात्। तदसंनिधौ कनिष्ठः। तेषां सर्वेषामसंनिधौ
पौत्रोऽपि ज्येष्ठपुत्रपौत्रादिक्रमेण तदभावे तथैव प्रपौत्रः। एषामभावे पुत्रिकापुत्रादयः पुत्राः क्रमेण। तदभावे तत्पुत्राद्
यः पूर्ववत्। उक्ताभावे पत्नी। एवं पुत्राद्यभावे पत्न्या भर्त्ता तदभावे सपत्नी सपत्न्या भावे भ्रातुः पुत्रो भ्राता स्नुषा दुहिता दौ

हित्रः।अन्यःसगोत्रःसपिंडःसब्रह्मचारीमित्रंशिष्योगुरुःबांधवोधनसंबंधिवादद्यात्।नपुत्रस्यपितादद्यान्ना
नुज्ञायस्याग्रजस्तथानयोषायाःपतिर्दद्याद्पुत्रस्यस्त्रियाअपि।यदिस्नेहेनकुर्वीतसपिंडीकरणंविनाऽ
ब्दंसतिसंभवेअदत्तकन्यायैपितरौदत्तः।अन्याभावेदत्तानामपितावेवदौहित्रमातामहौपरस्परं।मातामह
हस्यदौहित्रोयामतःश्वसुरोमिथः।श्वश्वादेःस्नुषाभ्रातरौमिथोदत्तः।गुरुःशिष्योपरास्परंसर्वाभावेयःकश्चि
त्कुर्यात्।तस्यसर्वेसंपत्प्राप्तिः।वर्षत्रयानंतरंचूडाभावेपिऔर्ध्वदेहिकंमंत्रवत्कुर्यात्।वर्षत्रयादर्वाक्कृ
तचूडोपिशक्तौसर्वंमंत्रवत्कुर्यात्।यद्यशक्तौकृतचूडोतदाअग्निदानंमंत्रवत्कुर्यात्।शिष्टमन्येनकारये
त्।एवंपत्न्याप्यग्निदानमात्रसमंत्रकंकार्यं।शिष्टमन्येनकारयेत्।तथाचकात्यायनः।असंस्कृतेनपत्न्याच
प्यग्निदानंसमंत्रकं।कर्तव्यमितरत्सर्वंकारयेदन्यमेवहि।सुमंतुः।अनुपेतोपिकुर्वीतमंत्रवत्पैतृमेधिकं।यद्य
सौकृतचूडस्यात्यदिस्यात्त्रिवत्सरः।सपिंडीकरणादर्वाक्स्नानाविनिश्राद्धानिविप्रकोअविप्रकोवासत्रि

हित एक एव हि कुर्यात्। तत्र विभक्तैर्यथाशक्ति स्वकीयं द्रव्यं देयं। गृह्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री
यदि वा पुमान्। प्रथमेहनि दद्यात्स दशाहं समापयेत्। तथाश्राद्धिनासक्तुनिर्वापिशाकेनापननिर्वपेत्।
प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिकं। तथा वस्त्रोत्तरीयत्रिलापात्रकर्तृद्रव्यविपर्यये। पूर्वदत्तां जलींद्धा
त्पिंडदानं तथैव च। आचार्यविपर्यये वा। एकादशाहादिकं तु दशाहकर्त्तोऽज्येष्ठपुत्र एव वा कुर्यात्। सपिंडीक
रणं तु योऽज्येष्ठपुत्र एव वा कुर्यात्। कनिष्ठोपि वा। न तु पुत्राद्न्यः। पुत्रे सति नान्यस्तत्राधिकारी। यवीयस्या
कृतं कर्म सपिंडीकरणादिकं। तस्याग्रस्यापि कर्तव्यं प्रेतशब्दं विहाय च। यवीयसी कृतं कर्म प्रेतशब्दं विहाय
तु। तज्यायस्यापि कर्तव्यं सपिंडीकरणं पुनः। विभक्तास्तु द्विकामाश्चेत्पृथक्त्र सपिंडीकरणं कुर्युः। अविभक्त
सुते पुत्रवार्षिकादि ज्येष्ठ एव कुर्यात्। विभक्ताः प्रत्यकं पृथक्कुर्युः। अथ ब्रह्मचर्यादीनां दहनोदकदानाये यधिका
रानावो वक्ष्यते॥ पाखंड्यादीनां मृतानां अधिकारिणापि दहनादि न कार्यं। तदाह याज्ञवल्क्यः॥ पाखंडानाश्रि ७६

तास्तेनां भर्तृघ्नाः कामगादिगाः ।सुराप आत्मघातीनो नाशौचोदकभाजनाः वेदबाह्यलिंगधारणं पाखंडान् आ-
श्रिताः सत्यपि अधिकारे आश्रमविशेषरहिताः ।स्तेना ब्राह्मणस्वर्णव्यतिरिक्तोत्तमद्रव्यहारिणः ।सुरापद्रव्या
दिकदेशगतत्वात् लिंगमवृद्धितां ।आशौचमुदकं चैव तन्मरणेन कार्यमित्यर्थः आत्मत्यागिनो बुद्धिपूर्वक
मात्मघातः ।तेषामविशेषमाह गोतमः ॥ प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति। प्रायो
महाप्रस्थानं । अनाशकमनशनं । प्रपतनं शैलादेः आतः ।इत्यादिनिमित्तैः शास्त्रविहितमार्गेणेच्छापूर्वक
मृतानां आशौचादिनेत्यर्थः ।तथांगिराः ।चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युताद्यथा ।दंष्ट्रिभ्यश्च पशुभ्यश्च
मरणं पापकर्मणां ।उदकं पिंडदानं च प्रेतेभ्यो यत्प्रतीयते ।नोपतिष्ठति तत्सर्वं अंतरिक्षे विनश्यति। आश्वला
यनगृह्यपरिशिष्टेपि चांडालादिहतानां स्नानसंस्कारविधिस्तेषां नैव कार्योदकक्रिया ।रोदनं चैव कर्तव्यं सूत
कं न च बंधुभिः ।दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।प्रायश्चित्तं तु कर्तव्यं पुत्रैश्चांद्रायणत्रयं मनुः

77

वृथासंकरजातानां प्रव्रज्यासु च तिष्ठतां। आत्मनस्त्यागिनां चैव निवर्त्तेनोदकक्रिया। वृथाजात पंचमहायज्ञरहि-
ताः। संकरजाता प्रतिलोमजाः। प्रमादात्तु पूर्वोक्तनिमित्तैर्मरणे प्रायश्चित्तमुक्तं। चांडालादिहते विप्रे त्वंतरि-
क्षमृतेपि वा। कृच्छ्रातिकृच्छ्रचांद्रैस्तु शुद्धिस्तत्र प्रकीर्त्तिताः। तथाविधे प्रमादमरणे जलेवाग्नौ चाद्रित-
थाहांगिराः। अथ वै क्षित्प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया। इति
वचनात्। प्रमादे चांद्रायणं तप्तकृच्छ्रद्वयं कार्यं। यद्वा पंचदश कृच्छ्राणि कुर्यात्। ततो विधिना दाहादि। बुध्या चां-
डालाग्निमृतानां आदीनां प्रतिपत्तिः स्मृता वक्ष्या वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यज-
मानेवृथामृते। वृथा अविहितमार्गेण। तेषां शरीरं गंगामन्यत्र वा महानद्यां क्षिपेत्। कात्यायनेन दाहरुक्तः।
यद्वा लौकिकाग्नौ अमंत्रकं दग्ध्वा स्थीनि स्थापयेत्। प्रायश्चित्तं नारायणबल्यादेः कृते स्थीनि क्षीरेण क्षालयित्वा
विधिना दहेत्। श्राद्धं च कुर्यात्। प्रायश्चित्तनारायणबली च वत्सरांते लोकगर्हापरिहारार्थं श्राद्धादौ योग्यत्वार्थं ७७

78

चकार्योनारायणबलिःकार्योलोकगर्हीनयात्रैः।तथातेषांसवेद्योचंनान्यथेत्यब्रवीद्यमदत्तुकेः।तेषांपा
खंडाद्दीनांबुद्धिपूर्वात्मघातकानांचेत्यर्थः।अथैषामतिनक्ताःपुत्राद्याःसंतितदात्मघातकप्रायश्चित्तंद्विगु
णंचांद्रायणद्वयंतप्तकृच्छ्रंचतुष्टयंच।यद्वात्रिंशत्कृच्छ्राणिकृत्वापाखंडादीनांयोग्यंसर्वप्रायश्चित्तंकृत्वा
नारायणबलिंचकृत्वातदेवकालांतरेवावस्त्रादर्वाग्पिदाहश्राद्धादिकुर्युः।अनित्यत्वादायुषः।अकृत
निष्कृतीनांपाखंडादीनांशवानांस्पर्शस्नानालंकरणवहनरज्जुच्छेदनदहनाश्रुपातकथादीनशानात्कृ
त्वमहासांतपनंचरेत्।ज्ञातेसप्तकृच्छ्रं।एतेष्वेकैककरणेत्वज्ञानादुपवासः।मत्याभ्यासेकृच्छ्रादि।तिकृच्छ्र
चांद्रायणानियोग्यतयाकुर्यात्।यस्तुवृद्धादिरपिविकित्स्यगुरुव्याध्यादियुतः।प्रत्याख्याततिभिषक्क्रियोबुद्धि
पूर्वकमप्यात्मानंघातयतिप्रयागादौवानतस्यदोषः।आत्मज्ञानाज्ञातमरत्वात्तत्स्यापायश्चित्तनारायण
णबलिनस्तः।त्रिरात्रमेवाशौचं।चतुर्थदिनेएकादशाहकृत्यं।पंचमेसपिंडनं।अहाशौचेपिपिंडाः।त्रयः

दशा वा। तत्र आद्ये तेषां वा द्वि पिंड चतुष्टयं। चत्वारः चत्वारिंशाद्वांजलयः। द्वितीय दिने अस्थिसंचयनं। एवमन्यत्रापि
त्र्यहाशौचे ब्रह्मचारिभिः पतितैः क्लीबैः प्रकारांतर प्रायश्चित्त वृतैश्च सपिंडादि मरणे दहनाशौचोदक दानादि
कार्यं॥ ब्रह्मचारि प्रक्रांत प्रायश्चित्त मातापितृ महागुरू मातामह आचार्योपाध्यायानां कुर्यादेव तत्र लोपो
नास्ति। किंतु। सूतकान्नं नाश्नीयान्न सूतिभिः सह वसेत्। मात्रादि व्यतिरिक्त प्रेत कर्म करणे पुनरुपनयनं ब्र
ह्मचारिणः। याज्ञवल्क्यः॥ एव मातामहाचार्यः प्रेतानामुदकक्रिया। कामोदकं सखिप्रेता स्वस्त्रीयश्वशुरर्त्विजां।
काममित्युक्तेः संख्या शाव दाने पि न दोषः। यमेन। अंजलि संख्यायां विशेष उक्तः। माषाणं ततश्चादाय विप्रेद
द्यादृश्यांजलीन्मृद्वाद्दश क्षत्रीये दद्याद्वैश्ये पंचदश स्मृताः। त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशये गृहं॥
॥अथ षोडशश्राद्धानि॥ ॥तानि च। मासिकानि दर्शकं च आद्ये द्वे द्वे मासिके। ऊनाब्दमूनषण्मासं प्रेतश्राद्धा
नि षोडश॥ यस्यैतानि न दीयंते प्रेतश्राद्धानि तानि षोडशापि प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि। अद्ध

द्धं मासंत्रे पाक्षिकं। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव च कार्याणि संविभक्तधनेष्वपि। तत्र च
यथांत्र्यं सर्वैर्द्रव्यं। यत्र सद्यः शौचं तत्र त्र्यंरवः।। सद्यः शौचेपि दातव्यं प्रेतस्यैकादशेहनि। स एव विदितस्तस्य
श्राद्ध पिंडोदकादिषु। शय्यासनाद्विष्विति पाठः।। एकादशाहाशौचे तु दशाह कृत्यं तस्मिन्नेवाऽहनि द्वितीये चै
कादशाह इति डोडूपद्धतौ। केचित्तु। तत्रापि सद्यः शौचवदेकादशाह माहुः।। नवश्राद्धमासिकयोर्विघ्ने कण्
वः।। नवश्राद्धमासिकं च यद्यदंतरितं भवेत्। तदुत्तरसतंत्रादन्तु हेयं प्रचक्षते। अंगिराः।। प्रथमे द्वित्तृतीये
द्भि पंचमे सप्तमे पि वा। नवमैकादशे चैव नवश्राद्धं प्रकीर्तितं। शिवस्वामीमते। नवश्राद्धानि पंचाहुराश्वला
यनशाखिनः।। आपस्तंबः षडित्याहुर्विभाषा तेत्तिरीयिणः।। पंच एकादशाहव्यतिरेकेण भविष्यपुराणे।
वर्णस्थौ तोपि च वस्था। नवसप्तविंशांशत्रिंशांन वश्राद्धान्यनुक्रमात्। आद्यं तयोर्वर्णयोस्तु षडित्याहुर्महर्षि
यः।। विंशां नवए शाज्ञां सप्त तथा। प्रेतश्राद्धेतु यत्नात्र मर्घ्यार्थं परिकल्पितं। यस्यैवोत्तानता प्रोक्ता श्रेषेषु

न्मुज्वतामता। प्रेतश्राद्धेन विकिर इति स्मृतिस्नावल्यां। तथा। द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिंडनं। एकादशेऽह्नि
कुर्वीत प्रेतश्राद्धानि षोडश। आवाह्नाहंकारन्यायादि पितुर्यद्वाहनादिकं। गंधमाल्यैः समभ्यर्च्य श्राद्धं भोक्त्रे निवेदये
त्। तथा। आशिषो द्विगुणा दर्भा जपाशीः स्वस्तिवाचनं। पितृशब्दः स्वसंबंधशर्मशब्दस्तथैव च॥ पात्रालंभो व
गाहश्च उल्मुकोल्लेखनादिकं। तृप्तप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च॥ प्रदक्षिणा विसर्गश्च सीमांतगमनं त
था। अष्टादश पदार्थाश्च प्रेतश्राद्धे विवर्जयेत्। तदुक्तं वायुपुराणे। आशिषं द्विगुणं दर्भा स्वस्त्यस्तु प्रणवं तथा।
अग्नौकरणमुच्छिष्टं श्राद्धं वैश्वदेविकं। विकिरं न स्वधारम्यं पितृशब्दो न विद्यते। अनुशब्दं न कुर्वीत मार्चाहन
तथोल्मुकं। आसीमांतं न कुर्वीत प्रदक्षिणविसर्जनं। एकोद्दिष्टेषु सर्वेषु न स्वधाभिरम्यतां। स्वस्त्यस्तु विसर्जेद्दे
वं सकृत्प्रणवं वर्जितं। एकोद्दिष्टस्य पिंडेषु अन्नशब्दो न विद्यते। पितृशब्दं न कुर्वीत पितृहा चोपजायते। तथा।
न धूपं न दीपं स्वधा न नमस्कार इति। न स्वधाश्रावणं धूपं दीपो नैवेव नमस्त्विति। इति श्राद्धकारिकायां। नात्रि ७९

षोद्दिष्टेण दर्भास्त्वस्यास्तु पृथग्वा जपः। विकिरं पितृन्नामोऽस्तु श्राद्धे मामा विसर्जयेत्। आसीमान्तं स्वस्तिवाचं पिं
डानां च नमस्कृतिः। न तु षष्ठपिंडमूर्द्धिस्थं वंदेद्विप्रकरच्युतां। सपिंडीकरणं यावत् ऋजुः दर्भैः पितृक्रियाः स
पिंडीकरणादूर्ध्वं द्विगुणैर्विधिर्भवेत्। पतिपुत्रवती नारी भर्तुरग्रे मृता यदि। वृषोत्सर्गं न कुर्वीत गां दद्या
त्पयस्विनीं। अन्वारोहणे तु। न वस्त्राद्यानि तु सर्वाणि सपिंडीकरणं पृथक्। एक एव वृषोत्सर्गो गौरेका त
त्र दीयते। यतीषु स्नाताः तत्र यः। एकोद्दिष्टजं पिंडं श्राद्धे चैव प्रेतसत्क्रियां। न कुर्यात्पार्वणादन्यद्ब्रह्मीभूताय नि
स्सते। शौनकः। एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकर
णं तेषां न कर्त्तव्यं सुतादिभिः [illegible] मातृविषये शंखः। मातुः सपिंडीक
र[illegible]णं कथं कार्यं सुतादिभिः। मातामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं। कारिकायां। पितामह्यादिभिः
सार्द्धं मातरं तु सपिंडयेत्। अन्वारोहणे तु यमः। पत्या चैकेन कर्त्तव्यं सपिंडीकरणं स्त्रियाः इति। पत्नीविषये पे

[illegible] त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते॥ २

गिनसिः। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं। विश्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्। सपिंडीकरणे
ऽप्येष पुत्रस्याधिकारः। उक्तं वायुपुराणे। श्राद्धानि षोडशादत्वा कुर्यान्न तु सपिंडनं। प्रोषितावसिते पुत्रकालादपि
80 चिरादपि यदि षोडशश्राद्धानि कनिष्ठभ्रातादिना कृतानि यदा सपिंडत्वमेव कुर्यादित्यपरार्के। पितृदशाहं कुर्व
न्यदि पुत्रो मृतस्तदा। तत्पुत्रः पित्रोर्ध्वदेहिकानंतरं पितामहकृत्यं पुनः संस्कारं कृत्वा सर्वमावर्त्तयेत्। अती
ते तु दशाहे वा तथा। अत्राशास्यापित्रानुज्ञानेन पौत्रे पितामहश्राद्धे तु प्रक्रांते पितृमरणे सति पित्राशौचव्यवहन्ने
वस्वकालेपि पितामहश्राद्धं पौत्रः कुर्यात्। प्रक्रांतत्वादिति मदनपारिजाते गोभिलः। द्वादशाहादिकालेषु प्रमाद
दननुष्ठितं। सपिंडीकरणं कुर्यात्कालेषूत्तरना विष्णु। शूद्रस्य तु विष्णुः। मंत्रवर्जं हि शूद्राणां द्वादशेहनि की
र्तितं। अमावास्याश्राद्धकारिशूद्रविषयमेतत्। अपरार्के कल्पतरौ च। वचनबाधाच्चाशौचमध्य एव क
र्यं। यत्तु कात्यायनः। सर्वेषामेव वर्णानां आशौचांते सपिंडनमिति तदेतद्व्यतिरिक्तविषयं। ब्रह्मपुराणे। आ ८०

शौचांतं पङ्क्तिवर्णानां दशमं पिंडमुत्सृजेत्। श्राद्धे पिंडदानांते शुद्ध्यर्थं श्राद्धमाचरेत्। सपिंडीकरणे व्युत्क्रममृते तु। ब्रह्मपु
राणे। मृते पितरि यस्याथ पिपद्यते च पितामहः। तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः। तेभ्यश्च पैतृकः पिंडो नियो
क्तव्यश्च पूर्ववत्। मातर्यथ मृतायां तु विद्यतेऽथ पितामही। प्रपितामही पूर्वं तु कार्यस्तत्राप्ययं विधिः। व्युत्क्रमाच्च प्रमी
तानां नैव कार्या सपिंडना। तत्तु मातापितृभर्तृव्यतिरिक्तविषयं। अत एव स्कांदे। व्युत्क्रमेण मृतानां च न सपिंडीकृ
तिरिष्यते। यदि माता यदि पिता भर्त्तारेष विधिस्मृतः। एवं विधिसपिंडननिषेधरूपः। क्षत्रियादिरपि महैकोद्दिष्टमेका
दशेऽहन्येव कुर्यात्। न तु सूतकांते। तदाह वृद्धवसिष्ठः। एकादशे द्विजश्राद्धं तत्सामान्यमुदाहृतं। सर्वेषामपि वर्णा
नां सूतकं तु पृथक् पृथक्॥ गोभिलोऽपि। आद्यमब्दं हि पि कुर्यादेकादशेऽहनि। कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुन
रेव च। रुद्रगणश्राद्धं तु क्षत्रियादिसूतकांते कुर्यात्। एकादशेऽहनि तथा विप्रानेकादशैव तु। क्षत्रादिसूतकांते तु भो
जयेदयुजो द्विजानिति मत्स्यपुराणात्। इदं रुद्रगणपरत्वेन व्याख्यातं मदनपारिजाते। गोभिलः। ब्राह्मणं भोजयेत्
देहोतव्यमनले तथा। पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति। इदं चाद्यमासिकाद्याब्दिकयोः सिद्धार्थं गिरः॥

यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं। मासिकं चोदकुंभं च देयं तस्यापि वत्सरं॥ पैठिनसिः। सपिंडीकरणादर्वाक् कुर्याच्छ्राद्धानि
षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्या
त्सुतानपि। शाठ्यायनः। सपिंडीकरणादर्वाक् अपकृष्टाकृतानपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात्। वृद्धिश्राद्धानं
तरं तन्निषेधादित्यर्थः॥ ॥अथ रात्रौ जननमरणरजोदर्शनादौ चत्वारः पक्षाः। अर्द्धरात्रपर्यंतं पूर्वदिनगणना। वा त्रिया
मा या रात्रेर्भागद्वयं पूर्वदिनांतर्गतं वा। सूर्योदयावधि पूर्वदिनमेव वा। आनंदाह कश्यपः। उदिते तु यदा सूर्ये नारीणां दृश्य
ते रजः। जननं वा विपत्तिर्वा यस्याहस्तस्य शार्वरी। अर्द्धरात्रावधिः कालः सूतकादौ विधियते। रात्रिं कुर्यात्त्रिभागां तु द्वौ
भागौ पूर्व एव तु। उत्तमो ंशः प्रभाते न शुध्यते मृतसूतके। रात्रावेव समुत्पन्ने मृते रजसि सूतके। पूर्वमेव दिनं ग्राह्यं या
वन्नाभ्युदितो रविरिति। अत्र देशाचारतो व्यवस्था। ग्रंथांतरे। रजोदर्शे समुत्पन्ने सूतके मृतके पि वा। पूर्वमेव दिनं ग्रा
ह्यं यावन्नोदयते रविः॥ ॥अथ रात्रौ दाहादिनिर्णयो देवजानीये। रात्रौ वा रात्रिशेषे वा म्रियंते चेद्द्विजातयः। दाहं कृत्वा
यथान्यायं द्वौ पिंडौ निर्वपेत्सुतः॥ निगम॰ संध्यायां वा रात्रौ दाहः पाथेयकर्म चानवश्राद्धं च नो कुर्यात् कृतं तन्निःफलतां व्र

ऽतः। रात्रिमृतस्य रात्रावेव दाहः। वपनं तु प्रातः। उक्तं च स्मृतिसंग्रहे। रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितः। वपनं ने
ष्यते रात्रौ श्वस्तनी वपनक्रिया। निगमवचनस्तु दिनमृतस्याऽस्यादिना रात्रिदाहनिषेधार्थ इति तथा। अत्र बंधुष्विति श्रीनृकृष्ण
नृकृत्वा दहेत्सुतः। स्मृतिरत्नावल्यां दशाहांतर्दर्शपाते भविष्यपुराणे। प्रदृष्टव्याशौचं तत्र तु यदि दर्श उपपद्यते। समाप्य
चोदकं पिंडानू स्नानमात्रं समाचरेत्। मातापितृविषये तु गोतमः। अंतर्दशाहे दर्शश्चेत् तत्र सर्वं समापयेत्। पित्रोस्तु
यावदाशौचं दद्यात्पिंडं तिलांजलीन्। पित्रोरित्येकशेषः। युग्मा गालवः। पित्रोराशौचमध्येपि यदि दर्शः समापयेत्। ता
वद्देवोत्तरं तत्रं पर्यवस्येत्यहाद्यपरमिति। तदीरसः पुत्रो यदा करोति तद्विषयं। अपदादिविषयं चेति पारिजाते। परा
शरमाधवीये निर्णयामृते चान्यहानंतरं दर्शे मातापितृसंत्रस्यापि समाप्तिर्न तु अहमध्ये दर्शपाते तद्विषयमेव गौत
मवचनं। अन्येषां तु यदा कदाचित्स्याद्दशाहमध्ये दर्शपाते तत्र समाप्तिरिति। दाहकाले ग्निनाशे दाहकाष्ठैरग्निं मथित्वा ते
न दहेत्। भूर्भुवः स्वः स्वाहेत्याहुतिं हुत्वा लौकिकेनाग्निना वा। तद्देहं महाजले वा क्षिपेत्। दशाहं प्रेतपिंडदत्वा स्नात्वा
शुक्लोऽत्र सपिंडस्यत्र्यहोपवासः सपिंडस्यैकाहः। मत्वा द्विगुण ह्यो। प्रेतपिंडं कुर्वतां संचयनादर्वाक् स्त्रीसंगे चांद्रायणं

= दर्भैरग्निं तु प्रज्वाल्य पुनर्दर्भैस्तिलांस्तु तः पुनर्दर्भैस्तृतीयोऽग्निरेष उत्तपनीयक इत्युत्तपनीयाग्नेर्भ्रण्णं नातापदग्गेऽर्द्धं। ये =

र्घ्यं कायत्रयं। अन्येषां प्रेताशौचिनां पूर्वं संचयनात्त्रिरात्रं। पश्चादुपवासः। इत्यादि स्मृत्यंतरेभ्यो ज्ञेयं। अन्यपुस्तकां कारिकायां
पत्न्यामपि दहेदेवं जहुः पूर्वं मृता यदि। अनग्निकां दहेदेवं कपालेन हविर्भुजा। अग्निवर्णे कपाले तु कृत्वा तत्राविनिक्षि
पेत्। करिष्यादिततो यस्तु जातः स तु कपालजः। देवलः। चंडालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित्। पतिताग्निः
82 श्चिताग्निश्च न शिष्टैर्ग्रहणोचिताः। आहिताग्नेर्देशांतरमरणे विशेषस्तत्रैवा। यस्मिन्देशे स्थितो वह्निस्ततोऽन्यत्र मृतो
यदि। चरुः पथिकृतः कार्यः पूर्णाहुतिरथापि वा। अन्यदीयेन वत्सेन यागो गौः कृतपयोधरा। आशरीरागतेस्तस्याः पय
सा होममिष्यते। अप्सु वाप्यपि होतव्यं पयसा तदसंभवे। तथा कृष्णपक्षे प्रमीयेत यद्यग्निः प्रातराहुतिः। विशेषास्तु
जुहुयाद्दर्शपर्यंतापक्षहोमवत्। तदानीमेव जुहुयात्सायं कालाहुतीरपि। सायं म्रियेत चेत्सायमायाहुतीर्हुत्वा जुहुया
द्यथा। तदानीमेव जुहुयात्प्रातःकालाहुतीरपि। सकृद्गृहीतमंत्रेष्टं भिन्नं तंत्रं च होमयोः। दर्शं वापि प्रकुर्वीत स्था
लीपाकं तदैव तु। होमदर्शौ न कर्तव्यौ पुनर्यदि स जीवति। म्रियेतो यवसस्थोऽग्निर्नैवेनं याजयेत्तदा। म्रियेताऽग्निश्चिते
नित्यहोमद्रव्ये हविःस्रुचा। तथा निःशेषदग्धानि तथा तानि दहेत्तदा। बर्हिष्यादिते च वह विष्णुम्रियते यदा। यासां प

रिगृहीतानि देवतानां हवींषि तु। चतुर्थीतानि नामानि तावतानां वदेदथा। स्वाहाकारेण युगपत् सर्वाणि जुहुयाद्‌
था। नेष्टं स्विष्टकृदाद्यत्र शेषं कार्यमिति स्थितिः। एकोद्दिष्टे सपिंडे च कपित्थं तु विधीयते। नालिकेरप्रमाणं तु प्रत्यब्दे
मासिके तथा। तीर्थे दर्शे च संप्राप्ते कुक्कुटांडप्रमाणतः। महालये गयाश्राद्धे कुर्यादामलकोपमं। अन्नमुगमपेत्कुर्यात्‌ पिं
तं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वा पो घृतं प्राश्य विशुद्ध्यति। घृताभावे तु गायत्र्या दशकृत्वः पिबेदपः। ज्ये
ष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते। देशांतरगतानां च पुत्राणां तु कथं भवेत्। अकृत्वा तु वपनं कार्यं दशाहांतं तिलो
दकं। ततः सपिंडीकरणं कुर्याद्देकादशेऽहनि। द्वादशाहे न कर्त्तव्यमिति शातातपोऽब्रवीत्। स्मृत्यर्थसारे। ब्रह्मचा
रिणामनपत्यानां सपिंडीकरणं नास्ति। अतस्तेषां सदैकोद्दिष्टमेवा व्युत्क्रममृतानां व्यवहितैः सापिंड्यं कार्यं। के
चित्सर्वत्र सपिंडनमाकृतिरिति। यतीनां चैतत्त्वं नास्ति। ततः स्तेषां नैकोद्दिष्टं न सपिंडीकरणं। किंतु एकादशेऽहनि पा
र्वणं कार्यं दंडग्रहणात्पूर्वं मृते तु दशाहादि सपिंडनांतं सर्वं विधिना कार्यमेवा प्रयोगरत्ने उपयोगिनो निर्णयः॥ ॥ अथ ब

83

ह्मचारीमरणे विधानमाश्वलायां विशेषः। येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदा तत्कुलं क्षयमाप्नोति सोपि दुर्गतिमाप्नु
यात्। यह्ततं शान्तुयाद्यो पिहुमेवाति चिरं वसेत्। तस्यापि तस्य वंशस्य गतिमिच्छन्महीयसीं। विधानं च विधायास्य क्रौ
र्ध्वदेहिकमाचरेत्। त्रिंशच्छ्रो ब्रह्मचारिस्मो तद्यात्कौपिनकां नवान्नूहस्तमात्राकर्णमात्रा दद्यात्कृष्णाजिनानि च।
पादुकाछत्रमाल्यादि गोपीचंदनमेव च। मणिप्रवालमालाश्च ब्रह्मसूत्राणि चार्पयेत्। मंत्रैस्तल्लिंगकैश्चैव ब्रह्मसायु
ज्यसिद्धये। अन्यावेव्रतीनां पूज्याः गृहस्थाः साधवः शुभाः। एवं कृते विधानेन विघ्नस्तस्य न जायते। ब्रह्मचारीमरणे
ऽर्कविवाहः शौनकः। ब्रह्मचारी मृतो रीतिकथयामिसमसतः। तत्रावकीर्णदोषस्य प्रायश्चित्तं प्रशांतये। द्वादशाब्द
षडब्दं वा त्र्यब्दं वाप्यथवाचरेत्। ततो व्रतविसर्गाख्यं विधिं समाचरेत्। स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि
संयोज्य चार्कविधिना संयोज्येते परस्परं। अथाग्निमुपसमाधाय एवं गुणेत्यादि अमुकगोत्रस्यामुकनाम्नो मृतस्य ब्र
ह्मचारिणो व्रतविसर्गं करिष्ये। तदंगतया विहितं हिरण्येन नान्दीश्राद्धं करिष्य इति संकल्प्य तत्कृत्वाऽऽधानाद्या

८३

घारांतं कृत्वाऽज्यं जुहुयात्। व्याहृतयश्चतस्रः। ॐ अग्नये व्रतपतये स्वाहा। इदं०। अग्नये व्रतानुष्ठानफलसंपादना
य स्वाहा। इदं०। विश्वेभ्यो देवेभ्यः स्वाहा। इदं०। ततः स्विष्टकृदादि समाप्य। पश्चादर्कसमीपे। अथ वार्कशाखामानीया
ऽर्कब्रह्मचारिणो हरिद्रयानुलिप्य पीतसूत्रेण वेष्ट्य वस्त्रयुग्मेनाच्छाद्या ऽग्निमुपसमाधाय एवं ब्रूयात्। अमुकगोत्र
स्येत्यादि। अमुकोर्ध्वदेहिकार्थं अर्कविवाहं करिष्ये। तदंगं हिरण्येन नांदीश्राद्धं करिष्ये। इत्यादि। आघारांतं कृत्वा आज्य
होमः। अग्नये स्वाहा। इदं०। ॐ बृहस्पतये स्वाहा। इदं०। विवाहविधियोजकाय स्वाहा। इदं०। यस्मै त्वं कामकामा
य०। यं संभ्राजामहे। तमस्मभ्यं कामं दत्वाऽथेदं घृतं पिब स्वाहा। इदं कामाय०। चतस्रो व्याहृतयः। ततः स्विष्टकृ
दादि। अर्कशाखायब्रह्मचारीशवं च कुशाग्निना विधिना दहेत्। शाखां प्रवाहयेदित्यन्ये॥ ॥इति ब्रह्मचारीमरण
विधिः॥ ॥अथ वसुगणश्राद्धं॥ ॥इदमप्यष्टवसूद्देशपक्षे सर्वेण कार्यं। श्राद्धेनाष्टौ ब्राह्मणा भोजनीयाः। अत्र श्लो
केनैकः। वसुनामानि। ध्रुवो धरश्च सोमश्च आपश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः

पि

अत्र पिंडदानानामभावः। वसुगणश्राद्धं। केषांचिन्मते प्रेतोपकारार्थं कर्तव्यं। मनुः। न वर्द्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रि-
याः। न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेत्। अस्यार्थः। येषां स्वकर्मनिष्ठायां अल्पसमयव्यापकं। आशौचमुक्तं
तेषां दशाहादिना स्वकर्महीनत्वं द्विजत्वदर्धिमाशौचं न कर्तव्यमित्यर्थः। प्रत्यूहो निरासः। तेनाग्निक्रियास्वरूपं कुर्यादि-
त्यर्थः। प्रकारांतरमाह। न चेत्यादि। अग्निहोत्रहोमासामर्थ्येऽग्निहोत्रिणे होमकरणे पुत्रादेरपि शुचिरेवेत्यर्थ इति
देवपद्धतौ। अथ स्मार्त्तकर्मण्यपि यजमानस्याधिकारः। शंखः। कात्यायनजाबालिः। उभयत्र दशाहानि सपिंडानामाशौ-
चकं। स्नानोपस्पर्शनाभ्यासात्। अग्निहोत्रार्थमर्हति। अस्यार्थः। उभयत्र जातसूतके मृतसूतके च स्नानोपस्पर्शना-
भ्यासात्। स्नानाचमनाद्वृत्ता अग्निहोत्रेऽधिकारी भवतीत्यर्थः। गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः। पश्चादाशौ-
चं पतितं चेत् न भवेदिति निश्चयः। यदा सपिंडीकरणं द्वादशेऽहनि कृतं मासिकानि वापकृष्टानि तदा पुनर्मासिका-
नि कार्याणि। न तेनेति जिज्ञासायामाह। सापिंड्ये ह्यादधस्तान्निकुर्यात्कालेस्वके पुनः। अब्दात्संवत्सरात्पूर्वं सापिंड्येत ८४

निषोडशश्राद्धानि स्ववेस्वसंबंधिनिकालेपुनःकुर्यात्। तदाहांगिराः यस्यसंवत्सरादर्वाक् विहितंतुसपिंडनं।
विधिवत्तानिकुर्वीतपुनःश्राद्धानिषोडशेति। एकादशेद्वादशेद्वित्रिपक्षेवात्रिमासिके। षष्ठेचैकादशेवाब्देसंपूर्णे
85 वाप्यनागमे। प्रथमास्यादमावास्यामृताहाद्दशमेह्नि। सपिंडीकरणंतत्रकुर्यादेवसुतोग्निमान्। मृताहात् इति
भार्यादायांमंचमी। मृताहादूर्ध्वंदिनमारभ्येत्यर्थः। अथत्रयोदशेद्विपातःस्नात्वा। प्राणानायम्येतिथ्यादिसंकीर्त्यअ
मुकगोत्रस्यामुकशर्मणः पितृलोकगमनेसुखसिध्यर्थंअमुकगोत्राणांअमुकशर्मणांऽस्मत्पितृपितामहानांव
सुरुद्रादित्यस्वरूपाणांपाथेयश्राद्धंसपिंडिकंसदैवंकरिष्यइतिसंकल्प्यक्षणःप्राद्यादिसर्वंपार्वणवत्कुर्यात्। पक्का
न्नेनामेवकुर्यात्। ततःकर्त्तान्यगास्नानंकुर्यात्। आदेशकालौनिर्दिश्यममसपरिवारस्यसकलारिष्टोपशांतयेक्षेमायुः
सिध्यर्थंचगणेशपूजनपूर्वकंस्वस्तिवाचनंकरिष्ये। यथाशाखंस्वस्त्ययनंवाचयित्वाऽग्निरखोगृहीत्वाबंधुभिःसहनुं
जीता। अतऊर्ध्वंश्रीखंडधारणतांबूलभक्षणानिकुर्यात्।। श्रीमज्ज्योमतीबालकज्ञातीयज्योतिर्विज्ञोबालात्मजविश्व
नाथकृते श्रौर्ध्वदैहिकपद्धतिःसमाप्ता।। ।।श्री।।सं.१९०८ वर्षेआश्विनशुदि ११ गुरौलिखितंनागरज्ञातीयत्र.हरखरां ८५
णलिखितमिदंपुस्तकं।
[redacted] ।ग्रं भ २०००

२लं॰फु॰त्र

कला॰ ७

ओं॰ हिंदेहिक ५६ाते:

४५६८